दितानिजगंति चतुर्दशभुवनानियेनसः तस्य खंडपरशोः खंडयतिरिपून्हिनस्तीतिखंडः तादृशः परशुः शस्त्रविशेषोयस्यभूतेशस्य भूतेशः खंडपरशुरित्यमरः महैश्वर्यंमहच्चतदैश्वर्यंचमहाविभूतिभूतम् विभूतिर्भूतिरैश्वर्यमित्यमरः सन्महदितिसमासेआङ्महादित्यात्वेवृद्धिः गंगासलिलमात्रसहायेनेश्वरेणविलासादेवचतुर्दशभुवनानिकृतानीतिभावः लोकेपिकश्चनधनेसहायेसति ऊठयाब्रह्मपुर्यादिकंनिर्मातीतिप्रसिद्धम् पुनस्तत्किम् यत्श्रुतीनां श्रूयतेधर्मोयाभिस्ताः श्रुतयः चत्वारोवेदाः श्रुञ्जीत्यादिनाक्तिन्

श्रुतीनांसर्वस्वंसुकृतमथमूर्तंसुमनसांसुधासौंदर्यंतेसलिलमशिवंनःशमयतु १

श्रुतिःस्त्रीवेदआम्नायइत्यमरः तेषांसर्वस्वंसर्वंचतत्स्वंचसर्वस्वं इदमेववेदानांधनमितिभावः यद्वा सर्वंचतत्स्वंच आत्मा इदंसलिलमेववेदानामात्मेतिभावः स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वोस्त्रियां धनइत्यमरः पुनस्तत्किम् अथयत्सुमनसांसुपर्वणाम् सुपर्वाणः सुमनसइत्यमरः मूर्तंसशरीरम् सुकृतंपुण्यम् स्याद्धर्ममस्त्रियांपुण्यश्रेयसीसुकृतंवृषइत्यमरः पुनस्तत्किम् यत्सुधासौंदर्यम् सु

धेवामृतमिवसौंदर्यंयस्यतत् अतिशभ्रमित्यर्थः मधुरास्वाद चिरजीवित्वादितत्कार्यकारीतिवा यद्वा सुधा
सौंदर्यमितिवापाठः सुधेतिपृथक्पदम् चंद्रोसुखमितिवत्सलिलविशेषणम् पुनः० सौंदर्यम् सम्यक्कंद
रीहिमाचलकंदरंतत्रभवंसोदरम् भवार्थेऽण् सोदरमेवसौंदर्यमिति चातुर्वर्ण्यादित्वात् ष्यञ् आदौ
हिमाचलेप्रकाशितमितिभावः अथवास्फधायाः सौंदर्यंज्ञातृरूपम् सोदराद्यदितियः अनदरस्मितमि
तिश्लोकपर्यंतंशिखरिणीछंदः तल्लक्षणंतु रसैरुद्रैश्छिन्नायमनसभलागः शिखरिणीवृत्तरत्नाकरोक्तं
शिखरिणीय्मौम्सौभ्लौगुरुद्राइतिपिंगलंचबोद्धव्यम् ननुछंदोत्तरंत्यक्त्वानेनैवछंदसाकिमितिव
र्णनमितिचेत् अत्रोच्यते शिखरिणीछंदसिजलदेवताकयगणस्यादौसत्वेन जलस्पर्शे रूपाभिमतफ
लसिद्धिर्भविष्यतीत्याशयेन अशोकवनितान्यायेनवेतिकृतधियोविदांकुर्वंतु तदुक्तम् मोभूमिः
श्रियमातनोतियजलंवृद्धीरवन्हिर्मृतिंसोवायुः परदेशदूरगमनंतव्योमशून्यंफलम् जः सूर्योरुजमा
दधातिविपुलांभेंदुर्यशोनिर्मलंनोनाकः सुखमीप्सितंफलमिदंप्राहुर्गणानांबुधाइति किमपितत् इत्ये
कंपदंवा किमपि अनिर्वचनीयंमोक्षप्राप्तिरूपंफलंतनोति विस्तारयतीति किमपितत् ननुविस्तारेऽक्षि

386

धातुवङ्घोत्तुंगाः उन्नताः एतादृशास्तरंगाः ऊर्मयः भंगस्तरंगऊर्मिर्वेत्यमरः भवतां भक्तजनानां दुरितभय
भंगाय दुरितंच भयंचनयोर्भंगायनाशाय क्रियार्थोपपदेति चतुर्थी भवंतु आशिषिलोट् कथंभूतास्तरंगाः
उदंचन्मार्तंडस्फुटकपटहेरंबजननीकटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः हेशिवे रंबतेशब्दकरोति
इतिसप्तम्या अलुक् हः शंकरेहरौहं सेरणरोमांचवाजिषु इतिनानार्थमंजरी अविरबिशब्दे पचाद्यच् त
त्पुरुषे कृतीतिसप्तम्या अलुक् अप्येकदंतहेरंबलंबोदरगजाननाइत्यमरः हेरंबस्यजननी माता पार्वती

(अपिद्राग्गाविद्याद्रुमदलनदीक्षागुरुरिह भवाह स्त्वेवारांश्रियमयमपारांदिशतुनः २) उदंच
न्मार्तंडस्फुटकपटहेरंबजननीकटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः तस्याः कटाक्षाः अपां

गदर्शनानि कटाक्षोपांगदर्शनमित्यमरः स्फुटंचतत्कपटंचव्याजंच कपटोस्त्रीव्याजेत्यमरः स्फुटकपटेनहेरंब
जननीकटाक्षाः उदंचन् उदयंप्राप्नुवन् योमार्तंडः अर्कः विकर्तनार्कमार्तंडइत्यमरः उदंचन्मार्तंडवत् स्फुटक
पटहेरंबजननीकटाक्षाः अतिरक्ताइत्यर्थः तेषांव्याक्षेपः विलंबः चिरकालपर्यंतंकटाक्षस्थितिरित्यर्थः यद्वा

387

व्याक्षेपः संबंधः तेन क्षणंक्षणपर्यंतंजनितः उत्पादितः तादृशाः संक्षोभनिवहोभयसमूहो येषांते पुनः कथं
भूताः अतएवहरशिरसिस्थाधारभूतेमहादेवमस्तके लंगंतः कंपंतः इतस्ततोगच्छंतोवा लगिकंपनेइत्य
स्मात् उरवउरवीतिदंडके पठितगमनार्थकत्वात् उभयार्थकत्वं क्वचित्तु उदंचन्मात्सर्येतिपाठः तत्रसापत्न्य
भावादुदंचन्मात्सर्येणेतिव्याख्येयम् ३ इदानींत्वदाश्रयान्मयासर्वेसुरास्तृणप्रायीकृताः अधुनायदि

भवंतुत्वंगंतोहरशिरसिगंगातनुभृतस्तरंगाःप्रोत्तुंगादुरितभयभंगायभवतास् ३ तवा
लंबादंबस्फुरदलघुगर्वेणसहसामयासर्वेवज्ञासरणिमथनीताःसुरगणाः त्वंमेकार्यकरणोउदा

सीनातर्हिअहंकेषामग्रेरोदनंकरोमीत्याह तवेति भो अंबजननि अंबार्थनद्योरिति ह्रस्वः तवालंबादाश्र
यात्स्फुरदलघुगर्वेण स्फुरन् देदीप्यमानः अलघुर्महान्गर्वोहंकारोयस्यतेन मयासर्वेसुरगणाः अवज्ञा
सरणिं अवज्ञायाःअवहेलनस्यसरणिस्तां सहसाअविचारेणनीताः प्रापिताः अत्रप्रधानकर्मण्याख्येयेला
दीनाद्वुहिकर्मणामितिभाष्योक्तेः सुरगणरूपेप्रधानकर्मणिक्तः अतएवाभिहितत्वात्तत्रप्रथमेतिदिक् भो

भागीरथि भगीरथस्येयंभागीरथीतत्संबोधनम् तस्येदमित्यणिटिड्ढाणोतिङीप् इदानीमुद्धारसमयेयदि औ
दास्यंउदासीनत्वं उद्धारानुकूलव्यापारशून्यत्वमित्यर्थः भजसिअंगीकरोषि तदातर्हिनिराधारः निर्गतः आ
धारोयस्यसः एतादृशो हमिहलोकेकेषांपुरः अग्रेरोदिमिरोदनंकरोमि हाइतिकष्टे खेदेवा इतित्वंकथय वद
रुदिर् अश्रुविमोचने रुदादिभ्यः सार्वधातुकेइतीट् देवानामवहेलनात्तैः त्यक्तः त्वमपि अस्मिन्समयेयदि
त्यजसि तर्हिमेकागतिरितित्वमेवकथयेतिभावः ४ पुनरपिभवाहरूपंस्मरन् पापहरणंप्रार्थयते स्मृतिमि

इदानीमौदास्यंभजसियदिभागीरथितदानिराधारोहारोदिमिकथयकेषामिहपुरः ४ स्मृतिंया
ताप्युंसामकृतसुकृतानामपिचयाहरस्यंतस्त्वद्ध्वांतिमिरमिवचंद्रांशुसरणिः

ति हेगंगे तवभवाहरूपाम्
र्तिः अकृतसुकृतानां अतीताद्यतनजन्मसुकृतपातकानांपुरुषाणामपिस्मृतिंस्मरणंयाताप्राप्तासती चंद्रां
शुसरणिः चंद्रस्यांशवः किरणाः तेषांसरणिः पंक्तिः सरणिःपद्धतिरित्यमरः तिमिरं अंधकारंयथातथांतस्त
द्ध्वांअंतःकरणाज्ञानात्स्थंनाशयति यथा चंद्रोदयेन तमोनश्यति तथातवस्मरणेनमहापातकिनांतत्सदृशा

389

नांपातकं नश्यति पुन० मूर्तिः सकलाः सुराः देवाः तैः संसेव्यसलिला सेवनीयजला एतादृशी तेमूर्तिः म
मांतः संतापं अंतः करणस्थंत्रिविधंकायिकवाचिकमानसिकरूपं पापंचनरकृतंसंतापमाधिभूताध्यात्मा
धिदैवंवाहरताम् तथाजातेजन्ममरणकष्टान्मुक्तः स्यामितिभावः ५ इदानींराज्यत्यागपूर्वकंत्वत्तीरवा
सिनांत्वंभः पानेनजायमानआनंदः ततोन्यूनसुखंमोक्षमुपहसतीत्याह अपीतिभोजननिभ्राज्यगपिप्रभूतमपि
प्रभूतंप्रचुरंभ्राज्यमित्यमरः ससुद्रांतमपीत्यर्थः एतादृशंराज्यंराज्ञः कर्मपुरोहितादित्वाद्यक् प्रजापालना

इयंसातेमूर्तिःसकलसुरसंसेव्यसलिलाममांतःसंतापंत्रिविधमपिपापंचहरतां ५अपिभ्राज्यं
राज्यंतृणमिवपरित्यज्यसहसाविलोलद्वानीरंतवजननितीरश्रितवताम्

त्यक्तंसहसातृणमिवपरि
त्यज्य अनेन लोभाभावःसूचितः विलोलद्वानीरंविलोलंतः वायुनाचंचलाः वानीराः वेतसवृक्षाः यस्मिन्त
त् वेतसपर्याये रथाभ्रपुष्पविदुलशीतवानीर वंजुलाइत्यमरः अनेनछायानिबिडत्वंसूचितम् एतादृश
तवतीरं कूलंरोधश्चतीरंचेत्यमरः श्रितवतांसेवतांसुधातः अमृतात् पंचम्यांतात्तसिल्स्वादीयःसलिलम

390

391

त् षष्ठी तथाचकोशः पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्विति ददानादात्रीनलोपे तिषष्ठीनिषेधात् पद

द्वितीया एतादृशीत्वंइहलोके केनतुलनीयाउपमेयासीतिनः अस्मान् कथयवद तादृशस्यकस्याप्यभावान्

नाप्युपमेयासीतिभावः यद्वा केनब्रह्मणातुलनीयासि अपितु नेत्यर्थः ब्रह्मणोपि तादृशसामर्थ्याभावादि

भावः तुलनिष्कर्षइतिधातोरनीयर् विष्णुरूपंवस्त्वितिपक्षेसारूप्यमुक्तिः प्रतीयते तदुक्तंश्रीमच्छंकराचार्यैः

न्मध्याङ्गुलांछनोगरुडगःपीतांबरोनिर्गतः नारायणंवाशिवंवाइतिवेतितत्किं यद्विष्णुपदंमहादानैः गजाश्व

अचिंत्यंतद्विष्णोःपदमखिलसाधारणतयाददानाकेनासित्वमिहतुलनीयाकथयनः ११

शिविकाद्

लादिरूपैः ध्यानैः चित्तैकाग्रतयाचिंतनैः अपिनबहुविधवितानैरपिन बहुविधाः अनेकप्रकाराः येवितानाः क्रतवः क्रतु

विस्तारयोरस्त्रीवितानंत्रिषुतुच्छकइत्यमरः बहुविधाः येवितानाउल्लोचास्तैः अस्त्रीवितानउल्लोचेत्यमरः घोराभि

भयंकराभिः परमकष्टसाध्याभिर्वा स्फटिमलतपोराशिभिरपि स्फटिमलानिनिर्मलानि नतुमारणोच्चाटनवशीकरण

जनकानितादृशानियानितपांसि तेषांराशयः समूहाः तैरपिनलभ्यंनप्राप्यम् अर्हार्थेलभधातोःपोरदुपधादि

यत् पुनस्तत्किम् अचिंत्यंचिंतालहरीसागगोचरमितिभावः ११ इदानीं दर्शन मात्रेणनृणांसंसारभयहंत्रीं
त्वांशिवः पार्वत्यनुरोधत्यागपूर्वकंनिरंतरंशिरसिबिभर्तीत्याह नृणामिति भोभागीरथि तेतवमूर्तेः तनोः
महिमानंपरमदुर्घटकार्यकर्तृत्वरूपंमाहात्म्यंइहलोकेकः निगदतुवदतु अपितुनकोपीत्यर्थः माहात्म्यबाहुल्ये
न कस्यापिवाणीप्रसराभावादितिभावः कथंभूतायाः मूर्तेः ईक्षामात्रादपि ईक्षैवईक्षामात्रमितिमयू

नृणामीक्षामात्रा दपिपरिहरंत्याभवभयं
शिवायास्तेमूर्तेः कइहमहिमानंनिगदतु ॥

रव्यंसकात्समासः मात्रंकार्त्स्न्येवधारणेइतिकोशादवधारणंमात्रशब्दार्थः तस्मादपिनृणांचेत्यर
वैकल्पिकत्वाद्दीर्घाभावः भवभयंभवात्संसाराद्भयम् हरंत्याः तदुक्तं गंगेत्वद्दर्शनान्मुक्तिर्नजानेस्ना
नजंफलमिति पुनः कथंभूतायाः शिवायाः शिवयतीतिशिवा तत्करोतीतिण्यंतात्पचाद्यचिटाप् त

393

यद्वा शिवं कल्याणं अस्तीत्यस्याः सा तस्याः यद्वा शिवो महादेवो भर्तृत्वेन अस्त्यस्या इति शिवोमोऽ
स्या इति पक्षचतुष्टयेपि अर्शआद्यच् शिवोमोक्षे महादेवे सुखे क्षेमे जले शिवमिति शाश्वतः श्रीकंठः कपर्द
ग्रः कपर्दी श्रीकंठः शितिकंठः कपालभृदित्यमरः अमर्षम्लानायाः अमर्षेण कोपेन कोपक्रोधामर्षरोषइत्य
रः म्लाना ग्लाना तस्याः एतादृशः गिरिभुवः गिरेर्हिमाचलात् भवतीति गिरिभूः पार्वती क्विप् तस्याः प

अमर्षम्लानायाः परमननुरोधा गिरिभुवो
विहाय श्रीकंठः शिरसि नियतं धारयति यां १२

रूपं अनुरोधं अनुसरणं विहाय त्यक्त्वा यां गंगां शिरसि नियतं निरंतरं यथा स्यात्तथा धारयति बिभर्ति स
र्थेपि च सपत्नीभूत गंगायाः मस्तकधारणेन जातकोपायाः अपि पार्वत्याः सांत्वनादिकं विहाय अधिकगुणव
त्तामेव शिरसि बिभर्तीति भावः लोके अपि अतिगुणवतो हीरकस्य मस्तकधारणं प्रसिद्धमेव १२ ७

इदानींउन्मत्तादिभिरपिविनिंद्यानिपरिहार्याणि अवाच्यानियानिपापानितन्नाशिनीत्वमेवेत्याह विनिंद्या
नीति भोगंगेउन्मत्तैरविचारकारिभिः विशेषेणनिंद्यानिनिंदितुंयोग्यानि अपिच पतितैरपिप्रायश्चित्तादि
भिः परिहार्याणित्याज्यानि व्रात्यैः गर्भाधानादिसंस्कारहीनैः व्रात्यः संस्कारहीनः स्यादित्यमरः अव
च्यानिवक्तुमयोग्यानि पिशुनैः कर्णेजपैः कर्णेजपः सूचकः स्यात्पिशुनोदुर्जनः खलइत्यमरः सपुलकं र

विनिंद्यान्युन्मत्तैरपिचपरिहार्याणिपतितैरवाच्यानिव्रात्यैः सपुलकमपास्यानिपिशुनैः हरंती
लोकानामनवरतमेनांसिकियतांकदाप्यश्रांतात्वंजगतिपुनरेकाविजयसे १३ रोमांचंयथास्यात्त

थाअपास्यानित्याज्यानि एतादृशानि कियतां किंपरिमाणमेषांतेकियंतः तेषां किमः संख्यापरिमाणेडति
तिषतुग्‍ किमिदंभ्यांवोघः बहूनामित्यर्थः लोकानामेनांसियंत्यधोएभिस्तानि यंति गच्छंतिप्रायश्चित्ता
नायातानि एनांसि कलुषाणि इण् आगसीत्यसुण् कलुषंवृजिनैनोघमित्यमरः हरंतीनाशयंती एका
कदापिकस्मिन्नपिकालेश्रांता अखिन्ना एतादृशी त्वंजगति विश्वस्मिन् विजयसे सर्वोत्कर्षेणव

लोकेकश्चन कदाचित् एवंकार्यं यदिकरोतितदाश्रांतोभवति बहुभिर्वाएकं महत्कार्यंकृतंचेत् सर्वेश्रांताः भवंति त्वंतु अस हायाद्वितीयासर्वेषां पापानिनिरंतरंहरंत्यपिनश्रांतेतिममापिपापंदूरीकरिष्यस्येवेतिभावः १३
इदानींतवगुणानामेवायंदोषः यत्पृथ्वीतले शोकनाशायस्वर्लोकात्पतंत्यास्तवनिर्लोभोपिशिवः कपर्दस्यापि नमिषेणप्रतिग्रहंचकारेत्याह स्खलंतीति भोभागीरथि अवनितलशोकापन्हतये अवन्याः पृथिव्याः तलं

स्खलंतीस्वर्लोकादवनितलशोकापन्हतयेजटाजूटग्रंथौयदसिविनिबद्धापुरभिदा अयेनि र्लोभानामपिमनसिलोभंजनयतांगुणानामेवायंतवजननिदोषः परिणतः १४

स्वरूपं अधः स्वरूपयो रस्त्रीतलमित्यमरः तत्रयःशोकः तत्रापन्हतिर्नाशः तस्यैवअपन्हतिंकर्तुमित्यर्थः स्वर्लोकात् स्खलंतीपतंतीत्वं पु रभिदाशिवेनजटाजूटग्रंथौ जटाजूटस्यकपर्दस्यग्रंथिः तत्रयत्वंविनिबद्धाविशेषेणनिरंतरंबद्धासि उपसर्गद्वयं क दापि अन्यत्रगमनाभावंबोधयति अयेजननि निर्लोभानामपि निर्गतः लोभोयेषांतेषामपिमनसिचित्ते लोभं इच्छांजनयतांकुर्वतां तवगुणानामेवदयादाक्षिण्यादीनामेवायंदोषः परिणतः प्रसृतः निर्लोभिनयाकदाप्यप्र

395

निग्रहकर्ताशिवः नवग्रुणा लोभवशेनैवअपूर्वप्रतिग्रहं चकारेतिभावः १४ इदानींसर्वेषांरक्षणक्षमंपरमौ
षधंत्वमसीत्याह जडानिति भो अंब इह कलौ जडान् अज्ञान् क्रियासुमंदानित्यर्थः जडोज्ञइत्यमरः अं
धान् चक्षुरिंद्रियहीनान् पंगून् पादगतिहीनान् प्रकृतिबधिरान् प्रकृत्यास्वभावेनबधिरान् श्रोत्रेंद्रियही
नान् शब्दश्रवणासमर्थानित्यर्थः उक्तिविकलान् उक्तिभिर्वचनैर्विकलाःहीनाःतान् पूर्वसदृशेतिसमासः
व्याहारउक्तिर्लपितंभाषितंवचनंवचइत्यमरः वचधातोःक्तिनिवचिस्वपीतिसंप्रसारणं ग्रहग्रस्तान् ग्रहैः

जडानंधान्पंगून्प्रकृतिबधिरानुक्तिविकलान्ग्रहग्रस्तानस्ताखिलदुरितनिस्तार
सरणीन्

सूर्यादिनवग्रहैर्ग्रस्ताःकवलिताः कृतपीडाइतियावत् तदुक्तंज्योतिःशास्त्रे स्वर्क्षो
च्चंद्रबलाद्धिस्वारिशुभप्रभाःसप्ताद्यगोब्जःपुनश्चाद्यनाद्ययधर्ममृत्युषुकविःस्वास्तत्रिकोणेगुरुः सौम्योच्चं
त्यसमेः खिलाभ्रवगताःशस्कुंनवेषुद्दिगश्चंद्राथौनिजभाद्भक्षंनवत्तंतत्र्यक्षीषुशेषंनसदिति अस्ताखिल

दुरितनिस्तारसरणीन् अखिलानिचतानिदुरितानिचपापानितेषांनिस्तारणंनाशनम् तस्यसरणिःमार्ग

श्चित्ताद्याचरणमार्गः अस्ता ऽविद्यमाना अखिलदुरितनिस्तारसरणिर्येषां ते तान् पापबाहुल्येन अविद्यमानप्रायश्चि
त्तादीनित्यर्थः निर्लिंपैर्देवैः अनुपसर्गाल्लिंपेति सूत्रस्थेन नौलिंपेः संज्ञायामिति वार्तिकेन शः मुक्तान् स्वहस्तेन परि
त्राणाभावात् अपि च निरयांतर्निरयस्य नरकस्य अंतर्मध्ये स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियामित्यमरः
निपततः नितरां पतनं निते निपततः तान् एतादृशान् नरान् मनुष्यान् त्रातुं त्वं परमं उत्कृष्टं भेषजं औषधमसि भेष
जौषधभेषज्यानीत्यमरः एवं च सर्वभेषजं त्वं सर्वांतर्गतस्य ममापि भेषजं भविष्यस्येवेति भावः १५ इदानीं क

निर्लिंपैर्निर्मुक्ता न पि च निरयांतर्निपततो नरानं बत्रातुं त्वमिह परमं भेषजमसि १५ स्वभावस्वच्छा
नांसहजशिशिरायामयसणामपारस्तेमानर्जयंति महिमा कोऽपि जगति॥ पिलसुनिनिर्दग्धाः त्वत्संबं
धवशात् स्वर्गे दिव्यदेहधारिणः सगरजाः सगरपुत्राः अद्यापि तव महिमानं अहो धन्या जाह्नवी निधनं गता अ
पि सर्यं यत्संगवशादीदृशा जाता इत्याकारकं गायंतीत्याह स्वभावेति भो मातः स्वभावस्वच्छानां स्वभावेन निस
र्गेण न तु कृत्रिमेण स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुरित्यमरः स्वच्छानां निर्मलानां सहजमनायासेन मणि

कायसंक्षेपेण शिशिराणांशीतलानां उक्तंच कालिदासेन शैत्यंहियत्सामकृतिर्जलस्येति एतादृशीनांते अपांवा
राम् आपः स्त्रीभूम्निवार्वारिइत्यमरः अपारः अमर्यादः अयंकोपिविलक्षणोमहिमामाहात्म्यं जगतिजयतिस
र्वोत्कर्षेणवर्तते सगरजाः सगरराजपुत्राः अनवद्यकृतिभृत :संतः न अवद्यागर्ह्या अनवद्यास्तत्या अवद्यपण्ये
तिसूत्रेण गर्हायां अवद्येतिनिपातितम् तादृशीचासौकृतिश्चतांबिभ्रतितेते एतादृशाःसंतः अतएवस्फुटपुलक
सांद्राःसंतःस्फुटाः प्रकटाः येपुलकाः रोमांचाः तैः सांद्राः निबिडाःसंतः महिमानं अद्यापिमुदागीत्यागायंतिव

मुदायंगायंतिद्युतलमनवद्यकृतिभृतःसमासाद्याद्यापिस्फुटपुलकसांद्राःसगरजाः१६

दंतीत्यर्थः किंकृत्वा द्युतलंदिवस्तलम् दिवउर्दित्युत् द्योदिवौद्वेस्त्रियामित्यमरः समासाद्य अधिष्ठित्यसगरेण
हि अश्वमेधकरणायअश्वोविनिर्मुक्तः तत्संरक्षणायस्वपुत्राः नियुक्ताः स अश्वः इंद्रेणचौर्येणपातालेनी
तः सगरपुत्राः अपितदानयनायतत्रगताः तेसर्वेकपिलेननिर्दग्धाः पश्चात् भगीरथेनस्वर्गात् गंगामानीय
जीविताइति स्पष्टंरामायणादौ १६ इदानींस्वल्पपापिनांदोषापनुत्तयेऽभिजगतिगोदावर्यादीनिबहूनितीं

र्थानिसंति अतीतप्रायश्चित्तानांतुदोषहरणेत्वत्सदृशीत्वमेवसमर्थेत्याह कृतेति भोजननिकृतक्षुद्रैनस्कान्
कृतानिक्षुद्राणिअल्पानिपलांडुभक्षणादीनिएनांसिपापानियैस्तेतान् शेषाद्विभाषेतिकप् अथपापाचरणानंत
रंझटितिशीघ्रंसंततसमनसः संततंसंपश्चात्तापयुक्तंमनोयेषांते तान् एतादृशान् नरान् समुद्धर्तुं आचरितपापात् दूरी
कर्तुं त्रिभुवनतले त्रयाणांभुवनानांसमाहारस्त्रिभुवनं तद्धितार्थेतिसमाहारेद्विगुः पात्रादित्वात्स्त्रीत्वाभावः
तस्यतलं तत्रतीर्थनिवहाः तीर्थानांगोदावर्यादितीर्थानांनिवहाःसमूहाः संतिवर्तंते भोजननिप्रायश्चित्तप्रसर

कृतक्षुद्रैनस्कानथझटितिसंततसमनसःसमुद्धर्तुंसंतित्रिभुवनतलेतीर्थनिवहाः णपथातीतचरितान्

प्रायश्चित्तस्यपापनाशनसमर्थधर्मविशेषस्यप्रसरणमाचरणंतस्यपंथामार्गः वादः पंथाश्चमार्गश्चेतित्रिकांडमंड
नः ऋक्पूरब्धेतिसमासांतोअप्रत्ययः प्रायश्चित्तप्रसरणपथान् अतीतं अत्यंतंगतंचरितंयेषांते तानपि बहुका
लं बुद्धिपूर्वकंमहत्पापाचरणेन अविद्यमानप्रायश्चित्तानपीत्यर्थः उक्तंचसुङ्गलाचार्यैः स्कृतिनिईषत्पापे प्रायश्चि
त्तंरघूत्तमप्रोक्तम् अपयातिमासुदीक्ष्यप्रायस्तदपीहगौरिवव्याघ्रमिति एतादृशानपिनरान्दूरीकर्तुंआचरितपा

पादुद्धर्त्तुं त्वमिवत्वत्सदृशीत्वमेवविजयसे अत्रोपमानोपमेयत्वंगंगायाएव तत्फलंतु अन्यात्वत्सदृशीनास्ती
ति अतएवात्रानन्वयालंकारः तदुक्तम् उपमानोपमेयत्वंयदेकस्यैववस्तुनः इंदुरिंदुरिवश्रीमानित्यादौतदन
न्वयइति प्रायश्चित्तशब्दे प्रायस्यचित्तिचित्तयोरितिपारस्करगणपठितसूत्रेणसुटिनिष्पन्नः सचरूढ्यायोगेन
चपापनाशनसमर्थेविशेषधर्मेमाचष्टे प्रायश्चित्तशब्दश्चायंपापक्षयार्थेनैमित्तिके कर्मविशेषेरूढइत्याहुःसंप्र
दायविदोनिबंधकारादयः योगस्त्वांगिरसादर्शितः प्रायोनामतपः प्रोक्तंचित्तंनिश्चयउच्यते तपोनिश्चयसंयुक्तं

अपिप्रायश्चित्तप्रसरणपथातीतचरितान्नरान्दूरीकर्तुंत्वमिवजननित्वंविजयसे १७
निधानंधर्माणांकिमपिचविधानंनवमुदांप्रधानंतीर्थानाममलपरिधानंत्रिजगतः ॥

प्रायश्चित्तंतदुच्यते अस्यार्थः अनुष्ठितेनद्वादशवार्षिकादिना अवश्यंपापंनिव र्ततइतिविश्वासोनिश्चयः तेनसं
युक्तंव्रतानुष्ठानलक्षणं तपः प्रायश्चित्तमित्यलंविस्तरेण १७ इदानीमनेकगुणविशिष्टत्वेन पापहरणक्षमंनवव
पुर्मेमपापंनाशयतुइतिप्रार्थयते निधानमिति भोजननि धर्माणांवेदेनप्रयोजनमुद्दिश्यविधीयमानार्थानां तदुक्तं
जैमिनिना चोदनालक्षणार्थोधर्मस्तेषांनिधानंस्थानंनिधीयतेस्थाप्यतेयस्मिन्नितिधाधातोः करणाधिकरणयोश्च

तिल्युट् चपुनः नवसुदांनवाम्भुता: सुदम्भुतासांनूतनहर्षाणांकिमपिविधानंजनकं गंगादर्शनेनधिलक्षणाहर्षाजा
यंतेइत्यनुभवसिद्धं कर्तृकर्मणोरिति कर्मणिषष्ठीउभयप्राप्तचपुनः तीर्थानांप्रधानं चपुनः त्रिजगतः त्रयाणांजगतां
समाहारः त्रिजगत् तस्यतद्धितार्थेतिसमाहारेद्विगुः अमलपरिधानं अमलंनिर्मलंचतत्परिधानंचामलपरिधा
नं अधोंशुकं अंतरीयोपसंव्यानपरिधानान्यधोंशुकइत्यमरः यथालोकेकस्यचिद्वसनहीनस्यनशोभात
थाएतद्विनात्रिजगतीत्याकूतं चपुनःबुद्धेर्मनीषायाः बुद्धिर्मनीषाधिषणाधीः प्रज्ञाशेमुषीमतिरित्यमरःसमा

समाधानंबुद्धेरथरवस्तुतिरोधानमधियांश्रियामाधानंनः परिहरतुतापंतववपुः १८

धानंनानादुष्टकल्पनानाशकमित्यर्थः अथानंतरम् अधियांनिर्बुद्धीनांतिरोधानं अपिधानं तेषामदृश्यमिति
भावः अपिधानतिरोधानपिधानाच्छादनानिचेत्यमरः अथश्रियांलक्ष्म्यामाधानंस्थापकम् मोक्षादिलक्ष्मीसंपा
दकमित्यर्थःएतादृशगुणविशिष्टंतववपुःशरीरंगात्रंवपुः संहननंशरीरमित्यमरःनःअस्माकंतापंपरिहरतु १८

५०१

इदानींकार्यासक्तत्वात् तवविद्योगेजातः अयंममैवापराधइत्याह पुरइति भोमातः मातृत्वेनापराधः सोढ
व्यइत्याकूतं एवंममैवएषनिश्चयार्थः मंतुः अपराधः अस्तीतिशेषः कोसावित्याकांक्षायामाह इहलोके तवविद्यो
गः स्नानाद्यसंबंधः यत् अभूत् अतः कारणात् क्षणमपिक्षणमात्रमपिकरुणाद्रयात्वयामयिकर्तव्येतिशेषःका
रुण्यंकरुणाघृणेत्यमरः अपराधभवनेमूलमाह कथंभूतस्यममद्रविणमदिराघूर्णितदृशांद्रविणमेवमदिरा

पुरोधावंधावंद्रविणमदिराघूर्णितदृशांमहीपानांनानातरुणतरखेदस्यनियतम्

उन्मादकारित्वात् यद्वा द्रविणंचमदिराचताभ्यांघूर्णिते घूर्णनयुक्तेभ्रमितइत्यर्थः तादृश्योदृशोयेषांते दृक्दृ
ष्टीचेत्यमरः नानाअनेकेषांअव्ययत्वात् षष्ठ्यालुक् एतादृशानांमहीपानांमहीं पांतितेमहीपाः राजानःते
षां अग्रेनियतमेव धावंधावंधावित्वाधावित्वा धावुगतिशुद्ध्योरितिधातोराभीक्ष्ण्येणमुलच्चेति णमुलिद्वि
त्वं तरुणतरखेदस्य अतिशयेनतरुणः तरुणतरः तादृशः खेदः श्रमोयस्यतस्य यद्वानानातरुणतरखेदस्ये

त्येकं पदम् नाना अनेकविषयः तरुणतरः खेदोयस्य पुनः कथंभूतस्य स्वहितशतहंतुः स्वस्यैवहितानिपथ्या
नितेषांशतं तस्यहंतानाशकः तस्य अतएवपुनः कथंभूतस्यजडधियः जडाधीर्यस्यतस्य १९ पूर्वंदयाविधेयेत्यु
क्तं इदानींकिंविषयिणीदयेत्याकांक्षायांतवजलंममपुनः भवनमेवदूरीकरोतुइतिप्रार्थयते मरुदिति भोमा
तः तेतवजलंममजगन्नाथस्यजननजालंजननस्यजन्मनः जनुर्जननजन्मानीत्यमरः तस्यजालंसमूहः तत्र जालं
समूह अनायइत्यमरः जरयतुनाशयतु जृवयोहानौस्वार्थेणिजंतः जनीजृष्षद्दीतामित्वेमितांन्हस्वइत्युपधा न्हस्वःक

मम्मेवायंमंतुःस्वहितशतहंतुर्जडधियोवियोगस्तेमातर्यदिहकरुणालःक्षणमपि १९ मरुल्लीला
लोलल्लहरिलुलितांभोजपटलीस्खलत्पांसुव्रातच्छुरणविसरत्कौंकमरुचि

थंभूतंजलं मरुल्लीलालोलल्लहरिलुलितांभोजपटली स्खलत्पांसुव्रातच्छुरणविसरत्कौंकुमरुचि
मरुतः वायोः लीलाविलासः तेनलोलंत्यश्चंचला यालहर्यः वीचयः ताभिः लुलितानिलोलानियानि अंभोजानि
कमलानितेषांपटलीसमूहः तस्याः स्खलंतः पतंतोयेपांसवः रजांसितेषां व्रातः समूहः तस्यच्छुरणंअंगलेपः तेन
विसरंतीप्रसरणशीलातादृशीकौंकुमरुचिर्दीप्तिर्यस्यतत् कमलरजः पतनेनात्यंतमारक्तमितिभावः पु० सुरस्त्री

वक्षोजक्षरदगरुजंबालजटिलंस्फराणामिंद्रादिदेवानांस्त्रियः इंद्राण्यादयः तासांवक्षोजाः स्तनाः तेभ्यः क्षरन्
पतन्नयः अगरुजंबालः कृष्णचंदनपंकः वंशकागरुराजार्हेत्यमरः निषद्वरस्तुजंबालः पंकोस्त्रीत्यमरः तेनजटि
लंसंजटंजटाशब्दात्तुदादित्वादिलच् पुं॰ जंबालंजंबालः पंकः अस्तियस्मिन्तत् यद्वाजंबालः शैवालं अस्तिय
स्मिन् यद्वा जंबालाः सदनद्रुमाः धत्तूरवृक्षाइत्यर्थः तेसंत्यस्मिन्तत् तथाचकोशः जंबालः शैवले पंकेजगले मदन

सुरस्त्रीवक्षोजक्षरदगरुजंबालजटिलंजलंतेजंबालंममजननजालंजरयतु २॰ समुत्पत्तिःप
द्मारमणपदपद्मामलनखान्निवासः कंदर्पप्रतिभटजटाजूटभवने

द्रुमइतिपक्षचयेपिजंबालशब्दान्म
त्वर्थीयो अर्शआद्यच्मरुल्लीलालोलल्लहरीत्यन्नसंहितायांतोर्लीतिलः कौंकुमरुच्योः समासंकृत्वा पश्चाद्विसरं
तीशब्देनसमासेपुंवद्भावःतालव्याअपिदंत्याश्चशंबुसूकरपांसवःइतिद्विरूपकोशात्तालव्यापिपांशुशब्दः २॰ इदानींसमुत्पत्तिस्था
ननिवासस्थानव्यापारसौष्ठवेनजगदपेक्षयातवउत्कर्षोवर्ततइति आह समुत्पत्तिरिति भोजननि जगतः विश्वस्मा
त्तवोत्कर्षः आधिक्यं कस्माद्धेतो र्नजागर्तुनास्ताम् अपितु सर्वस्माद्धेतोरुत्कर्षोवर्ततइत्यर्थःउत्कर्षप्रतिपादक

हेतूनाह समुत्पत्तिरिति तवसमुत्पत्तिः सम्यगुत्पत्तिः उद्भवः पद्मारमणपदपद्मामलनखात् पद्मायाः लक्ष्म्याः लक्ष्मीः पद्मालयापद्मेत्यमरः रमणः पतिः विष्णुः तस्य पदं चरणकमलं तस्यामलनखः तस्माद्भवतिजनिकर्तुरित्यपादानत्वम् तवनिवासःस्थितिः कंदर्पप्रतिभटजटाजूटभवने कंदर्पस्यानंगस्य कंदर्पोदर्पकोनंगइत्यमरः प्रतिभटः प्रतिपक्षीशिवः तस्यजटाजूटः कपर्दः सएवभवनंगृहं तत्रवर्ततइतिशेषः अथानंतरं तवायंव्यासंगः उ

अथायंव्यासंगोहतपतितनिस्तारणविधौनकस्मादुत्कर्षस्तवजननिजागर्तिजगति २१ नगेभ्योयांतीनांकथयतटिनीनांकतमयापुराणांसंहर्तुः सुरधुनिकपर्दोधिरुरुहे॥

योगः हतपतितनिस्तारणविधौ हताः शत्रुभिः शस्त्रादिनामारिताः पापश्चित्तिनः तेषांनिस्तारणंउद्धारः तस्याविधिः करणंतत्रवर्ततइतिशेषः विधिर्विधानेदैवेचेत्यमरः २१ इदानींहरशिरसिनिवसंत्याः विष्णुपदोद्भूतायाः तवोपमेयाकापिनंदीनास्तीत्याह नगेभ्यइति भोजननि कविभिः पंडितैः संख्यावान्पंडितः कविरित्यमरः तवतुलालेशः तुलायाः उपमायाः लेशः लवः लवलेशकणाणवइत्यमरः यस्यांदीयेत तादृशीकापवर्तते अपितुनकापीत्यर्थः नत्तुकृष्णादयोवह्वोव

तेनेइतिचेत्तत्राह नगेभ्यइति नगेभ्यः पर्वतेभ्यः नगोप्राणिष्वन्यतरस्यामितिपाक्षिकप्रतिभान्नञोनलोपाभावः यांतीनामागच्छंतीनांमध्येयतश्चनिर्धारणमितिषष्ठी कतमयातटिन्याधुराणांनगरणांसंहर्तुर्दाहकस्याशिव स्यकपर्दःजटाजूटः अधिरुरुहे अध्यारूढः नगेभ्योयांतीनांतटिनीनांमध्येकयावातटिन्याश्रीभर्तुःविष्णोःपद कमलंचरणपंकजंसलिलैः अक्षालिधौतमितित्वंकथय अर्थात् अस्मान्प्रतिवद एवंच तत्कार्यकारणाभावात्

कयाचश्रीभर्तुःपदकमलमक्षालिसलिलैस्तुलालेशोयस्यांनवजननिदीयेतकविभिः२२विध तांनिःशंकंनिरवधिसमाधिंविधिरहोसुखंशेषेशेतांहरिरविरतंनृत्यतुहरः॥

काप्युपमेयानेतिभावः

इदमेवमनसिनिधायत्वामहंशरणंगतइत्याकूतं अक्षालीत्यत्रचिण्भावकर्मणोरिति कर्मणिचिण् आदौपूर्वार्द्धं योजयित्वा पश्चादुत्तरार्द्धंयोज्यम् २२ इदानीमेवंजननिमनोरथदायिनित्वयिसत्यांब्रह्मादीनांप्रयोजनमेवनास्ती त्याह विधत्तामिति भोजननि जनयतिविश्वमुत्पादयतिइति जननीविश्वमाता तत्संबोधनं जगतिविश्वस्मि न् कामानांमनोरथानांकर्मणिषष्ठी सवित्रीउत्पादयित्रीयदिजननीविश्वमाता त्वंजागर्तिअस्तितर्हिविधिः

विदधाति विश्वमितिविधिः ब्रह्माविधात्रोर्वेधचेतिवेधादेशोऽसिप्रत्ययश्च निरवधिसमाधिंनिर्गतः अवधि र्यामादिरूपामर्यादायस्यताहृशोयः समाधिः चित्तहृत्तिनिरोधस्तंनिःशंकंनिर्गताशंकायस्मिन् कर्मणियथा भवति तथा मयिनिर्व्यापारेजगदुत्पत्तिः कथंभविष्यतीतिशंकारहितमित्यर्थःविधत्तांकरोतु हरिः हरतिसर्वे षांदुःखमितिहरिः अचइरित्यौणादिकोइःशेषेस्फुरवंयथास्यात्तथाशेतानाम् निद्रांकरोतु सुखमित्यनेननिद्राभं गजनकः जगद्रक्षणरूपोपाधिः मास्त्वितिसूचितम् हरः हरतिविश्वमितिहरः पचाद्यच् शिवः अविरतंनिरं

कृतंप्रायश्चित्तैरलमथतपोदानयजनैः सवित्रीकामानांयदिजगतिजागर्तिभवति २३

तरंयथास्यात्तथानृत्यतुनृत्यंकरोतु अविरतमित्यनेनमध्येकार्यांतरचित्ततयानृत्यविरामोमास्त्वितिसूचितं प्रा यश्चित्तैः कृतंस्यहस्तेनशुद्धिकरणाभावात्तानिव्यर्थानीतिभावः अथानंतरं तपोदानयजनैः तपांसिकृच्छ्रचां द्रायणादीनि दानानिगजाश्वादीनियजनानिदेवपूजायागादीनितैरलम् तैःसाध्यंनास्तीतिभावः गम्यमानक्रि यांप्रतिकारकत्वात्तृतीया अहोइत्याश्चर्ये अनेकेषांकार्यमेकैवत्वंकरोषीत्याश्चर्यम् २३ ७ ७

इदानीं अनाथइत्यादिविशेषयुक्तोहं स्नेहार्द्रामित्यादिविशेषणयुक्तां त्वां प्राप्तोस्मि अतस्त्वं स्वमहत्त्वयोग्यं कुर्विस्वाह अनाथइति भोगंगे अयमस्य शिशुः श्यति दिने दिने कृशो भवतीति शिशुः शावकः शः किस्सन्वञ्वत्यादिसूत्रेण साधुः पृथुकः शावकः शिशुरित्यमरः मातरं जननीं त्वां प्राप्तोस्मि इह विषये त्वं समुचितं सम्यगुचितं योग्यं विदध्याः कुरु शरणागत त्राणं मां मातृत्वान्मात्यजोतिभावः कीदृशोहं कीदृशीं त्वां अनाथः दीनः स्वाम्यंतराभा

अनाथः स्नेहार्द्रां विगलितगतिः पुण्यगतिदां पतन्विश्वोद्धर्त्रीं गदविगलितः सिद्धभिषजं

ववानित्यर्थः स्नेहार्द्रां स्नेहेन प्रीत्या आर्द्रां क्लिन्नां आर्द्रं सार्द्रं क्लिन्नमित्यमर पुनः कीदृशोहं कीदृशीं त्वां विगलितगतिः विगलिता नष्टा गतिः गमनं यस्य सः यद्वा विगलिता पापबाहुल्येन नष्टा गतिः पुण्यलोके गतिः गमनं यस्य सः पुण्यगतिदां पुण्येषु गतिः तां ददातिसा तां यद्वा पुण्येषु पुण्यलोकेषु गतिदां पु॰ पतन् पतितः विश्वोद्धर्त्रीं उद्धारकर्त्रीं त्रिभुवनविधातुश्च कलहइतिवत् शेषषष्ठ्यासमासः एवंच विश्वांतर्गतस्य ममोद्धारं करि

रिष्यस्येवेतिभावः पु० मदविगलितः गदैः आतंकैः रोगैरित्यर्थः विगलितः विशेषेणगलितः जर्जरितः यक्ष्मांत
कगदाबाधाः शब्दाः पर्यायवाचकाइति सिद्धभिषजंसिद्धौषधदांसिद्धवैद्यरूपामित्यर्थः रोगहार्यगदंकारोभिष
क् वैद्योचिकित्सकइत्यमरः पु० तृष्णाकुलितहृदयः तृष्णयापिपासया आकुलितंव्याप्तंहृदयं यस्यसः स्व
धासिंधुंस्वधायाअमृतस्यसिंधुंसमुद्रं यद्वास्वधायाः सिंधुंदेशंयद्वास्वधायाः सिंधुंनदीं तथाचामरः देशेनद
विशेषेब्धौसिंधुर्नासरितिस्त्रियामिति अत्रपरिकरालंकारः साभिप्रायविशेषणानांसत्वात् तदुक्तंकुवलया

सुधासिंधुंतृष्णाकुलितहृदयोमातरमयंशिशुः संप्राप्तस्त्वामहमिहविदध्याः समुचितम् २४

विलीनोवैवस्वतनगरकोलाहलभरोगतादूतादूरंक्वचिदपिपरेतान्मृगयितुम्

तदे अलंकारः परिकरः

साभिप्रायेविशेषणइति २४ इदानींयदारभ्यतवकथाभूलोकमागतातदारभ्ययमनगरकोलाहलः शांतः तद्दूताअ
पिदूरदेशंगताः विमानसंघश्चदेववीथींविदलयतीत्याह विलीनइति भोजननियदवधियदारभ्यतेतवकल्याणीक
ल्याणकारिकाकथामहीमंडलमगात् इणोगालुङीतिगादेशोगातिस्थेतिसिचोलुक् तदारभ्यवैवस्वतनगरकोला

हलभरः वैवस्वतस्यांतकस्य वैवस्वतोंतकइत्यमरः नगरंपुरंतत्र कोलाहलभरः कलकलसमूहः कोलाहलःकलक
लइत्यमरः विलीनः विशेषेणलीनः गुप्तअभूदितिशेषः विशेषश्चकस्मि न्नपि कालेईषदपिनास्तीति पूर्वंतत्रपापि
गमनेनतेषांताडनात् कोलाहलःस्थितिः इदानींतुत्वत्कथाश्रवणमाहात्म्येनपापाभावात् कस्यापितत्रगमना
भावेनताडनाद्यभावादितिभावः दूताअपिअर्थात् यमसंदेशहारकाअपि स्यात्संदेशहरोदूतइत्यमरः क्वचिद्दे
शेपरेतान् शवान्मृगयितुं अन्वेषितुंदूरंगताः यस्मिन्देशेत्वत्कथाश्रवणंनास्तितत्रगताइत्यर्थः ननुयमनगर

विमानानांव्रातोविदलयतिवीथीर्दिविषदांकथातेकल्याणीयदवधिमहीमंडलमगात् २५

गमनाभावेत्वत्कथाश्रवणिनः केगच्छंतीतिचेत्तत्राह विमानानांविशिष्टंआनयंतियेते विगतंमानंवायेषांतेवि
मानाः व्योमयानानि व्योमयानंविमानोस्त्रीत्यमरः तेषांव्रातोनिकरः स्तोमौघनिकरव्रातेत्यमरः दिविषदांदिविसी
दंतितेदिविषदोदेवाः तेषांषद्लृविशरणगत्यवसादनेष्विनिधातोः सत्सूद्विषेतिक्विप् ह्रद्युभ्यांचेतिङेरलुक् सु
षामादित्वात् षत्वं वीथीः मार्गान् देवगमनमार्गानित्यर्थः विदलयति विशेषेणदलयति विदारयति त्वत्कथाश्र

वणामाहात्म्येनसर्वेषांविमानैर्गमनात् वारंवारंविमानसंबंधात् खनितानिव करोतीत्यर्थः २५ इदानींतवजल
कणाः कामक्रोधज नितज्वरदग्धशरीरिणामस्माकं संतापशमनं कुर्वीत्विति प्रार्थयन्ते स्फुरदिति दिव्यसरितः दि
विआकाशेभवादिव्या भवार्थेदिगादित्वाद्यत् स चासौसरिच्चतस्याःगंगायाःमरुदुल्लासलहरिछटाचंचत्पाथः
कणासरणयः मरुतः वायोरुल्लासः संबंधः गमनंवा लसस्संश्लेषणगमनयोरितिधातोर्भावेघञ् तेनयाल्हर्यः

स्फुरत्कामक्रोधप्रबलतरसंजातजटिलज्वरज्वालाजालज्वलितवपुषांनः प्रतिदिनं हरंतांसंता
पंकमपिमरुदुल्लासलहरीछटाश्चंचत्पाथःकणसरणयोदिव्यसरितः २६

तासांयाश्छटाः परंपराः ता
भिश्चंच त् उद्धत् यत्पाथः उदकं कबंधमुदकं पाथः इत्यमरः तस्यकणाःतुषाराः तेषांसरणयः पंक्तयः नः
अस्माकंकमपि औषधादिभिरसाध्यतया अपहर्तुमशक्यमपिसंतापंहरंतांनाशयंतु कथंभूतानांनः प्रतिदिनंदि
नेदिने इतिप्रतिदिनमव्ययंविभक्तीतिसूत्रेयोग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानीतिचत्वारोयथाशब्दार्थाः त
त्रवीप्सायांअव्ययीभावः स्फुरत्कामक्रोधप्रबलतरसंजातजटिलज्वरज्वालाजालज्वलितवपुषांकामोभिलाषः कामः पंच

शारः स्मृतइत्यमरः क्रोध अमर्षः कोपक्रोधामर्षरोषइत्यमरः स्फुरंतौदेदीप्यमानौचतौकामक्रोधौचताभ्यांप्रबलत
रमतिशयितंसंजातःउत्पन्नः अतएवजटिलःशिखावान् एतादृशोयोज्वरः तस्यज्वालाः अर्चयः तासांजालंसमूहः
तेनज्वलितंदग्धंतादृशंवपुः शरीरंयेषांतेषाम् २६ पूर्वंजलकणाः संतापंहरंतामित्युक्तम् इदानींतापबाहुल्यात्कणा
नांकथंतत्संभवतीतिचेत् नवजलानांसंघातः अस्माकंतापशमनंकरोत्विति प्रार्थयते इदमिति भोजननि श्री

इदंहिब्रह्मांडंसकलभुवनाभोगभवनंतरंगैर्यस्यांतर्लुठतिपरितस्तिंदुकमिव सएषश्रीकंठप्रवितत
जटाजूटजटिलोजलानांसंघातस्तवजननितापंहरतुनः २७

कंठप्रवितततजटाजूटजटिलः प्रविततः विस्तृतः
सचासौजटाजूटश्च श्रीकंठस्य प्रवितत जटाजूटः तेनजटिलः सजटः एतादृशः सएषः नवजलानांसंघातः समुदायः
नः अस्माकंतापंहरतु सकः यस्यजलानांसंघातस्यांतर्मध्ये सकलभुवनाभोगभवनम् सकलभुवनानांचतुर्दशभुव
नानां आसमंतात् भोगः सुखं भोगः सुखेस्त्र्यादिभृताविव्यमरः यद्वा सकलभुवनानांआभोगः परिपूर्णता आ
भोगः परिपूर्णतेत्यमरः तस्यभवनंगृहम् एतादृशमिदंब्रह्मांडंतरंगैःसह सहयुक्तेप्रधानेइतिसूत्रेणतृतीया प

रिनस्तिंदुकमिव तिंदुकस्यफलंतिंदुकम् तिंदुकः स्फूर्जकमित्यमरः तेंबुणीतिभाषायांप्रसिद्धिः लुठति लुठसंश्ले
षणे तुदादिः हीति आश्चर्ये यस्मिंश्चतुर्दशभुवनाधारब्रह्मांडमपिस्थितं सोपिशिवकपर्देस्थितइत्याश्चर्यम् अ
त्रोत्तरोत्तरमुत्कर्षस्यसत्त्वात् सारालंकारः तदुक्तं अप्पय्यदीक्षितैः कुवलयानंदे उत्तरोत्तरमुत्कर्षः सारइत्य
भिधीयतइति २७ इदानींननुरे तीर्थांतराणिशिवादिदेवांश्चविहायमामेवकीं स्तोषीतिचेत्तीर्थानिमदुद्धरण
विधौ लज्जंते शिवादयश्चकर्णेहस्तंस्थापयंति तंतुभावत्वेनदययामांपुनानानेषांपापनाशनाभिमानंनाश

त्रपंतेतीर्थानित्वरितमिह यस्योद्धृतिविधौकरंकर्णेकुर्वंत्यपिकिलकपालिप्रभृतयः॥

यसीत्याह त्रपंतइति भोअनुकंपार्द्रहृदये अंब अनुकंपादयातया आर्द्रंहृदयंयस्याः सातत्संबोधनं एतादृ
शि अंबजननि अंबत्वेनत्यागानर्हता तं इमंतवसमीपे वर्त्तमानंमांजगन्नाथंपुनानापुनाति तच्छीला ताच्छील्येशा
नच् पवित्रीकुर्वाणाइयंत्वंतेषांतीर्थादीनां अघमथनदर्पं अघस्यपापस्यमथनंनाशनंतस्यदर्पःगर्वःतंदलयसि
विदारयसिनाशयसीत्यर्थः एतावत्कालपर्यंतंतेषांपरमगर्वःस्थितः वयंसर्वेषांपापनाशनं कुर्मः इदानींतु ममप

रमपातकिनः तद्धस्तेन उद्धारणाभावात् त्वया उद्धारणस्य कृतत्वात् तेषां गर्वो गत इति भावः ननु तेषां हस्तेन किमित्युद्धरणं न भवतीति चेत्तत्राह तं कम् इह यस्य उद्धृतिविधौ उद्धृतेः विधिः करणं तत्र विधिर्विधाने दैवे चेत्यमरः तीर्थानि गोदावर्यादीनि त्वरितं यथास्यात्तथा महापातकिनो मम दर्शनसमय एवेति भावः त्रपन्ते लज्जितानि भवन्ति स्वहस्तेन महापातकिनो मम उद्धारणाभावाल्लज्जेति भावः पुनस्तं कम् यस्योद्धारणविधौ कपालिप्रभृतयोपि कपालीप्रभृतिः

इमं तं मामं वत्समियमनुकंपार्द्रहृदये
पुनाना सर्वेषामघमथनदर्पं दलयसि २८

आदिर्येषां ते विष्ण्वादयोपि कर्णे हस्तं कुर्वंति स्थापयंतीत्यर्थः स्वहस्तेन एतस्योद्धृत्यभावात् एतस्य किमपि न श्रोतव्यमित्याशयेन कर्णे हस्तन्यास इति भावः करं कर्णे इत्येकवचनं तु द्वितीयकर्णेन श्रोतव्यम् यदि स्वहस्तेन एतदीयं कार्यं भविष्यति चेत्करिष्यामः नो चेन्नेत्येतदर्थबोधनाय २८

414

इदानीं अपरिमित संशयेन पापाचरणेनिवृत्तेश्चांडालानांसमूहेरपित्यक्तानांपापानामाकरैः पुनातुंयत्नंकुर्वं
त्यास्तवस्तुनिंकर्तुं नरपशुरहं कथंशक्नुयामित्यहंकारपरिहरणव्याजेनाह श्वपाकानामिति भोजननि मामुद्ध
र्तुंपरिकरं कटिबंधंविवेकमारंभं यत्नंवा मृगादृगान्नेक बंधेविवेकारंभयोरितिविश्वः यत्नारंभोपरिकरावित
िकांडशेषः घटयंत्याः कुर्वत्यास्तवश्लाघांस्तर्तिं कर्तुंनरपशुरिवेति व्याघ्रादित्वात्समासः सर्वानविशे
षेणपश्यतीतिपशुः हिताहितज्ञानशून्यः मूर्खइतियावत् एतादृशोहंकथमिवकेनापिप्रकारेणसमर्थः

श्वपाकानांव्रातैरमितविचिकित्साविचलितैर्विमुक्तानामेकंकिलसदनमेनःपरिषदां ॥

अपितुनकथमपीत्यर्थः मन्मतिमांद्यात्तवगुणानामपारत्वाच्चेतिभावः अहोइत्याश्चर्ये परमपातकिनंमां
पुनातुंयत्नादिकंकरोषीत्याश्चर्यम् कथंभूतंमाम् अमितविचिकित्साविचलितैः अमिता अपरिमिता बह्वी
त्यर्थः साचासौविचिकित्साचइतः परंपातकानिकर्तव्यानिवानवेत्याकारःसंशयः विचिकित्सातुसंशय
इत्यमरः यद्वा विचिकित्साजुगुप्साख्योवीभत्सरसस्थायीभावः कितसंशयइति धातोर्गुप्तिज् किद्भ्य

इति सनिसन्यङोरितिद्वित्वेगुरोश्चहल इत्यप्रत्ययेटाप् अमितांविचिकित्सायाश्चालितैः पातकान्निहन्नैःएता
दृशैः श्वपाकानांश्वानंपचंतितेश्वपाकाः चांडालाः यद्यपिपचादिगुणेश्वपचेति अजंतेनिपातितम् तथापि
न्यङ्क्वादिगणेश्वपाकशब्दस्यपाठात् पक्षेकर्मण्यणिकुत्वम् निषादश्वपचावंते वासिचांडालपुल्कसाइत्यम
रः तेषांव्रातैः समूहैः नवैकेनद्वाभ्यां वाविमुक्तानांविशेषेणमुक्तानांविशेषश्चमनः पूर्वकत्यक्तानांनतुलोकल

अहोमामुद्धर्तुंजननिघटयंत्याः परिकरं नवश्लाघांकर्तुंकथमिवसमर्थोनरपशुः २९ नकोप्येता
वंतंखलुसमयमारभ्यमिलितोयदुद्धारादाराद्भवतिजगतोविस्मयभरः॥

ज्जयेति एतादृशीनामेनःप
रिषदांएनसांपापानांपरिषदः सभाः समूहाइत्यर्थः तासामेकं अद्वितीयंसदनंगृहंकिलनिश्चयेन प्रसिद्धौवा
आश्चर्येवा एतादृशमपिपापिनंमांपुनातुंउत्कंठितासीत्याश्चर्यम् २९ इदानींकस्यचिन्महापातकिनः समुद्धरणेमज
गतः आश्चर्यसंपादनीयमितितवमहतीच्छास्थितासाएतावत्कालपर्यंतंतादृशस्यकस्यचित्पातकिनः अभावा
न्नैवपूर्णा अहंतुतादृशेच्छांसफलीकर्तुंप्राप्तोस्मि अतः ममोद्धरणेनस्वेच्छासाफल्यंकुर्विति प्रार्थयते नेतिभो

416

अंब एतावंतं समयमारभ्य एतावत्कालपर्यंतं कोपि कश्चन पातकी नामिलितः न प्राप्तः मयेति शेषः आरात् यद्दु दूरात् यस्योद्धारस्तस्मात् जगतः विस्मयप्रदः भवतीति ते मनसि चिरकालं बहुकालं स्थितवती तिष्ठतीति स्थितवती तामिमां पूर्वोक्तामीहामिच्छां सफलयितुं असफला सफला भवति तथा कर्तुम् भृशादित्वात् क्यङ्मानिनोश्चेति पुंस्त्वम् तुमुन् अयमहं जगन्नाथः संप्राप्तः अस्मीति शेषः नः अस्मान् प्रणयपापी निर

इतीमामीहां ते मनसि चिरकालं स्थितवतीमयं संप्राप्तोहं सफलयितुमंब प्रणायनः ३० श्ववृत्ति व्यासंगो नियतमथ मिथ्याप्रलपनं कुतर्केष्वभ्यासः सततपरपैशून्यमननम् ॥

स्योत्तमां गतिं नयेत्यर्थः उपसर्गादसमासेपीति णत्वम् अंबेत्यनेन तव जननीत्वं चेदहं तव पुत्रः एवं च मातुरिच्छा सत्पुत्रेण मया सफली कर्तव्येति सत्पुत्रधर्म एवायमिति सूचितम् ३० इदानीं ममानेकदुष्टगुणान् श्रुत्वा त्वां विना अन्यः कश्चन ममसु खनिरीक्षणमपि न कुर्यादित्याह श्ववृत्तीति भो मातः श्ववृत्तिव्यासंगः शुनः वृत्तिः इतस्ततो भ्रमणं उच्छि ष्टभक्षणाचरणादि तद्व्यासंगः उद्योगः मया कृत इति शेषः अथानंतरं नियतं नियमेन मिथ्याप्रलपनं अस

स्यानर्थकमपि भाषणं कृतं मलापोनर्थकं वच इत्यमरः परमपुण्यशीलेन युधिष्ठिरेणासकृन्मिथ्योक्तमितितज्ज
न्यपापवशादंतरिक्षगस्तद्रथः भूमौलग्नइतिस्पष्टं महाभारते मयातुसत्यत्यागपूर्वकं सर्वदैवतत्कृतमितिमत्पाप
संख्यैवनेति आकृतम् कुतर्केषुकुत्सितानां परस्त्रीगमनपरगृहहारादिरूपकर्मणां तर्काः ऊहाः तेषु यद्वाकुत्सि
ताश्चतेतर्काश्चतेषु यद्वा साक्षाद्ब्रह्मविद्याया अप्रतिपादकत्वे नपरजयेच्छयाच कुत्सितास्तर्काः तर्कशास्त्र
ग्रंथाः तेषु अभ्यासोपिकृतः सततपरपैशून्यमननमपिकृतंपिशुनस्यसूचकस्यभावः पैशून्यं द्वैजिह्व्यंपरेषां पै

अपिश्राव्यं श्रावं ममतु पुनरेवं गुणगणानृते त्वत्कोनाम क्षणमपि निरीक्षेत वदनम् ३१

शून्यंतस्यमननंचिंतनम् अभ्यासमितियावत् सततंनिरंतरंचतत् पैशून्यमननंचतदपिकृतं एवंप्रकारेणमम
तुपुनर्गुणगणान् श्रावंश्रावंश्रुत्वाश्रुत्वा त्वहृते त्वांविना अन्यारादितिसूत्रेणऋतेयोगेत्वदितिपंचमी कोना
मक्षणमपिवदनं अर्थात् ममसुखंनिरीक्षेतपश्येत् अपितुनकोपीत्यर्थः तवतुमातृत्वेनदयाबाहुल्यादीदृश
स्यममसुखनिरीक्षणमावश्यकमेवेतिभावः तदुक्तंश्रीमच्छंकराचार्यैः कुपुत्रोजायेतक्वचिदपिकुमातानभवती
ति ३१

418

इदानीं यस्य मनुष्यस्य नेत्राभ्यां परमरमणीयं तव शरीरं न दृष्टं यस्य कर्णाभ्यां तव लहरी कोलाहलश्च न श्रुतः तस्य नेत्रे व्यर्थे कर्णौ च व्यर्थौ वित्याह विशालाभ्यामिति अन्वयस्य तस्येत्यध्याहारः भोजननि यस्य मनुजस्य मानवस्य मनुजा मानवा नराइत्यमरः याभ्यां नेत्राभ्यां परमरमणीया अतिसुंदरी अनेन दर्शने कारणं सूचितं एतादृशी तव तनुः शरीरं न आलीढा न सादरमवलोकिता तस्य मनुजस्य विशालाभ्यां आकर्णविस्तृताभ्यां आभ्यां नयनाभ्यां कृत्वा

विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं न याभ्यामालीढा परमरमणीया तव तनुः अयं हि न्यक्कारो जननि मनुजस्य श्रवणयोर्ययोर्नान्तर्यातस्तव लहरिलीलाकलकलः ३२

इह भूलोके किं फलं न किमपीत्यर्थः यद्वा इह नालीढेति योजना यस्य ययोः श्रवणयोः कर्णयोरंतर्मध्ये तव लहरिलीलाकलकलः लहरीणां लीलाक्रीडा तया कलकलः कोलाहलः कोलाहलः कलकलइत्यमरः इह न यातः न प्राप्तः तस्य नयोः श्रवणयोः अयं श्रवणरूपः न्यक्कारः धिक्कारः अस्ति विशेषः खलु निश्चयेन यद्वा ययोः श्रवणयोः अंतर्मध्ये तव लहरि लीलाकलकलः न यातः ताभ्यां श्रवणाभ्यां कृत्वा किं फलम् न किमपीत्यर्थः परंतु अयं अदर्शनाश्र

यथारूपन्यक्कारोमनुजस्यनत्विंद्रियाणाम् इंद्रियव्यापारस्यमनुष्यव्यापाराधीनत्वादितिभावः तदुक्तम् कर
णंहिकर्तृकमिति एतत्पक्षेयस्यतस्येतिनाध्याहारः नाभ्यामित्यस्यचाध्याहारः अहंतुसर्वदैवनवतनुं
पश्यामि लहरीशब्दंचशृणोमि अतोममनेत्रकर्णनव्यर्थमित्याकूतम् एवंचशीघ्रंमांपुनीहीति भावः अत्र
विनोक्तिध्वनिरलंकारः त्वद्दर्शनंविनानयनयोः त्वल्लहरीकोलाहलश्रवणंविनाश्रवणयोश्चरमणीयत्वस्यफ
लमप्यधिक्काराभ्यांव्यंजनात् ३२ इदानींपुण्यवंतोविमानैः सुरपुरंस्वच्छंदंयांतिपापिनरकपराधीनाःसंतो

विमानैःस्वच्छंदंसुरपुरमयंतेसुकृतिनः पतंतिद्राक्पापाजननिनरकांतःपरवशाः॥

नरकमध्येपतंतीतिकोटिद्वयंयत्रदेशेत्वंनासितत्रसंभवति यत्रतुनिखिलपापनाशिनीत्वमसितत्रद्वितीय
कोटेरभावात् आद्यकोटिरेवसंभवतीत्याह विमानैरिति भोजननिस्कृतिनःपुण्यवंतः विमानैः सुरपुरंसुरा
णांदेवानांपूर्नगरीताम् यद्वा सुराणांपुरंनगरंस्वर्गं स्वच्छंदं यथास्यात्तथानतुतद्गुणादिवशेन अयंतेगच्छंति
पापाःपापरूपाःजीवाः पापबाहुल्येनपापपुरुषयोरत्रिमुनिव्याकरणमितिवदभेदः यद्वापापमस्तियेषांतेपापाः

इतिमत्वर्थे अर्शआद्यच् अतएवपापोहं पापकर्माहमित्यादिप्रयोगाः संगच्छंतइतिदिक् पापमर्हंतीतिवापर
वशाः संतः यमनगरगणाधीनाः संतइत्यर्थः नरकांतः नरकस्यांतर्मध्येद्राक् शीघ्रंयमनगरगमनसमयएवेत्यर्थः
पतंति भोमातः अयंविभागः विषयव्यवस्थातस्मिन्नशुभमयमूर्तौ अशुभमयी अकल्याणप्रचुरामूर्तिः तनु
र्यस्यतस्मिन् स्त्रियाःपुंवदितिपुंवद्भावः देशस्याशुभमयत्वंतत्रतवस्थितेरभावादेव एतादृशेजनपदेदेशेनी
वृज्जनपदोदेशइत्यमरः अस्त्वितिशेषः तस्मिन्नशुभमयमूर्तौ जनपदे अयंविभागइति योजना तस्मिन्क

विभागोयंतस्मिन्नशुभमयमूर्तौजनपदे नयत्रत्वंलीलादलितमनुजाशेषकलुषा ३३

स्मिन् यत्रजनपदे दलितमनुजाशेषकलुषा मनुजानांमनुष्याणां अशेषकलुषंसमस्तपापं दलितंनाशितं मनुजा
शेषकलुषं ययासा एतादृशीत्वंनासि यत्रत्वंदलितमनुजाशेषकलुषासतीनासीतिवायोजना एवंचार्थादेता
दृशीत्वंयत्रासि तत्रकस्यापियातकिनअभावात्सर्वेपिविमानैः सुरपुरंगच्छंतीति आद्यकोटिरेवास्थितेतिभावः
अत्रपरिकरालंकारः दलितमनुजाशेषकलुषेतिसाभिप्रायविशेषणस्यसत्वात् तल्लक्षणंतुपूर्वमुक्तम् ३३

421

इदानींसमस्तमहापातकिनोपिमरणसमये त्वयिशरीरं त्यक्तवंतः संतः उत्तमलोकं गच्छंतीत्याह अपीति अ
मघेनेइत्यध्याहारः पूर्वश्लोकात्पापाइत्यनुवर्तते तथाचैवंयोजना भोअंब तेपापाःपापिनः पुरुषाः अंतेमरणस
मये त्वयि तनुंशरीरं विहायसंत्यज्य अतनुदानाध्वरजुषाम् नतनु अल्पमित्यतनु महत् तच्चतद्दानंच तेनयेध्वराः
सर्वस्वदक्षिणायज्ञाः यज्ञः सवोऽध्वरोयागइत्यमरः यद्वा अतनूनिमहांतिदानानियेषुतेचतेअध्वराश्च यद्वा
अतनुदानानिचाध्वराश्च यद्वानतनुः कोपः तेनयानिदानानि अध्वराश्च तनुः कोपेत्वचिस्त्रीस्यात्त्रिष्वल्पेविरले

अपिघ्नंतोविप्रानविरतमुशंतोगुरुसतीःपिबंतोमैरेयंपुनरपिहरंतश्चकनकम् ॥

कृशइतिमेदिनी तान्जुषंतिसेवनंकुर्वंतीत्यर्थः तेअतनुदानाध्वरजुषः तेषांउपरिउपरिलोके क्रीडंतिविहरं
ति महादानयागप्राप्यलोकोपरितनलोकं गच्छंतीत्यर्थः तथाच गंगातनुत्यागादेवोत्तमलोकप्राप्तौपरमो
त्कृष्टसाध्यमहादानयागेषुनकिंचिदधिकंफलमितिभावः तेकेयेपापाः विप्रानपिब्राह्मणानपि अविरतंनि
रंतरं यथास्यात्तथा इदंसर्वक्रियान्वयि घ्नंतितेघ्नंतः हनधातोः शतरिगमहनेत्युपधालोपः नलोपेतिषष्ठानि

षेधाद्धिमानित्यादिद्वितीया पुनः तेके ये गुरुसतीः गृणातिबोधकंकरोतिगुरुः कृग्रोरुच्चेत्युणादिसूत्रे
णगृशब्दे इत्यस्मात् कुप्रत्ययःउकारश्चांतादेशः तथाचोपनयनादर्वाचीनसंस्कारपूर्वकंवेदाध्यापकोमंत्रो
पदेशश्चगुरुः स्यान्निषेकादिकृद्गुरुरित्यमरः तस्यसत्यःपतिव्रताःस्त्रियः सतीसाध्वीपतिव्रतेत्यमरः ताःउ
शंतः वशंति इच्छंतितेउशंतः वशकांतौ अदादिः तत्रहिकांतिरिच्छेत्युक्तम् तस्माच्छतरिग्रहिज्येतिसंप्र
सारणम् यद्वा गुरोःपितुःसतीःमातृरित्यर्थः यद्वागुरोःश्रेष्ठपितृव्यभ्रातृमातृमातुलादेःसतीःयद्वागुरोःबृह

विहायत्वय्यंतेतनुमतनुदानाध्वरजुषासुपर्यंबक्रीडंत्यखिल सुरसंभावितपदाः३४

स्पतेःसतीः तस्यएकस्त्रीत्वेपिजात्यभिप्रायेणबहुवचनमिति यथाकथंचिद्योज्यम् तथाचानेकार्थकोशः गुरुः
पितागुरुःश्रेष्ठोगुरुः सुरपुरोहितः दुर्वहोपिगुरुःप्रोक्तोगुरुःशिष्याभिसेचकइति पुं० येमैरेयंसीधुम् मैरेयमास
वःसीधुरित्यमरः पिबंतःपानंकुर्वंतः पुं० तेकेयेकनकंस्वर्णस्वर्णंकनकमित्यमरः हरंतःचोरयंतः कथंभूताःतेअ
खिलसुरसंभावितपदाःअखिलसुरैःसमस्तदेवैःसंभावितंसंभावनायुक्तंकृतंपूजितमितियावत्तादृशंपदंचरणं

येषांतेबहुवचनांतेनसमासः यद्वा अखिलस्फराणांसंभावितंप्रासंताहशंपदंस्थानंयैस्तेसप्तमीविशेषेणइति ज्ञापकाव्द्यधिकरणापदोबहुव्रीहिर्वाकर्तव्यः संपूर्वकभृधातोर्णिजंतात्कः उपसर्गबलाल्लुक्तार्थलाभः ३४ इदानींमहान्चोरः पुनरपिनराणांप्राणहारकोपिवायुः खलुहरिसंबंधमाहात्म्येनत्रिभुवनंपवित्रीकरोतीत्याह अलभ्यमिति भोअंबसोपिपरचौर्यपरप्राणापहारित्वादिगुणयुक्तोपिपवमानः प्रभंजनः पवमानःप्रभंजनइत्यमरः त्वदीयानांतवइमाः त्वदीयाः युष्मदस्मदोरन्यतरस्यांखंचेतिचाच्छः प्रत्ययोत्तरपदयोश्चेतित्वादेशः तासांलीला

अलभ्यंसौरभ्यंहरतिसततंयःसुमनसांक्षणादेवप्राणानपिविरहशस्त्रक्षतभृतां

चलितलहरीणांलीलयाचलिताः चंचलाः गच्छंतोवाचलगतावित्यस्मात् गत्यर्थाकर्मकेत्यनेनकर्तरिक्तः एताहश्योयाः लहर्यः तासांव्यतिकरात् संबंधात्त्रिभुवनजगत्त्रयंपुनीतेपवित्रीकरोति अहहेत्यद्भुते अहहेत्यद्भुतेखेदइत्यमरः ननुदेवोपिवायुः कथंचौर्यादिगुणयुक्तइत्याकांक्षायामाह सकः यःपवमानःसुमनसांपुष्पाणांस्त्रियः स्फमनसः पुष्पमित्यमरः अलभ्यमन्यत्रचौरैरप्राप्यम् अनेनचौर्येवायोः कौशल्यमावेदितम् एताहशं

सौरभ्यंसौगंध्यंनियतंयथातथा हरतिचोरयति पुनःसकः यःविरहशरव्रक्षतभृतांविरहएवस्त्र्यादिवियोगएवश
स्त्रंमारकत्वात् यद्वा विरहश्चशस्त्रंचविरहशस्त्रे ताभ्यांयत्क्षतंतत् बिभ्रतितेविरहशस्त्रक्षतभृतः तेषां
कचित्तुविरहशस्त्रक्षतहृदामितिपाठः तत्रविरहशस्त्राभ्यांक्षतंक्षतयुक्तंकृतम् विदारितमितियावत् ताह
शंहृत् येषामितिसमासः यद्वा विरहशस्त्रयोःक्षतंयस्मिन्निविंव्यधिकरणपदोबहुव्रीहिः ताहशंहृत् येषाम्
विरहशस्त्रक्षतयुक्तंहृत् येषामितिशाकपार्थिवादित्वान्मध्यमपदलोपिसमासोवा तेषांप्राणानपि अस्रू

त्वदीयानांलीलाचलितलहरीणांव्यतिकरात्पुनीतेसोपिद्रागहहपवमानस्त्रिभुवनं२५.

नपि पुंसिभूम्न्यसवःप्राणाइत्यमरः क्षणादेवक्षणमात्रेणैवनियतंयथास्यात्तथाहरति एताहशःदुष्टोवायुःश्रे
ष्ठःत्वत्त्वहरिसंबंधमहात्म्येनमहत्कार्यंकरोतीतिभावः उक्तंचहनूम न्नाटके येमज्जंतिनिमज्जयंतिचपरांस्तेप्र
स्तरादुस्तरेवार्द्धौवीरतरंतिवानरभटान्संतारयंतेपिच नैतेग्रावगुणानवारिधिगुणानोवानराणांगुणाःश्रीम
द्दाशरथेःप्रतापमहिमासोयंसमुज्जृंभतइति लोकेपिदुष्टःप्रभुर्भृत्यत्वसंबंधमाहात्म्येनमहत्कार्यंकरोतीतिप्रसि

425

ह्यमेव ३५ इदानींकेचनलोकाः परकार्यसंपादकाः संतिकेचनपवित्रात्मानः संतः परलोकप्रणयिनोभवंति अ
हंतु त्वयिस्थापितलोकहृद्यभरः सन्स्फुरत्वेननिद्रांकरोमीत्याह कियंतइति भोमातः कियंतः कतिसंख्याकाः
एकेसाधारणालोकाः इहजगतिनियतंलोकार्थघटकाः लोकानांजनानांअर्थाः प्रयोजनानि अर्थरैविभवा
अपीत्यमरः तेषांघटकाःसंयोजकाःसंति यद्वा इहकियंतःएके लोकार्थघटकाःसंतः परलोकप्रणयिनः पर
लोकं प्रणयंति प्रार्थयंतितेते यद्वा परलोकंप्रकर्षेणनयंतिगच्छंति तेपर लोकप्रणयिनः संतीतियोजना इहलो

कियंतःसंत्येकेनियतमिहलोकार्थघटकाः परेपूतात्मानः कतिचपरलोकप्रणयिनः

केपरकार्यसंपादनजन्यपुण्येनस्वर्गलोकंगच्छंतिएवंचतेषामयंलोकः परलोकश्चसमीचीनइत्याकूतम् परेचा
न्येचकति यद्वा कतिपरेचपूतात्मानः संतः पूतः तपःसेवनादिनापवित्रः आत्मायेषांतेएतादृशाःसंतः नियतं
परलोकप्रणयिनः संति भोमातः अयंजगन्नाथस्तुपुनः शब्दस्त्वर्थः तवकृपातः यंचम्यंतात्तसिल् कृपाहेतोः
शश्वन्निरंतरंस्फुरत्वंयथास्यात्तथाशेतेनिद्रांकरोति शश्वदित्यनेनकदापिअन्यन्नकरोति स्फुरत्वमित्यनेन त

नैवममस्करवंनान्यत्रेतिसूचितम् ननुएवंच लोकद्वयेतवकागतिरितिचेत्तत्राह कथंभूतोयं त्वयिनिहितलोकद्वयभरः
त्वयिभवत्यांलोकद्वयेइहलोके परलोकेचभरः सर्वेभ्योउत्कृष्टत्वान्निहितः स्थापितः लोकद्वयभरोयेनसः भरःउद
रपोषणंवाडुभृञ्धारणपोषणयोरित्यस्मादचीतिदिक् ३६ इदानींननुरेपापनिवृत्तयेमांस्तौषित्वत्रादोपायमेव
किमर्थंकरोषीतिचेत्त्वयास्वपतितानाम्श्लीलशवशकलसमुदायपरित्राणं यथाक्रियते तथामयापिपापंक्रियतेस्व
स्वभावस्यसर्वैरपिदुष्परिहारित्वादित्याह भवत्याहीति भोअंब व्रात्याधमपतितयाव्रात्याश्चअधमाश्चव्रात्याध

सुरवंशेतेमानस्तवरवलुकृपातःपुनरयंजगन्नाथःशश्वत्त्वयिनिहितलोकद्वयभरः ३६ भवत्या
हिव्रात्याधमपतितयारवंडपरिषत्परित्राणःस्नेहःश्लथयितुमशक्यःरवलुयथा॥ माः व्रात्याःसंस्का

रहीनाःअधमानीचाःतेपतिताःयस्यांसातयाआहिताग्न्यादित्वात्पतितशब्दस्यपरनिपातः यद्यपिपतेःसनितनिपति
इत्यस्यवेट्कत्वात् निष्ठायांचस्यविभाषेतिइण्निषेधः प्राप्नोति तथा द्वितीयाश्रितातीतपतितेतिनिपातनाद्भवति
एतादृश्याभवत्यात्वयारवंडपरिषत् परित्राणस्नेहःरवंडानामर्थात् स्वपतितशवशकलानांभिन्नशकलरवंडेत्यादुस्य

द्वेर्द्विसमेंशक इत्यमरः परिषत्समुदायःतस्याःपरित्राणंपालनं तत्रस्नेहःप्रेम प्रेमानाभियताहार्दंप्रेमस्नेहइत्यमरः
श्लथयितुंत्यक्तुंयथाशक्यःखलुनिश्चयेन एवंदुरितनिवहे दुरितस्यपापस्यनिवहःसमूहःतत्रममापिप्रेमाभियता अ-
स्तीतिशेषः यतोयस्मात् कारणात्जगतिसर्वैरपि अयंस्वभावोनिसर्गः स्वरूपंचस्वभावश्चनिसर्गश्चेत्यमरःदुष्परि
हरःदुःखेनापिपरिहर्तुमशक्यः अस्तीतिशेषःदुःखशब्देउपपदेहरतेःईषद्दुःखितसूत्रेणखलु यद्वा दुरितनिवहेजग
तीतियोजना आत्याधमपतितयेत्यनेन तेषामपिरक्षणेकिंवक्तव्यंपुण्यवतामित्यावेदितम् खंडमित्यनेनअवयव

ममाप्येवंप्रेमादुरितनिवहेधंवजगतिस्वभावोयंसर्वैरपिखलुयतोदुष्परिहरः ३७

स्यपालनेकिंवक्तव्यम् अवयविनःइत्याशयः परिषदित्यनेनैकमपिनत्यजतइतिभावः दुरितनिवहेत्यनेनबहुषुपातके
षुममेच्छानत्वेकस्मिन्द्वयोर्वेत्यावेदितम् अत्रनिंदयास्तुत्यभिव्यक्तेर्व्याजस्तुत्यलंकारः तदुक्तंकुवलयानंदे उक्ति
र्व्याजस्तुतिर्निंदास्तुतिभ्यांस्तुतिनिंदयोरिति ममयथाविवेकलेशोपिन तेरामचंद्रःरणेरिपून्हतान्स्वनाशकान्दृशी
घ्रंपापिनोनयसेदिवमिति अत्रारीन् दिवंनयसेइत्युक्त्याभक्तानवश्यंनयसेइतिस्तुत्याभिव्यक्तिः ३७

इदानीं गंगातांडवविधिं वर्णयन् स्वतापशमनं प्रार्थयते प्रदोषेति त्रिदशतटिनीतांडवविधिः त्रिदशानां देवानां तटिनी गंगा तस्याः तांडवम् तंडुना तच्छास्त्रप्रवर्तकाचार्येण प्रोक्तं तांडवं नाट्यं तेन प्रोक्तमित्यणि ओर्गुण इति गुणः तांडवं नटनं नाट्यमित्यमरः तस्य विधिः करणं विधिर्विधाने दैवे चेत्यमरः तापं अर्थात् ऋजनसंतापं यद्वा पूर्वश्लोकान्ममेत्यनुवर्तते तथा च मम तापं तिरोधत्तां अंतर्धानं गमयतु नाशयत्वित्यर्थः तांडवसामग्रीमाह कथंभूतस्त्रिदशतटिनीतांडवविधिः प्रदोषांतर्नृत्यत्पुरमथनलीलोद्धृतजटातटाभोगप्रेंखल्लहरिभुजसंतानविधुतिः प्रदोषस्य सूर्या

प्रदोषांतर्नृत्यत्पुरमथनलीलोद्धृतजटातटाभोगप्रेंखल्लहरिभुजसंतानविधुतिः बिलक्रोडक्रीडज्जलडमरुटंकारसुभगास्तिरोधत्तांतापंत्रिदशतटिनीतांडवविधिः ३८

स्तानंतरं षट्घटिकात्मककालस्यांतर्मध्ये नृत्यं कुर्वन् स चासौ पुरमथनश्च शिवश्च तेन लीलया उद्धृताः उत् ऊर्ध्वं धृताः इयं नृत्यचेष्टा एता दृश्यः याः जटाः संयताः केशाः जटा स्यात्संयतालका इति कोशः तटे आभोगः पतनात्मकः संयोगसंबंधः नृत्यत्पुरमथनली-लोद्धृतजटानां तटाभोगः तेन प्रेंखंत्यः गच्छंत्यः चंचला वा या लहर्यः वीच्यः ता एव भुजाः संतानं च विधुतिश्च संतानवि

429

धुती संतानां दीर्घीकरणं विधुतिः कंपः भुजान्त संतानविधुती यस्मिन्स प्रदोषांतः इदं समस्तं व्यस्तं वा उक्तप्रदोषलक्षणे प्रमाणं तु त्रिमुहूर्तं प्रदोषः स्यात् भानावस्तंगते सतीति हेमाद्र्याधृकदाद्यतं वचनं बोध्यमिति दिक् संतानेत्यत्र सं पूर्वक धुञ् कंपने इत्यस्मात् स्त्रियां क्तिन् पुनः कथंभूतः त्रिदशतटिनी तांडवविधिः बिलक्रोडक्रीडज्जलडमरुटंकारस्फुभगः बिलस्य विवरस्य क्रोडं अर्थात् मध्यः ननाक्रोडं भुजांतरमित्यमरः तत्र क्रीडत् विहरत् यज्जलं तदेव डमरुः वा द्यविशेषः ढक्केत्यर्थः वाद्यप्रभेदा डमरुमड्डुडिंडिमझर्झराइत्यमरः तस्य नेनवायः टंकारः शब्दविशेषः तेन स्फुभगः शोभनं

सदैव त्वय्येवार्पितकुशलचिंताभरमिमं यदि त्वं मामंब त्यजसि समयेऽस्मिन्स्फुविषमे ॥

स्फुद्ववाभगंश्रीर्यस्य सः भगं श्रीकाममाहात्म्येत्यमरः स्फुंदरइत्यर्थः क्वचित्तटक्रोडेति पाठः ३८ इदानीं सर्वदा भवत्यां स्थापितकुशलचिंताभरं मां त्वं विषमे अस्मिन्समये यदि त्यजसि तर्हि अतः परं भुवनत्रये तव विश्वासं कोपि न कुर्यात् तवकरुणा च निराधारा स्यादिति गंगायाः भयप्रदर्शनेनाह सदैवेति भो अंब सदैव सर्वदैव त्वय्येव भवत्यामेव एवेत्यनेन तीर्थांतरं व्यावर्तयति अर्पितकुशलचिंताभरं कुशलस्य क्षेमस्य कुशलं क्षेममस्त्रियामित्यमरः तस्य चिंता कथं मम कुशलं

भविष्यतीत्याकारिकातस्याभरः आधिक्यंवद्धीचिंतेत्यर्थः भरः समूहोवाअर्पितः स्थापितः कुशलचिंताभरो येन
सः तंगंगेवममकुशलंकरिष्यतीतिमन्यमानंइत्यर्थः इमंत्वत्समीपेवर्तमानमेतादृशंमांस्फविषमेस्फतरामत्यंतंविष
मोदुःसहःतस्मिन्अतिकठिनइत्यर्थः यद्वाविषंगरलंमयतेददातीतिविषमःतस्मिन्मेङ्प्रणिदानेइत्यस्यआदेश
उपदेशेशितीत्यात्वेआतोनुपसर्गेकइतिआतोलोपःइटिचेत्याकारलोपःएतादृशेस्मिन्समयेयादित्यजसितदात
र्हिअयंविश्वासःगंगाशरणागतकुशलकर्त्रीत्याकारोनिश्चयःत्रिभुवनतलात्त्रिभुवनस्यतलंतस्मात्अस्तंतिरोभा

तदाविश्वासोयंत्रिभुवनतलादस्तमयतेनिराधाराचेयंभवतिखलुनिर्व्याजकरुणा ३९ वं अयतेग

च्छतिगमिष्यतीतिवा वर्तमानसामीप्येतिभविष्यतिलट् चपुनः इयंनिर्व्याजकरुणा अकपटकरुणानिराधाराभ
वति निर्गतः आधारोयस्याःसाएतादृशीभवति खलुनिश्चयेनसंदेहोनास्तीतिभावः विश्वासाभावेनकस्यापितव
निकटेआगमनाभावात् करुणायास्तिरोधत्वात् लोकेपियस्यविश्वासोनास्तितस्यनिकटेकोपिनगच्छतीतिप्रसिद्ध
मेव एवंचमाहात्म्यसंरक्षणायझटितिममोद्धारणंकुर्वितिगंगायाः प्रीतिप्रदर्शनमितिभावः कच्चित्तुसमयेइत्यस्य

स्थानेविषयेइतिपाठः तत्रविषयोद्धारणरूपेविषयेइत्यर्थः ३९ इदानींहरवामभागेकाद्दिलीयाक्रांतावर्ततेइति प्रेक्षितुंकपर्दादुल्लस्यसीमंतसरणौआगताअतएवपार्वत्यासापत्न्यभावात् करेणाकर्षिताएताहृशस्तवलहर्यो विजयंतामित्याह कपर्दादिति भोजनानि तेतवलहर्यः कपर्दात् शिवजटाजूटात् उल्लस्यप्रसृत्यप्रणयामिलद र्द्धांगयुवतेः प्रणयेनप्रीत्यामिलंतीसंयुज्यमाना अर्द्धांगेवामभागेयुवतिः पार्वतीयस्यसः तस्यपुरारेः शिव

कपर्दादुल्लस्यप्रणयमिलदर्द्धांगयुवतेःपुरारेःप्रेंखंत्योमृदुलतरसीमंतसरणौ भवान्या साप त्न्यस्फुरितनयनंकोमलरुचाकरेणाक्षिप्तास्तेजननिविजयंतांलहर्यः ४०

स्यमृदुलतरसीमंतसरणौ अतिशयेनमृदुलः कोमलः मृदुलतरः ताहृशोयः सीमंतः केशवेशः सीमंतः केशवेशइतिशकंध्वादिगणसूत्रे यापररूपम् तस्यसरणिः तत्रप्रेंखंत्यः गच्छंत्यः उपरिष्टादधोभागेआगताइत्यर्थः पुनः कथंभूताः अतएवभवान्याः पार्वत्याकर्तृभूतया कोमलरुचा कोमलारुक् कांतिर्यस्यतेन एतेनपार्वतीसौंदर्यमुक्तम् अतएवशिवेनप्रीतिव शात् लहरीकर्षणेननिवारिताएताहृशेन करेण सापत्न्यस्फुरितनयनंयथास्यात्तथासमानः पतिर्यस्याःसास

पत्नी तस्याः भावः सापत्न्यं तेन स्फुरितेन कोपेन चंचलेन यनेयस्मिन्कर्मणि यथा भवति तथा आक्षिप्ताः
आकर्षिताः क्वचित्तु भवान्याइतिषष्ठ्यंतः पाठः तत्र भवान्याः करेण कर्तृभूतेनेत्यर्थः ४० इदानीं बहवो लोकाः त्वा
मायांति तत्र तेषामभीष्टं करोषीति कारणं वर्तते अहं तु स्वभावादेव त्वय्यनुरक्त इति तुभ्यं शपइत्याह प्रपद्यंतइति
भोमातः सुरधुनि कति लोकाः अत्र भवतीं पूज्यां भवतीं त्वां न प्रपद्यंते नायांति अपितु बहवः प्रपद्यंतइ त्यर्थः तत्रायमुपा

प्रपद्यंते लोकाः कृतिन भवतीमत्रभवतीमुपाधिस्तत्रायं स्फुरति यदभीष्टं वितरसि
शपे तुभ्यं मातर्मम तु पुनरात्मा सुरधुनि स्वभावादेव त्वय्यमितमनुरागं विधृतवान् ४१

धिःकारणं स्फुरति वर्तते किं तदित्याकांक्षायामाह यत् यस्मात् कारणात् अभीष्टं वांछितं वितरसि ददासि तेभ्य
इति शेषः मम तु पुनः जगन्नाथस्यात्मा स्वभावादेव निसर्गादेव त्वयि भवत्याममितं अपरिमितं अनुरागं प्रीतिं विधृ
तवान् धारयामास इति तुभ्यं भवत्यै शपे शपथं करोमि श्लाघह्नुङ्स्थाशपामिति संप्रदानत्वम् ४१ ६२

इदानीं त्वदीया मृत्तिका मदीयं समस्तं शोकं दूरीकरोत्विति प्रार्थयते ललाटइति पूर्वश्लोकात्संबोधनपदमावर्त्त- नीयम् भोस्कर धुनि त्वदीयात्वत्संबंधिनी सा मृत्स्ना प्रशस्ता मृत्त मृत्स्नासस्नौ प्रशंसायामितिमृच्छब्दात्स्न प्रत्ययः मृन्मृत्तिका प्रशस्तातु मृत्सा मृत्स्ना च मृत्तिके त्यमरः मम जगन्नाथकवेः कृत्स्नामपि संपूर्णामपि शु चं शोकं हरतु ननु मृत्तिकायाः शोकहरणे कथं सामर्थ्यमित्याकांक्षायामाह साका यामृत्स्ना इह लोके ललाटे भाल देशे सलिलं यथास्यात्तथा तिलकिता सती पुंड्रीकृतासती नमोहंतुं तरुणतरमार्तंडतुलनाम् तरुणतरः माध्या

ललाटे या लोके रिह खलु सलीलं तिलकिता तमोहंतुं धत्ते तरुणतरमार्तंडतुलनाम् ॥

न्हिको यो मार्तंडः सूर्यः तस्य तुलनां साम्यं धत्ते बिभर्त्ति अत्र प्रमाणं तु गंगातीरसमुद्भूतां मृदं मूर्ध्ना बिभर्ति यः बिभर्ति रूपं सोर्कस्य तमोनाशाय केवलमिति ब्रह्मांड पुराणवचनं बोध्यम् तिलककरणप्रकारा श्चोक्तस्तत्रैव वामह- स्ते जलं कृत्वा सावित्र्या चाभिमंत्रितम् तां द्विष्णोरिति मंत्रेण मर्दयेन्मृत्तिकां ततः अतोदेवेतिसूक्तेन तिलकं कारयेत्सदे ति इदं तिलककरणं प्रातः स्नानोत्तरं बोध्यं पुनः साकायाविधि लिखित दुर्वर्गसरजिमृ विधिना ब्रह्मणा लिखिताः ते

चेतेदुर्वर्णाः दुष्टाक्षराणि अयंदरिद्रो भविता मृतभार्यश्चेत्यादयः तेषांसरणिः तांसद्यः पालनाव्यवहितोत्तरकाले एव - विलुंपंतीति विशेषेण लुंपंती प्रोच्छंती एवंचविधिलिखितमपि अलीकंकुर्वत्यामम शोकहरणे सामर्थ्यमस्तीति - भावः ४२ इदानींमूढान्नरानुपहसंतः स्ववासिध्वमरायामालिन्यदोषंदूरीकुर्वाणाश्चगंगातीरतरवःममसखा यःसंत्वित्याह नरानिति त्रिदशतटिनीतीरतरवः त्रिदशतटिन्याः गंगायाः तीरं तत्रतस्यवा तरवः वृक्षाः नः अस्माकं

विलुंपंतीसद्योविधिलिखितदुर्वर्णसरणिंत्वदीयासन्मूर्त्स्नाममहरतुकृत्स्नामपिशुचं ४२
नरान्मूढांस्तत्तज्जनपदसमासक्तमनसो हसंतः सोल्लासंविकचकुसुमव्रातमिषतः ॥

भक्तजनानांसखायः मित्राणिसंतुभवंतु अथ मित्रंसखासुहृदित्यमरः कथंभूताः त्रिदशतटिनीतीरतरवः मूढान् मूर्खान् अतएवतत्तज्जनपदसमासक्तमनसः तेचतेजनपदाश्चतत्तज्जनपदाः स्वस्वदेशानीवृज्जनपदोदेशइत्य मरः तेषुसमासक्तंसंबद्धं एतादृशंमनोयेषांते तान् एतादृशान् नरान् मनुष्यान् विकचकुसुमव्रातमिषतः विक चानिप्रफुल्लानियानिकुसुमानिपुष्पाणितेषांव्रातः समूहः तस्यतदेववामिषंछलंतस्मात्सोल्लासंसहर्षंयथा

स्यात्तथाहसंतः उपहास संकुर्वंतः एतेषांदुष्टस्वीयस्वीयदेशरचिताभक्त्यातत्रैवमरणेनदुर्गतिर्भविष्यतीतिअस्माकं
तुसदैवगंगातीरवासित्वात् उभयगतिर्भविष्यतीति तानुपहसंतीत्युत्प्रेक्षापुनः कथंभूताःनित्यमलिनाःनित्यंमलिनाः
मालिन्ययुक्ताःतान्जन्मतःश्यामानित्यर्थःएतादृशान्अलिनः भ्रमरान्सौरभ्यैःनिजकुसुमसौगंध्यैःसंततंनिरंत
रंयथास्यात्तथापुनानाःपवित्रीकुर्वाणाः एवंचतादृशान्येपुनंतितेस्वसरवंमामपिपवित्रंकरिष्यंतीतिभावः

पुनानाःसौरभ्यैःसततमलिनोनित्यमलिनान्सखायोनःसंतुत्रिदशतटिनीतीरतरवः ४३ यजं
त्येकेदेवान्कठिनतरसेवांस्तदपरेवितानव्यासक्तायमनियमरक्ताःकतिपये ॥ सौरभ्यैःनित्यमलि

नान्पुनानाइतिवायोजनाम धुलिण्मधुपालिनइत्यमरः ४३ इदानींकेचनस्वेष्टफलावाप्तये यमानियमादियोगंकुर्वं
ति अहंतुत्वन्नामस्मरणेनप्राप्तकामः सन् जगज्जालंतृणतुल्यंमन्यइत्याह यजंतीति भोत्रिपथगे एकेलोकाः
कठिनतरसेवान् अतिशयेनकठिनाकठिनतरासेवायेषांतेतान् एतादृशान् देवान् विष्ण्वादीन् यजंतिपूजयं
तितदपरेतेभ्यः देवपूजकेभ्यः परेअन्येपंचमीतियोगविभागात्समासः यद्वातेदेवपूजकाः अपरेयेभ्यः–

तेइतिपंचम्यर्थेबहुव्रीहिः देवपूजकेभ्यउर्वरितइत्यर्थः वितानव्यासक्ताः वितानेषुउल्लोचेषुयज्ञेषुवाव्यासक्ताः विशे
षेणआसक्ताः तत्पराइत्यर्थः संतीतिशेषः अस्त्री वितानउल्लोचेइत्यमरः लोकेचांदवाइतिप्रसिद्धिः क्रतुविस्तारये
रस्त्रीवितानंत्रिषुतुच्छकइत्यमरः कतिपयेन्येलोकाः यमनियमरक्ताः यमनियमयोरक्ताः अनुरक्ताः संतीतिशेषः
तान्कुर्वंतीत्यर्थः तत्करणकाठिन्यात् कतिपयपदोपादानंयमनियमग्रहणम् अष्टानामप्युपलक्षणंतेचयमनिय
मासनप्राणायामप्रत्याहारध्यानधारणासमाधयः तत्रअहिंसादिपरिग्रहोयमः शौचादिसंपादनंनियमः पद्मका-

अहंतुत्वन्नामस्मरणाभृतिकामस्त्रिपथगेजगज्जालंजानेजननितृणजालेनसदृशं ४५

द्यासनंरेचकादिप्राणायामः इंद्रियाणांस्वस्वविषयेभ्यः प्रत्याहरणंप्रत्याहारः तत्रैवविच्छिद्यअंतरींद्रियप्रवाहो
ध्यानंचित्तवृत्तिनिरोधः समाधिरितिदिक् भोत्रिपथगेजननित्रीन्पथोगच्छतीतित्रिपथगा यद्वात्रयाणांपथांस-
माहारस्त्रिपथंपथः संख्याव्ययादेरितिनपुंसकत्वंतेनगच्छतीतित्रिपथगागमेर्डः तत्संबोधनंअहंतुजगन्नाथ-
स्तुत्वन्नामस्मरणकृतकामः सन् तवनामत्वनाम प्रत्ययोत्तरपदयोश्चेतित्वादेशः त्वन्नामस्मरणचिंतनंतेनकृताः

मैत्रीन्यघे वा द्विजः सगोत्रे संध्याकेंद्रे वा बलिष्ठे पापैः केंद्रे नैधने वत्रिकोणे शुक्रः सूर्यः शीतगुश्चैक
संस्थाना द्याग्यग्गमेवेति जातं ४ मेषे विंशति भागः स्यात् वृषभे नवमांशकः एकविंशति
भागस्तु सिंहे तथैव तौ वृषे प्रथमो मेषवृश्चिकयो विंशतिभागकः द्वाविंशतिकुलीरे तुला
यां वेद भागकः विंशतिर्मकरे चंद्रः कन्यायां प्रथमांशकः धनुष्य ष्टादशो भागो मीने दशम
भागकः ७ द्वाविंशतिर्नृयुग्मे तु चंद्रोऽप्यंशकृति प्रदः येये निशाकरा शास्तु मृत्युभागा विवाहि
ताः ८ तावद्भिर्वत्सरैर्जातो मृत्युमेति न संशयः जन्मलग्नपयोर्यस्तु शत्रुलग्नगतः शुभः ९
वरोति मृत्युं जातस्य तयोर्मित्रं स्थस्त्वायम् द्वचे धरा स्तु दिनेशसो राजा तस्य मृत्युसमुपेति मासा
न् केतुस्तु यत्किंतु दिने जातो मासद्वये नैव यमं प्रयाति ॥ भूपालयोगाय वनेः प्रदिष्टा राहुः
पूर्णे जातधरा नेशाः तेऽतिप्रयोगास्तु तदन्यजातः सद्योयमं याति नरा त्तयो वै १२ भानुर्नभ
स्थायदि पाप दृष्टो धरा सुतैर्दशमित्रस्थगेहे जातस्तु मृत्युं समुपैति शीघ्रं जन्मैर्न दृष्टो विधुतो
पिचैवं लग्ने षडष्टकाणानि गलाहि विहंगपक्षाधारस्तनाः मरणाय सप्तम वर्षे क्रूरयुतास्त्रा

अथ व्यतिरेकलक्षणमाह ॥ यत्रार्थांतरमिति यत्र वस्तुनार्थस्य वार्थांतरस्योत्कर्षे प्रसिद्धे अर्थांतरं लक्ष्यं सैव व्य
तिरेकस्य सदः श्लोकः १२४ अथोदाहरणं सएव राजा वर्त्तते अधुना जयदेवेति हे देवः कीदृशो राजा निध्या
नेदः निध्यदेन सार्वभौमेन कृतेनानंदरव इति एवं यायन कश्चित्स्वराजयादि प्रयत्नविज्ञातः पुनः किंस्वच्छंद
मः स्वाधीन तमोनलविक्रमो यस्य सउपलक्षणमाह ये नामेन राज्ञा सोप्यतीव प्रसिद्धोपि वर्वरो नाम नक्तं
चरो राक्षसरूपो राज्ञा युद्धसंग्रामे जितः पराभूतः अत्र जयसिंहो देवार्यादि प्रसिद्धस्य वर्वकस्य राज्ञो

यत्रार्थांतरमुत्कर्षे संभवस्तुपलक्षणं प्रख्यातार्थस्य सप्रोक्तो बुधैर्व्यवसरो यथा १२४॥
सएव निध्यायानंदो स्वच्छंदसत्तमविक्रमः येनं नक्तंचरः सोपि युद्धे वर्वरको जितः॥१२५॥ यत्रनिर्धा
रितात्सारात्सारं सारं ततस्ततः॥ निर्धार्यते यथाशक्ति तत्सारमिति कथ्यते॥१२६॥ संसारे मानुषं सारं मा
नुष्ये केपि कौलीन्यं कौलीन्ये धर्मित्वं धर्मित्वे विसदयत्वमः १२७

जयकारित्वेणोपलक्षणेन ज्ञायते इत्यवसरोयं १२५ अथ सारलक्षणमाह ॥ यत्रनिर्धारितादिति य
त्र निर्धारितात्सामान्यवस्तुनाप्यथक्कृतात्सारात्सारः॥ नावस्तुनः सोरनिर्धार्यते पयन्तक्रियते
सारस्ततस्तदनंतरं पुनर्पुनर्यथाशक्ति स्वाल्पशास्त्रानुसारेण सारं वस्तु निर्धार्यते तत्सारमि
ति सारनामालंकारः कथ्यते १२६ अथोदाहरणं संसारं इति सुगमं

609

१ यत्रैव द्विविधो श्लेषः स्यात् ... क्वचिदत्र वदति ... द्विविधो श्लेषः शब्दालंकार एवकदाचार्थालंकारश्चेति स्व
सहते तयत्र तु शब्दाः परिवृत्तिं सहंते तु ... अर्थालंकारत्वमिति यथा लोके न्वोऽन्यमाश्रयो लोकेनाथात्मा धो ... न्या

वा०म अथ श्लेषालंकारमाह पदैस्तैरेवेति यत्रयास्मिन्नलंकारे एकरूपैरवाक्यैस्तैरेवपदैर्वीप्यतामित्रैः प
१८ दैरनेकमर्थं नानाविधं वाक्यं वक्ति ब्रूते असौ श्लेषनामालंकार उच्यते १२८ तैरेवपदैः श्लेषो
दाहरणं आनंदमिति यस्यराज्ञो महीपालस्योदयेऽसौ समवाप्य सिंधुनाथः सिंधुदेशस्वामी
किलेति सत्येवेलां अमुलिछ्द्योदिकाजगतां कालमतिवाहितवान् किं भूतस्य राज्ञः प्रजानां सम

२ पदैस्तैरेवभिन्नैर्वीरूपवत्येव मेवहि अनेकमर्थं यत्रासौ श्लेषः परिचल्यते यथा ॥१२८
आनंदमुल्लासयतः समतात्कैरस्तु तापकैः प्रजानां ॥ यस्योदये सोमस्य राज्ञो
जगतां वेलां किल सिंधुनाथः ॥१२९॥
...परिवृत्तिं सहंते अन्येनार्थेकमात्मानं नाभवन्ति ते नात्रार्थश्लेषो न च यत्रशब्दाः परिवृत्तिं
सहंते श्लेषस्यत्रसहेयु अत्रार्थश्लेष इति अत्र त्वा

तादानंदमुल्लासयतः कैः कलाकरैर्दंडैः किं विशिष्टैः संतापकरैः संतापं दुःखं कुर्वंतीति संताप
करानसंतापकरास्तैः पुनः संतापकरैः करैः किरणैः चनृपस्य चंद्रस्य चोगुलिछ्द्यादिकां मर्यादा
वा सिंधुदेशाधिपसमुद्रश्चेति करादीनामभंगपदत्वेन श्लिष्टत्वेवाक्य मनेकार्थं वक्ति अयमि
...परिवृत्तिं ... अनेकरूपमर्थमेवात्र कथ नामतेन सर्वोपि श्लेषोर्थालं
कारः ... अनेकार्थशब्दानामेको

610

श्र बा. न

१५

सामान्येति॥ सामान्यवनिता कपटपंडिता वेश्या वण्यपण्या भवेत् तस्या दातारं नायकं विना नहि कश्चित्प्रि
यो भवति यो दाता स एव नायकः सामान्यानाऽप्रियेति १४ अथ शृंगाररसप्रकाशप्रच्छन्नभेदद्वयमाह॥
सर्वप्रकाशमिति एवायण्यपण्या उक्ता सती सर्वप्रकाशमेव सर्वप्रकटमेव नायकं याति प्रकाशो रसः
अन्यस्त्रीणां प्रियसमागमः प्रच्छन्न एव भवति एवं प्रच्छन्नशृंगाररसः १५ समासः संभोगशृंगाररसः वि
प्रलंभशृंगारमाह पूर्वानुराग इति पूर्वानुरागात्मको विप्रलंभः मानात्मको विप्रलंभः प्रवासात्मको वि

सामान्यवनिता वेश्या भवेत्कपटपंडिता॥ नहि कश्चित्प्रियस्तस्या दातारं नायकं विना॥१४॥ सर्वप्रका
शमेवैषा याति नायकमुद्धता। वाच्यः प्रच्छन्न अन्यस्त्रीणां प्रियसमागमः॥१५॥ पूर्वानुरागो मानाख्यः
प्रवासः करुणात्मकः॥ विप्रलंभश्चतुर्धा स्यात्स पूर्वः पूर्वोक्त एव च गुरुः॥१६॥ स्त्रीपुंसयोर्नवालोकादेवोल्ल
सितरागयोः॥ ज्ञेयः पूर्वानुरागोऽयमपूर्णस्पृहयोर्दशा॥१७॥

प्रलंभः करुणात्मको विप्रलंभः इति विप्रलंभश्चतुर्धा स्यात् एवं विप्रलंभः॥ पूर्वः पूर्वोक्त गुरुः प्रवासात्मको गुरु
रित्यर्थः १६॥ अथ क्रमेणैतेषां लक्षणमाह॥ स्त्रीपुंसयोरिति स्त्रीपुंसयोर्नवालोकात् एवं नवदर्शना
त् एवोल्लसितरागयोः अपूर्णस्पृहयोर्या दशावस्था अयं पूर्वानुरागविप्रलंभः शृंगाररसः॥१७॥

611

अथ सामान्येन चतुर्विधा स्त्रियमविपन्ने ॥ तथा शृंगाररसे नायको युवा पुमान् प्राक् कथितस्तस्य नायकस्य पु
रुषरूपस्य नायिकापि चतुर्विधा भवति तामाह ॥ अनूढेति स्त्रियश्चतुर्विधा अनूढा स्वकीया परकीया पण्यां
गना च त्रिवर्गिणो धर्मार्थकामयुक्तस्य स्वकीया परिणीता स्यात् अन्या अनूढा याः स्त्रियः केवलकामिनो भवं
ति आसां लक्षणमाह ॥ १ ॥ अनुरक्तेति ॥ या अनुरक्तेन नरेण अनुरक्ता सती या स्वयं स्वीकृता अङ्गीकृता भवति
सा अनूढोच्यते यथा दुष्यन्तस्य राज्ञः शकुन्तला ॥ ११ ॥ या नायिका देवताग्निगुरुसाक्ष्येण स्वीकृता सा स्वीया नायका स्व

अनूढा च स्वकीया परकीया पण्यांगना ॥ त्रिवर्गिणः स्वकीया स्यादन्याः केवलकामिनः ॥ १ ॥ अनुरक्तानुरक्तेन
स्वयं स्वीकृता भवेत् ॥ सानूढेति यथा राज्ञो दुष्यन्तस्य शकुन्तला ॥ १ ॥ देवतागुरुसाक्ष्येण स्वीकृता स्वीया नाय
का ॥ क्षमावत्यतिगंभीरप्रकृतिः सच्चरित्रधृक् ॥ १२ ॥ परकीयाप्यनूढैव वाच्यभेदोक्तिनानयोः ॥ विषयप्यति
कामेकातरस्यैवैकाप्रियं वदेत् ॥ १३ ॥

कीया सम्भोगेन क्षमा सा क्षमावती अतिगंभीरप्रकृतिः सच्चरित्रवत् प्रधानचरित्रवती ॥ १२ ॥ परकीयेति ॥ परकीया
पि स्त्री अनूढैव वाच्या परम् अनयोः परकीयानूढयोर्वाच्यभेदोक्तिर्न तां आह विशेषः कोपि तथापि विशेषमाह
एका परकीया अतिकामाकुला सती स्वयमेव प्रियं वदेत् एका द्वितीया अनूढा लज्जया स्वयं च देहं पर
कामाकुला सती स्वस्यैव कृत्वा प्रियं वदेत् ॥ १३ ॥

अथ भिन्नपदे श्लेषोदाहरणं॥ कुर्वन्निति योराजापि निशांतेतः पुरे कांतिमत्तया कथाररराज किंविशिष्टो
राजा कुवलयस्य पृथ्वीवलयस्योल्लासं कुर्वन् रम्यां प्रधानां भोजराजस्य श्रियं लक्ष्मीं हरन् योन्यो
पि राजा चंद्रमाः निशांते प्रभाते कांतिमत्तया कथानरराजा ते किंविशिष्टश्चंद्रमाः कुवलयं कु
मुदस्योल्लासं विकासं कुर्वन् रम्याणि च तानि अंभोजानि च तेषां विकासिकमलानि तेषां शो
भां हरन् अत्र कुवलयेति भिन्नपदं वलयस्येति रम्येति भिन्नपदं अंभोजश्रीरिति भिन्नपदं ॥३॥

कुर्वन् कुवलयोल्लासं रम्यांभोजश्रियं हरन्॥ एष राजापि यच्चित्रं निशांते कांतिमत्तया॥ १३॥

एकत्र यत्र वस्तूनामनेकेषां निबंधनं॥ अत्युत्कृष्टापकृष्टानां तं वदंति समुच्चयं॥ १३॥ अण
हिल्लपाटकं पुरमवनिपतिः कर्णदेवनृपसूनुः श्रीकलशनामधेयः करी च रत्नानि जगतीह॥ १४॥

अथ समुच्चयलक्षणमाह॥ एकत्रेति यत्रैकत्र स्थले अनेकेषां वस्तूनां निबंधनं भवति तं समुच्चयमलंकारं
बुधा वदंति कीदृशानां वस्तूनां अत्युत्कृष्टानां अतीव प्रधानानां अपकृष्टानां नीचानां॥ अथोदाहरणं
अणहिल्लेति इह जगति त्रीणि रत्नानि वर्तंते तानि कानि रत्नानि एकं अणहिल्लपत्तनं नगरं द्वितीयो अवनिपतिः
कर्णदेवनृपसूनुः श्रीजयसिंहदेवः तृतीयः श्रीकलशनामधेयः करी गजः अत्रोत्कृष्टानां वस्तूनां

नाष्म
त्र

अथाप्रकृतवस्तुनो निबंधनं दर्शयति ॥ गम्यमेवास्तयति सुगमं ॥१३३॥ अथाप्रस्तुतप्रशंसालक्षणमाह ॥
प्रसंसेति यत्राप्रस्तुतस्याप्रयोगस्यापि वस्तुनः प्रशंसा वर्णनं क्रियते तामप्रस्तुतप्रशंसामलंका-
कारं कृतधियः पंडिता आहुः कथयंति १३४ अथोदाहरणं ॥ सैवेति विहरतीति सुगमं १३५ अथैकाव-
लीलक्षणमाह पूर्वपूर्वेति पूर्वपूर्वा वैशिष्ट्यनिबंधनानामथोत्तरोत्तरविरचना बु-
धैरेकावलीकमता कथिता १३६ ॥ अथोदाहरणं ॥ देवाः [illegible] इति सुगमं १३७

गम्यमेवासानायको निर्दयैकः कोऽस्या नामैकपात्रैकमत्र ॥ नित्यं रोगः परवशस्य वपुसां मेतस्यैव
जीवितमेव मृत्युः १३८ प्रशंसा क्रियते यत्राप्रकृतस्यापि वस्तुन अप्रस्तुतप्रशंसा तमाहुः कृतधि-
यो यथा १३९ सैवेयं हरति त्वेरं [illegible] स्वैरं च जल्पति ॥ भिक्षुरेकः सुखी लोके राजचोरभयोज्झितः ॥
पूर्वपूर्वार्थवैशिष्ट्यनिबन्धानामुत्तरोत्तरं ॥ [illegible] विचारस्तां बुधैरेकावली मता ॥१४०॥ देवाः स-
[illegible] निलया निलयाः सलीलसलना [illegible] इति

[illegible] तिमुद्रे [illegible] इत्यर्थः ॥ [illegible] यथा [illegible] ॥
[illegible] पूर्वपूर्वप्रतिय-
[illegible]
[illegible]
[illegible] ॥ पूर्वत्र [illegible] क्रमेण विशेषणं विधीयते ७

अनुमानं तदुक्तं ॥ यत्साध्यसाधनयोर्वचः यथा वह्नेर्तान्हरीचसाचलद्दृशो आपारयंति भवंयत्तत्रैव पततिसंततम

अथानुमानलक्षणमाह ॥ अव्यक्तादिति ॥ यत्रालेकारव्यक्तलिंगतः कालत्रयवर्त्तिनोऽतीतानागतवर्तमा
नस्य लिंगिनो अनुमेयस्य ज्ञानं भवति तदनुमानमुच्यते ॥ १६ ॥ अतीतोदाहरणं ॥ न्हनेनयइति ॥ न्हनेंऽस्मि न्
तं नयस्सदाजन्मकाले विमोः श्रीनेमेरमिवेकांमस्या अहूवन् अन्यथैतासुनहीं भुजनो लोकः स्नानेनक
थमञ्जुयाति ॥ १९ ॥ अनागतोदाहरणं ॥ जंभजिदिति हे त्वस्मि अहमेव मन्ये जंजित्कुमिदर्वं स्यादिति भ्रुवं
ज्योतिस्यावितिजंभतेतयावकं भवति यथावसो दुर्जनो निशाकरउदेष्यति १८ अथवर्त्तमानकालो
दाहरणं
सा प्रत्यक्षलिंगतो यत्र कालत्रितयवर्त्तिनः ॥ लिंगिनो भवति ज्ञानमनुमानं तदुच्यते ॥ १८ ॥ रुनेनय
सदाम्ववत्रमिवेकांमस्याविभोः ॥ अन्यथाकथमेतासुजनः स्नानेनमज्जयति ॥ १८ ॥ जंभजित्क
कुमित्रस्तानुरस्यादोषाकुरः किं करतोविभर्ति ॥ तथ्योवनस्याः हतिसापराधान्व ज्ञानिनो वेक्ति
मयेस्निग्धोति १९ ॥ श्रीमित्रस्य उपोमार्गेण · तत्र चत्रीकृतचापसंधितशरपैस्वत्कस्कोधनोधावतगतेवशासनधनुःसलेत
दोज्ञास्वरः अयवस्तुगत्वाद्या पासन विकरि पाठो नैव · तथापि धानुविसलकारित्व नम्न्या बोद्धुं मत्वादि
मुखपद्ममेति ॥ दोषाकरस्त्रं द्रमास्त्रस्याः स्त्रियामुखस्य किंकरता दासता विभर्तिं धरति किंवि · चंद्रमामु स्वयात्वितथा स्यात्
स्वपद्मभयावदनकांत्या बाधिता गृहीता कांतिर्यस्य सः चेयदि नोत ह्यें चंद्रमा अज्ञानि किं स्नि
ग्धोति किं पीडयति हेतुगर्भितविशेषणमाह ॥ रदृशा न्यथा तस्या नापकापासोचनोऽप्रियः शो
मायाहृदि हरणं तेन सापराधानियः किं लेतिसमे सेवको भवति तस्य शत्रुसपीडयति ॥ १४ ॥

प्रमाणां तराव गतमपि वस्तु प्राबल्येन प्रतिपादिते प्रजोयता नरा भावे तस्य योव त्त्वांतरव्यवच्छेदायत्व यं वस्थाति सा परिसं॰ख्या
अत्र प्रवाट परिसंख्याप्रांम ॥ ... मनोत्रयं प्रजो नरेतु वा ... नयो भेदः

वा॰भ परिसंख्या लक्षणमाह ॥ यत्र सा धारण मिति ॥ यत्रालंकारे किंचि त्साधारणमेकत्र प्रतिपाद्यते कथ्यते अ
न्यत्र स्थाने तन्निवृत्त्यर्थं सा परिसंख्या कथ्यते ॥ १४३ ॥ अथोदाहरणं ॥ यत्र वायुरिति ॥ यत्र नगरे यदं
केवलं वायुश्चौरो वर्त्तते केषां चौरः पौरस्त्रीरमसंपदां पुरस्त्रीदेहे रतस्येदमणुरपि पौरस्त्री रतसौ रभं
च पौरस्त्री रमस्य संपदा एतावता तत्र नगरे अन्य श्चौराः कोपि नास्ति यत्र युवानो यौवनस्थः पुरु
षः विधृजनादेव विभ्युः किं विशिष्ट एव धृजनीवृतकोधात एतावता न्यद्रूयं नास्ति ॥ १४३

यत्र वायुपुरे चौराः पौरस्त्रीरमसंपदां युवान अ... तक्रोधादेव विभ्युर्वधूजीनात् १४३ प्रश्ने यत्रो
तरव्यक्तेः ... प्रश्नोत्तरं तयान्नानां संसर्गसंकरं विदुः १४४ अस्मिन्नपारसंसार
सागरे मज्जतां शतां किं समालंबनं साधो रागद्वेषापरिक्षयः १४५

अथ प्रश्नोत्तरलक्षणोद्देलंकारमाह ॥ प्रश्ने यत्रोत्तरमिति यत्रालंकारे प्रश्ने उत्तरव्यक्ते प्रकटं भवति वा
गूढं भवत्य यथा गूढ ... भवति ते प्रश्नोत्तरमलंकारं विदुः यत्र पूर्व प्रतिपादितानामलंकारा
णां संसर्गसंयोग एकत्र मिलितं संकरं विदुरलंकारं १४४ अथोदाहरणं त्रयं क्रमेण दर्शयति ॥
अस्मिन्नपारेति हे साधो अस्मिन्नपारे संसारसागरे मज्जतां शतां किं समालंबनं व्यक्तं मुत्तरं रागद्वेषप

तद्वदित्यर्थः १४ ॥ उक्तमात्मस्वरूपज्ञानविवेचनप्रकारमाह वपुस्तु
षादिभिः कोशैर्युक्तं युक्त्यावघाततः ॥ आत्मानमंतरं शुद्धं विविंच्यात्तंडु
लं यथा १५ पंचकोशैरावृतात्मनि स्थितं वपुः स्थूलशरीरं तुषादिभिर्यु
क्तं तंडुलमिव युक्तं युक्त्यावघाततः अवहननात् शुद्धमात्मानं तंडुलमिव
विविंच्याद्विवेकेन जानीयात् कथमयं स्थूलदेहो नात्मा भूतकार्यत्वात्
घटवत् सूक्ष्मदेहोप्यनात्मा देहत्वात् स्थूलदेहवदित्यनुमानादिनांते
भ्यः कोशेभ्यो भिन्नमात्मानं विविंच्य जानीयादित्यर्थः ननु आत्मा
सर्वगतः तर्हि किं सर्वत्र सर्वैर्न दृश्यत इत्यत आह सदा सर्वगतोप्यात्मा
न सर्वत्रावभासते बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत् १६ ॥ आत्मा

१ ५ चव १ किट विचारे

न्यमिति तदुपाधिगुणमात्मानमेवधारयेत्तज्जानीयादित्यर्थः १२ नन्वन्न
न्नमयादिषु कोशेषु व्याप्य तत्तन्मयतयास्थितस्य कुतोनिर्मुच्यतइत्या
शंक्याह पंचकोशादियोगेन तत्तन्मयइवस्थितः शुद्धात्मा नीलवस्त्रा
दियोगेन स्फटिको यथा १४ अन्नमयप्राणमयमनोमयविज्ञानम
यानंदमयाः पंचकोशाः आदिशब्देनोशनापिपासादिग्रहणं एतै
र्योगेन मिथ्यातादात्म्येन तत्तन्मयइवस्थितः आत्मा शुद्धः नतुतेषु
वस्तुतोरंजितः वेदेपिसवाएषपुरुषोन्नरसमयइत्यादिभिः सूक्ष्म
वस्तुदर्शनार्थमेवोपाधिस्थंब्रह्मसूचयति नतुतत्वदृष्ट्या निर्मलस्फ
टिको नीलपीतवस्त्रादियोगेन तत्तन्मयइवाभाति वस्तुतोनातिरंजना

लेखा ७ दीर्घश्चेत्त्र्यमादौ तत्स्थाल्लघुयुग्मं अंते स्याद्रुतयुग्मं यस्याः सा
मदलेखा २५ मधुमती सकलवसुमती विदितदितमते नगणनगणगैः
रचय मधुमती २६ विद्युन्माला ८ दीर्घा यस्याः सप्तैव वर्णाः विश्रामः स्याद्वे
दैर्वेदैः औडुन्नमक्त्रोलीनाथप्रोक्ताभूर्निर्विद्युन्माला २७ प्रमाणिका लग।
स्थितिर्निरंतरा प्रमाणिकाष्टका लरा इयं परे रुदीरिता जगमरूपिणी
ह्निका २८ चित्रपदा भद्वितयं द्विगयुक्तं पन्नगनाथनिरुक्तं सज्जनचेत
सि वृत्तं चित्रपदाभिधवृत्तं २९ माणवकः यत्र गुरुस्याद्द्रुगणः सा लर
लोऽन्तस्थगणः माणवकः संप्रथितः छंदसि लोगो निहितः ३० अनु
ष्टुप् ८ पंचमो लोगुरुः षष्ठः सप्तमस्तु समे लघुः पादे हि विषमे गस्त्व।

२

छंदो को नुष्टुप्‌चक्रीर्तितः ३८ क चित्यादेनु विषमे पंचमाद्यास्त्रयो पिलाः तेषिकापिस

वेगाः श्लोके क्व चित्के वलपंचमः ३२ कमला ७ द्विगुणानगणसहितः सगणाइ

ह हि विहितः फणिवलिमतिविमला द्विनिधमवति कमला ३३ मणिवंधः भा

दितुरीयं पंचमकं षष्ठम घांत्यं स्यात् गुरु चेत् इंद्रियवेदैश्छेदि रतिस्तन्मणिवंधं

भाहफणी ३४ रूपामाला गुर्वो न्मानानवर्णाःयत्र स्युःसर्वे दीर्घाः सर्पेशेनोक्तं रू

पामाली संरंतं तद्वत्तं पक्षिश्रेष्ठाः केषांचद्वत्तं ३५ चंपकमाला १० प्रदरपंक्तिः

सा द्विगुणा चेद्दहार पंक्तेरहार पंक्तौ यत्र विरामः सा कषितार्हि चंपकमा

लावनितविशाला ३६ सारवती चद्भगणत्रितयं कमतः सा द्गुरुरेणगजेनाग्र

मतः श्रीयशवंतनृपप्रथिता सारवती कवितिः कथिता ३७ सुषमा गतिः प

ता

621

दिदशामंगुरुविहितं विशिरवमितंसुकविहितं स्रमभनगात्तिः फणिकथितादलयतिका
न्दपविहिता ३८ हंसी स्याद्वद्धर्गोमभनगाण्नः पश्चाद्दीर्घौविपुलफणिनः हंसी
ख्याता छ्कतिरसयतिस्तस्यांकेवां नजयतिमत्तिः ३९ सुंदरी सगणौजगणौगु
रुभविहिविषमेचेच्चरणेदशाक्षरे समरालगुरुहरावरे समपादेयदिसुंदरीतदा
३० इंद्रवज्रा स्याद्यद्यदयंपंचमकंतुरीयंचेदष्टमंदीर्घमुपांत्यमंत्यं तदींद्रवज्रा
भवसंख्यवर्णैर्हृता न्दपश्रीयशवंतसिंह ४१ उपेंद्रवज्रा यदींद्रवज्राचरणा
द्यवर्णोनरेंद्रसर्वेलघवोभवंति उपेंद्रतुल्यामलशीलशालिन्नुपेंद्रवज्राभि
हितातदानी ४२ उपजातिः उपेंद्रवज्राचरणोपपन्नश्चेद्दिंद्रवज्राचरणः
प्रयुक्तः स्वछंदविन्यासवशेनवृत्तंतदोक्तमाद्यैरुपजातिसंज्ञं ४३ रथोद्ध
ता रान्नरोयदिगणेनसंज्ञकोरस्ततोलघुगुरूनिवेशिनो गौडवंशतिल

कण्ठकाशिलासानंदाकविकुलैरथोद्धता ४४ स्वागता रोगणोऽथ नगणो भगणो
यत्र द्वौ गुरू च निहितौ यदि सा स्यात् स्वागतेति यशवंतनरेंद्रा स्वांमुमाननयनयोन्न
तशील ४५ दोधकवृत्तं संगररंगभुवि क्षितिपालिमृद्धसुनाति तमृत्तिं कृपाणे
चेद्भगणत्रितयं गुरुयुग्मं दोधकवृत्तमुदाहृत दानी ४६ शालिनी दीर्घावर्णाः
पंच षष्टान्त्यरो ह्रावं त्यो पांत्यो चेद्यातिवेदर्षिलोलैः गौडहस्त्व क्ष्मापतेर्वैशराहं सप्रोक्ता
वृत्तिः शालिनी नामधेया ४७ हरिणप्लुता १२ विषमे सुगणत्रितयं लगवद्य
समे नगणो भगणौ च रः यशवंतमहीश नदोदिताकविकुलैरमला हरिणप्लुता
४८ द्रुतविलंबितं नगणतो भगणौ रगणस्ततो यदि भवेद्यशवंतमहीपते द्रुतवि
लंबितमेतदुदीरितं कविवरैरभितो विदितं हितं ४९ तोटकवृत्तं स्वयशोधिकशोभि
तभूमिपते सगणैरिह वेदगुणैः सुमते प्रभ तोटकवृत्तमिदं विहितं ननु नेऽलिमुद
हृदये निहितं ५० प्रमिताक्षरा सगणद्वादीह जगणो निहितः सगणस्ततोपि सगा

623

६

राहुर्दृष्टो दशाघस्तेस्तु केतुर्भौमस्य सोमगा वत् ग्रनिर्दं डं ग्रहोभ्यो के नक्षत्रं स्वनसंशयः ॥७॥ षट्
द्विनं वांध वेप्रोक्तं ग्रनिर्दं डं विचक्षणैः स्वनाम्मानिहन्तं जानं स्वं स्वं भुक्ति न संशयः ॥८॥
दशा दशाहन्ता कायो परमायु विभाजिता अंतर्दशाविकं पोक्तं विदुः स्वं सर्वतः सदा
॥९॥ दशा दशा हन्ता पद्माप नराम हन्ता चया युगा रोमं तर्दशा याः स्तु विनायासेन जायते
॥१०॥ दशा दशा हन्ता य द्वा चोर्द्धं मास मा रोम भवत् अर्द्धं द्वि गुणं त्रि घुंभ वेदं तर्दशा फलं
॥११॥ स मापूर्वा राम हन्ता यद्वा वायन्स समाहृताः तन्मध्ये तर्दशा नस्य विनायासे न जायते

त

॥१२॥ कृत्वा चांर्दशा पिंडं परमायु विभाजितं ध्रुवं समाहृते यस्य तस्य स्याद्वि दशा
फलं ॥१३॥ कवेरं तर्दशा रेवट वर्ष षस्सं शम्भ व्यत्तर्दशा नाथ ट्रिनै ह्नाश नेरा हो विंटे
गेताः ॥१४॥ इंदोरार्द्धिं तश्चो नि सद्या दृष्ट अंशार वेर्मे वेत दशा नाथ ट्रिनेर्द्धितं मिंदं केतोः

यत्र सर्वं फलं वदेत् । धीमान् मारकादि परत्वानि च ॥३०॥ कामार्थपति संबंधी म नको
परिणयं कवित् [illegible] लग्नतः कामनाथस्य च दशायां वा ॥३१॥ कोणनाथस्य
संबंधे दशायां स्वकेतु दशायां [illegible] पुत्रादीनां वदेत् जन्मसु धीमता [illegible] सारतः ॥३२॥ इति
श्रीमानसागरीये [illegible] प्रकाशने के द्वितीयः ॥२॥ मातृ चंद्र द्वादश राशेः [illegible] मंद [illegible] भागे वा
जन्मर्क्षे नवशेषे तु द्विहीने [illegible] दशाधिपाः ॥१॥ एतद्दशा [illegible] विसमांशघ्न तिल सैका४
था अन्य [illegible] शेल [illegible] क्रमेण कथिता बुधैः ॥२॥ [illegible] दशाम्पस्तं स
भोगात्पूर्वं समादिकम् ॥ गतं भोग्यं समाभ्यस्तं [illegible] भोग्यं समाहृतं ॥३॥ [illegible] नुसारेण म
नैः स्वं दशानां [illegible] ततः [illegible] समा [illegible] नेमे व न संशयः ॥४॥ षष्टि [illegible] व
मान मासयुग्मं निशाकरः भौमः [illegible] ॥५॥ [illegible] श
[illegible] जीवः [illegible] दिनं [illegible] शनिः [illegible] ॥६॥

यं गंधग्राहकं घ्राणं नासाग्रवर्ति विषयो मृत्पाषाणादिः ॥ शीतस्पर्शरसवत्य आपः ता
श्च द्विविधा नित्याऽनित्याश्च ॥ नित्याः परमाणुरूपाः अनित्याः कार्यरूपाः पुनस्त्रिविधाः शरीरेंद्रि
यविषयभेदात् शरीरं वरुणलोके इंद्रियं रसग्राहकं जिह्वाग्रवर्ति विषयः सरित्समुद्रादिः उ
ष्णस्पर्शवत्तेजः नित्यमनित्यं च नित्यं परमाणुरूपं अनित्यं कार्यरूपं पुनस्त्रिविधम् ॥ शरी
रेंद्रियविषयभेदात् शरीरमादित्यलोके इंद्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति ॥ विष
यश्चतुर्विधः भौमदिव्योदर्याकरजभेदात् भौमं वह्न्यादिकं अबिंधनं दिव्यं विद्युदादि भुक्तान्न
परिणामहेतुरोदर्यम् आकरजं सुवर्णादि ॥ रूपरहितस्पर्शवान् वायुः स द्विविधः नित्यो
नित्यश्च नित्यः परमाणुरूपः अनित्यः कार्यरूपः पुनस्त्रिविधः शरीरेंद्रियविषयभेदात् श
रीरं वायुलोके इंद्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति विषयो वृक्षादिकंपहेतुः शरीरांतः

ॐ तर्कः

२

[illegible]

संचारी वायुः प्राणः सएकोप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते शब्दगुणमाकाशम्॥
तच्चैकं विभु नित्यंच अतीतादिव्यवहारहेतुः कालः सचैको विभुर्नित्यश्च प्राच्यादिव्यवहारहे
तुः दिक् साचैका नित्या विभ्वी च ज्ञानाधिकरणमात्मा सद्विविधः परमात्मा जीवश्च तत्रेश्व
रः सर्वज्ञः परमात्मा एक एव जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च सुखाद्युपलब्धिसा
धनमिंद्रियं मनः तच्च प्रत्यात्मनियतत्वादनंतं परमाणुरूपं नित्यं च इति द्रव्यनिरूपणं
इति अथ गुणाः कथ्यंते चक्षुर्मात्रग्राह्यो गुणो रूपं तच्च शुक्लनीलपीतरक्तहरितकपिश
चित्रभेदात् सप्तविधम् पृथिवीजलतेजोवृत्ति तत्र पृथिव्यां सप्तविधम् अभास्वरं शुक्लं ज
ले भास्वरं शुक्लं तेजसि रसनाग्राह्यो गुणो रसः सच मधुराम्ललवणकटुकषायतिक्तभे
दात् षड्विधः पृथिवीजलवृत्ति तत्र पृथिव्यां षड्विधः जले मधुर एव घ्राणग्राह्यो गुणो गं

पृथिवीजलयोर्मध्ये

626

२

राम

२

पः स द्विविधः सुरभिरसुरभिश्च पृथ्वीमात्रगमौवृत्ति त्वगिंद्रियमात्रग्राह्यो गुणः स्पर्शः स
त्रिविधः शीतोष्णानुष्णाशीतभेदात् पृथिव्यप्तेजोवायुवृत्तिः तत्र शीतो जले उष्णस्तेजसि
अनुष्णाशीतः पृथिवीवाय्वोः रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च अन्येषां पाक
जं नित्यमनित्यं च नित्यगतं नित्यं अनित्यगतमनित्यं एकत्वादिव्यवहारासाधार
णहेतुः संख्या नवद्रव्यवृत्ति एकत्वादिपरार्द्धपर्यन्ता एकत्वं च नित्यगतं नित्यं द्वित्वादि
कं तु सर्वत्रानित्यमेव मानव्यवहारासाधारणकारणं परिमाणम् नवद्रव्यवृत्ति तच्चतु
र्विधम् अणु महद्दीर्घं ह्रस्वं चेति पृथग्व्यवहारासाधारणकारणं पृथक्त्वं सर्वद्र
व्यवृत्तिः संयुक्तव्यवहारासाधारणं हेतुः संयोगः सर्वद्रव्यवृत्तिः संयोगविना
शको गुणो विभागः सर्वद्रव्यवृत्तिः परापरव्यवहारकारणं परत्वापरत्वे ते द्विविधे

पृथिव्यादिचतुष्टय
जो रे
त्री
रूपरसगंधस्पर्शानि
त्यत्व

ओं
तर्क
२

628

दिक्कृते कालकृते चेति दूरस्थे दिक्कृतं परत्वं समीपस्थे दिक्कृतमपरत्वं ज्येष्ठे कालकृतं परत्वं
कनिष्ठे कालकृतमपरत्वं आद्यपतनासमवायिकारणं गुरुत्वम् पृथ्वीजलवृत्तिः
स्यंदनासमवायादिकारणं द्रवत्वम् पृथिव्यप्तेजोवृत्तिः स द्विविधम् सांसिद्धि
कं नैमित्तं च सांसिद्धकं जले नैमित्तिकं पृथ्वीतेजसोः पृथिव्यां घृतादौ अग्निसंयो
गजं द्रवत्वं तेजसि सुवर्णादौ अग्निसंयोगजं द्रवत्वम् स एव नैमित्तकः चूर्णादिपिं
डीभावकरणहेतुर्गुणः स्नेहः जलमात्रवृत्तिः श्रोत्रग्राह्यो गुणः शब्दः आकाशमा
त्रवृत्तिः स द्विविधः ध्वन्यात्मको वर्णात्मकश्चेति ध्वन्यात्मको भेर्यादौ वर्णात्मकः सं
स्कृतभाषारूपः सर्वव्यवहारहेतुर्ज्ञानं गुणो बुद्धिः सा द्विविधा स्मृतिरनुभवश्च संस्का
रजन्यं ज्ञानं स्मृतिः तद्भिन्नं ज्ञानमनुभवः स द्विविधः यथार्थोऽयथार्थश्च तद्वति तत्प्रकार

पं यथार्थस्तद्वति तत्प्रकार
कारकं अयथार्थ इति शेषः। श्रीरामचंद्रसी
कृष्णा
यनमः

गच्चारुस्तानि दाने चतुष्टयं दक्षिणा किमर्थं दीयते॥ यतिनोक्तो हे देव आहारदाने देहस्थित्यर्थं दीयते अत एव आ
हारदानं मुख्यं। येनाहारदानं दत्तं तेन सर्वाण्यपि दानानि दत्तानि। तथा चोक्तं। उरगतुरगसद्रथगोकुलं भूमिदानं क
नककरजतपात्रं मेदिनीसागरांतां सुरयुवतिसमानैः कोटि [illegible] कदानं न हि भवति समानं। अन्नदानात्प्रधानं॥ औ
षधदानमपि दातव्यं। येन रोगक्लिष्टो निर्भवति तदौषधदानं [illegible] विनाशे सति तपोजपासंजमं च करोति सुतः कर्म
क्षयं करोति मोक्षं च गच्छति तेन तत्कारणे [illegible] नौषधदानं दातव्यं। तथा चोक्तं। रोगिभ्यो भेषजं देयं रोगा
र्त्ते देहविनाशः को देहनाशे कुतो ज्ञानं ज्ञानाभा वे न निर्वृतिः॥ १ द्वारवत्यां वासुदेवेन औषधदानेन तद्धारकस्य
त्र्यं तेन औषधदानफलेन तीर्थंकरगोत्रं नाम कर्मोपार्जितं॥ अत एवैकौषधदानमपि श्रेष्ठं। अभयदानम
पि [illegible] यः एकं जीवं रक्षति मः सर्वे दानतेभ्यो भवति किं पुनः सर्वान्। तथा चोक्तं। दीयते सर्वदा दानं अत्रयेसर्वेद
त्तं [illegible] तस्मिन् भवे जीवो निर्भयोऽभयदानतः। अन्यच्च। यो दद्यात्कांचनं मेरुं कृत्स्नां चापि वसुंधरां। एकस्य जीवि
तं दद्यात् [illegible] फलेन न समं भवेत्॥ १ गोदाने हिरण्यदाने भूमिदाने च चैव च। एकस्य जीवितं दद्यात् फलेन न समं भवेत्॥ २
अनादीयकल्पपाचंडालयोः कथा॥ तदेव केवली कथायुक्तं घाजालवदयो विदायया पात्राय दाने दत्ते तिलदानं नि

नराश्चैरा[illegible]रायणाय दृहिणस्तेषां सुतनावना तावात्तु तपोधनोक्तो नो शीलं परिपालयेति। दृहिणस्तस्तपोधनस्मा
ज्ञाते [illegible] निरस्तो हृल लब्धिया तेषां नस्सद्भावना ऽ इत्येवं निपुणेन हृतमनसा सम्यग्मया निश्चितं। नो ज्ञारोस्तव कृ
[illegible] दानावलेवात्परः॥१॥ एत एव मुनीनां दाने दातव्यं मुक्तेः कारणं तएवानंदंति॥ दृहिणः तपोधनोक्तो॥
[illegible] सुरासुरेंद्रमहितं मुक्तेः परं कारणं रत्नानां दद तित्रयं त्रिभुवनप्रद्योतकाः। येसति दृष्टिस्तस्य यदत्ततः परमयात्त।
[illegible] पिता जायतां तेषां तद्गृहे मेधिनां गुणवतां धम्मोनिकस्य प्रियं॥ तदानंतरं करोमुकुलीकृत्य विश्वभूतिर्द्विज
ब्रवीति। राजानपतिस्ति विश्वभूते मुनिं दत्ताहारदानफलेममाद्य प्रयच्छामम बकुसुवर्णयज्ञफलादेवां दानावि
[illegible] तिनाऽनि ते निराज हृस्वर्ग्यादिकं येन दानेनसाध्यंते। तद्दानेकवेदायतं। राजोक्तो त्वं दरिद्रोवा स्थितमर्वं
गृहेवा मुनिदत्ताहारदानफलादीयते विश्वभूतिनाऽक्तानि। नाल्पतो दरिद्रपीडितोपिसत्पुरुषानीतिं परित्यज्य
[illegible]न्यथा करोति किं॥ तपोधनोक्तो॥ कुसुमापि रूपान्वितोपि सिथिलप्रायोपिक ष्टो दशामापन्नोपि विपन्नदीधितिरपि प्रातेः
[illegible] पिमत्तेनेंड विलिन्न कुंनदंलनयासेकबद्धस्पृट् किंजीर्णदृष्टिणमात्रिमानमहतामग्रेसरः केशरी॥ ततस्तस्य
[illegible] पवर्णसाधकं। आहारस्तस्य तेषस्यग्रा स्वमितिदामेन चतुष्टयं प्रविश्य वनिर्विक्रीयते। ततो मुनिना वसमीपे

काचन तर्हि परार्थानुमितिरूपत्वात्तत्कारणं वाच्यं परार्थानुमितिरिति । अत एव अनुमानवाक्ये पंचावयवा इति ॥ = इष्टपक्षोपाः = १

उक्त्या व्याप्यमात्रमिति दिशति । व्यावर्तकः अपक्षोपि व्याप्यत्वात् ॥ एवं विपक्षो ॥ = १

वक्ष्यमाण ॥

क्तः सपक्षं च साध्यसिद्ध्यर्थं च सिद्धिनि दृष्टान्ता हेतुर्मिरूपयन्ते ॥ सिद्धान्तं नामानिर्वचनीयत्वं दृष्टान्तत्वं नाम चेतन्म

विपक्षत्वं ॥ अनेनान्वयव्यतिरेकव्यभिचारः नेत्यन्वयमात्रमन्वयि रूपमेकमेव यत्र केवलान्वयि अस्मन्मते अ।

व्यतिरेकिसमर्थस्य अन्यत्राभावप्रतियोगित्वेन तदप्रतियोगित्व रूपकेवलान्वयित्वं साध्यसि।

द्धेः नापि व्यतिरेकि साधनेन साध्यानुमितौ साध्याभावसाधनाभावव्याप्तिज्ञानस्यानुपयोगात् अ

न्वयव्याप्तिमविदुषः साध्यप्रमायां पत्तिप्रमाणान्तरमित्वन्ये साहृश्यप्रमितिरुपमितिः तत्का।

करणीकाप्रमाणाह्री शाब्दं तु आप्तवाक्यजन्यं संज्ञिविषयमन्वयप्रमप्रदायो वाक्यं अत्र यानपपत्तिर्तको।

त्ता ॥ वाक्यार्थः वायोग्यता ॥ अविलम्बेनोच्चारणं सन्निधिः ॥ अत्र मन्त्रस्य संगतिग्रहात् अन्वा

वार्थप्रमा ॥ पदपदार्थयोः स्मार्यस्मारकभावः संगतिः सा च द्विधा शक्तिर्लक्षणा चेति शक्तिर्ना

मन्नरव्याहृतिः पदपदार्थयोर्वाच्यवाचकभावः संबंध इति यावत् सा च द्विधा योगरूढिभेदेन त्रि

पोपपत्तलक्षणमाह = ३ ॥ तत्र कारणाय पोपपत्तेति । तथापि गौरवः प्रकृत्या ... दा वतिव्याप्तिः स्यात्तत्र संधि

नाक्रिः नेति वाक्येऽति व्याप्तिः स्यात् तत्र ... विषयो विषयत्वविवक्षिततया नास्ति संभवः = ४ ॥ कोऽसौ मुख्य ...

... इति ॥ ... अविलम्बेन ... इति भावः ३ ॥ विषयवाक्यं ...

॥ कल्पं तदुक्तं पदमध्य ...

तद्धेतोर्दृष्टान्तप्रकारेण ... केवलं ... पदार्थस्य तत्त्वं ... पक्षं ... न्यायेन ... तथा वाक्यांगत्वेन पक्षसमर्थितव्याप्ति ... हेतुः सा कोऽत्र ४ =

पदसमुदायो नार्थपिसुक्ते विलं वेद्यामित पदसमुदाये ... सन्निधीति । तावस्तके ... वाक्यं ...

इति ॥ कवलं ... व्यतिरेक ... केवलव्यतिरेकिणः ... नन्वेवं ... अनुमितिः ... तदाह । अन्वयेति = ४ नत्र लक्षणं ... साध्य ... इति ... दृष्टान्त ... अत्र ... इति । संग ... वाक्यार्थ ... कानर ... नदर्शन ... ५ तदमा ... अन्वार्थप्रमा इत्यर्थः = ३ ... पदे ... पदत्व ... इति ... = २

णा उदाहरणेषु नन्वनिगमनरूपो वा नन्वाहि जीवः परस्माद्भिद्येत सच्चिदानंदलक्षणा-
ऽभावात् परमात्मवदित्यत्र जीवः परस्माद्भिद्येत इति प्रतिज्ञा सच्चिदानंदलक्षणत्वं हेतुः
दृष्टेऽपि लिंगमिथ्यात्वेन यः सच्चिदानंदलक्षणः स परस्माद्भिद्येत यथा परमात्मेत्युदाहर-
णं शुद्धब्रह्मास्मीति भवामीति करणं प्रयोगेन भवामीत्यनुभवो जीवस्य सच्चिदानंदलक्षण-
त्वं श्रुतौ न हेत्वसिद्धिः सत्यं ज्ञानमनंतं ब्रह्म आनंदो ब्रह्मेति व्यजानादित्यादिश्रुत्या ब्रह्मणः
सच्चिदानंदलक्षणत्वं श्रुतौ न दृष्टांतासिद्धिः एवं तत्त्वमस्यादिश्रुतिर्वेदांतस्य बोधितं परार्थस्य
स्वस्मिन् सच्चिदानंदलक्षणादर्शनात् अहं ब्रह्मेति ब्रह्मास्मि त्वमसीति रूपेण न तत्त्वोपनिषदस्य
ब्रह्मस्य श्रवणमाननमनन्तपपत्तिर्मंतव्य इति मननविधानात् वेदांतसहकारित्वेन श्रुतनुमा-
नप्रमाणस्वीकारात् परार्थानुमितिस्तन्न्यायोपदेशेनोन्नयनेन न्यायोपदर्शनः एवं ब्रह्मत्वानिति।

शविस्तारइत्यत्र कथितः अर्थात् साक्षाद्धर्मिणो दशरथादी
नां पुत्रपौत्रप्रपंचः तथा च वक्तुः कथनसामर्थ्याद्भूतं भविष्यं च
वृत्तं सर्वं कथनसमयेऽस्य संभवतीति वाल्मीकिविरचि
तरामायणादावुक्तं एवं नारदादिष्वपि परत्वयमनुभवो
भक्तानां सहृदयानां चैव ननु कथनेन कथायाः शरीराभि
स्फुरणादरिद्राणां किंच सन्ति वा देशकालौ च शौनकाह्वाण
संपदः पश्चैतान्विस्तारोहन्ति तस्मात्ते हि तत्र विस्तर मिति मनुव
चने कथनस्य वर्णरूपार्थाभावेपि विस्तर इति प्रयोगो दृश्यते
एवं ब्रह्मणो मानसः पुत्रो गोपतिर्नाम मानवः तस्य वंश
स्य विस्तारं क्षमो वक्तुं नरः कथमिति भविष्यपुराणस्य श्लो
के कथनरूपार्थेपि विस्तार इति प्रयोगस्य दर्शनात् अथ
वा केवलात्स्तृधातोर्घञ्प्रत्यये कृते प्रथमाविभक्तियोगे वि
स्तार इति प्रयोगो भवति स च समुदायवाच्यत्वाद्विस्तृतरूपा
र्थस्य बोधकः ततो वंशशब्देन समासः अथवा वंशविस्ता
र इति साधुप्रयोगो जायते अथवा यथा महाभारते चक्र
वत्परिवर्त्तनं गृहीत्वा पाणिनाकरमितिश्लोके परिवर्त्तनं त
मित्यत्र पुंस्त्वं तङ्भावश्चार्षः एवमत्रापि वंशविस्तार इ
त्यार्षप्रयोगः एवं च कथितो वंशविस्तारो भवतेऽस्मद्युष्मे
वेति कस्यचिज्जन्मांधस्य कथनमेवायुक्तमिति ॥ १ ॥

निगमकल्पतरोर्गलितमित्यादि अत्र वेदनित्या
कृतार्हिपतितमिति निबन्धेन गलितमित्युक्तम्

एकादश्यांद्वेपंचम्योवात्रासम्बद्धमेवश्रूयतेति
वक्तृभ्योपिवनैत्यशुद्धमेव ॥

निगमकल्पतरोर्गलितं फलमितिश्लोकेश्रीमद्भागवतस्य महापुराणस्यवेदकल्पवृक्षस्यफलरूपत्ववर्णनेनास्यवेदरूपत्वंप्रतिपादितंवेदशब्दः ऋगादीनामिवपुराणादीनामपिवाचकः तदुक्तंसामसुकौथुमीशाखायांछां ।
दोग्योपनिषदि ऋग्वेदंभगवोध्येमियजुर्वेदंसामवेदमथर्वणंचतुर्थमितिहासंपुराणंपंचमंवेदानांवेदमित्यादि मनुः इतिहासपुराणाभ्यांवेदंसमुपबृंहयेदिति नह्यवेदेनवेदस्यबृंहणंभवति नह्यपरिपूर्णस्यकनकवलयस्यत्रपुणापूरणंयुज्यते पूरणात्पुराणमिति चान्यत्र भविष्यपुराणेऋग्यजुःसामाथर्वाख्याः काव्यंरामायणंतथा ।
भारतंपंचरात्रंचवेदाइत्येवशद्भिताः पुराणानिचसर्वाणिवेदमवानिविदोविदुः स्वतःप्रामाण्यमेतेषांनात्रकिंचिद्विचार्यतइति पुराणादीनामपिऋग्वेदादिवदपौरुषेयत्वं ।
माध्यंदिनश्रुतावुक्तम् एवंवाऽरेस्यमहतोभूतस्यनिश्व ।
सितमेतद्यदृग्वेदोयजुर्वेदःसामवेदोथर्वांगिरसइतिहासःपुराणमित्यादि अपरार्के मत्स्यपुराणे मत्स्यउवाच पुराणंधर्मशास्त्राणांप्रथमंब्रह्मणास्मृतम् अनंतरंच वक्रेभ्योवेदाअस्यविनिर्गताः पुराणमेकमेवासीत्तस्मिन्कालांतरेपिच त्रिवर्गसाधनंपुण्यंशतकोटिप्रविस्तरं

तदर्थोऽत्र चतुर्लक्षे संक्षेपेण प्रदर्शितः पुराणानि दशाष्टौ च सांप्रतं तदिहोच्यते नामतस्तान्प्रवक्ष्यामि शृणुध्वमृषिसत्तमा इत्यादि शिवपुराणस्य वायवीयसंहितायाम् संक्षिप्य चतुरो वेदांश्चतुर्धा व्यभजत्प्रभुः व्यस्तवेदतया लोके वेदव्यास इति श्रुतः पुराणमपि संक्षिप्तं चतुर्लक्षप्रमाणतः अद्याप्यमर्त्यलोके तच्छतकोटिप्रविस्तरमिति एवं चात्र वेदनिन्दाकृता हीति कस्यचिद्विक्षिप्तस्य कथनमेव अत्र गलितमिति पदं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनैरखंडमेवावतीर्णं न तु त्वनिपातेन स्फुटितमित्यर्थकम् अत्र शब्दश्लेषेण च भागवतं रसं नाम भगवत्संबंधि रसमिति ज्ञेयम् तत्पक्षे गलितमित्यनेन तस्य सुपाकिमत्वेनाधिकस्वादुत्वं दर्शितम् शास्त्रपक्षे सुनिष्पन्नार्थत्वेनाधिकस्वादुत्वमिति ज्ञेयम् एवं च पतितमिति वक्तव्ये गलितमित्यशुद्धमिति कस्यचित्प्रमत्तस्य कथनमेवाशुद्धम् निगमकल्पतरुपदोत्तरवर्तिनी या षष्ठी तस्याः फले ऽन्वयः शुकमुखादिति पंचम्याः गलितमित्यत्रान्वयः एवं च स्कन्धषष्ठीद्वे पंचम्यौ वात्रासम्बद्धमेवेति कस्यचित्कथनमेवासंबद्धम् शास्त्रपक्षे यतः श्रीमद्भागवतं रसात्मकफलस्वरूपमतः पिबत एवं लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा भूयाद्धारतपंकजमित्यत्र यदीयानां

तेनेतिशेषः

वाचामसतमधमावामभिरससमित्यादावपिज्ञेयम् भगव
त्संबंधिरसपसेनुरसस्यपानमेवसंभवत्यतआहपिबत
इति इत्यंचमरागेनेलिवकव्ये पिबतेत्यशुद्धमेवेति क
स्यचित्कथनमेवाशुद्धम्

नेमं विरिञ्चिर्न भवो न श्रीरप्यंगसंश्रया प्र
सादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात्॥१॥
अत्रैकोनकारः सार्थको द्वावनर्थकौ स्तो निं
दाचकृताब्रह्मादीनांदेवक्यादीनाञ्च ॥०॥

अत्रइमं पूर्वोक्तं प्रेमपरीपाकरूपं प्रसादं नविरिंच्यः
प्रापनभवः प्रापनश्रीरपिप्रापेत्यर्थः अथवागोपी
यत्तत्प्रापतद्रूपमिमं विरिंच्यादयोनलेभिरेनलेभिरे
नलेभिरे नञत्रयवशेन क्रियावृत्तिः अथवानेमशब्दो
ऽर्द्धवाचकः तदुक्तं सिद्धान्तकौमुद्यां नेमइत्यर्द्धे समः स
र्वपर्यायइति तथाचविरिंच्यादयोनेममर्द्धमपूर्णं प्र
सादंनलेभिरे नअपितु लेभिरएवगोपीत्वित्यादिव्या
ख्येयम् अत्रैकोनकारः सार्थकोद्वावनर्थकौस्त इत्यु
क्तकथनमेवानर्थकम् अत्रयशोदायाः शुद्धवात्स
ल्यभावेन परमोत्कर्षवर्णनम् नत्वदेवक्याऐश्वर्यसंव
लितभावेननशुद्धवात्सल्यभावः ब्रह्मादीनांनरा
कारपरब्रह्मणिनवात्सल्यभावः इत्यमेवप्रेम्णाय
परमाकाष्ठाप्राणपरित्यागावधिविरहासहिष्णुता

रूपेत्यादि मधुसूदनसरस्वतीभिरुक्तम् आदिपुराणे च तेनेब्रह्मादयोदेवा वांछंति मदनुग्रहम् प्रयत्नेना सांगोपीनांप्रेमानुग्रहवांछकः भावानुरूपंसर्वत्र पार्थव्यवहराम्यहम् किंतुतासुव्रजस्त्रीषु परिकीर्तनं वानिशामिति एवंचनिंदा चकृतेत्यादिकंकस्यचि ।

न्निन्दकस्यकथनमेवेति

विप्राद्विषड्गुणयुतादरविंदनाभपादारविं
दविमुखाच्छ्वपचंवरिष्ठम् अत्रब्राह्मण
निंदाकृता अव्यक्तंव्यक्तिमापन्नंमन्यंते
मामबुद्धयः अस्माद्विरुद्धत्वादसुरोऽपि ।

अत्रभगवद्भक्तानां माहात्म्यवर्णनेभक्तिहीनानां निन्दनेचनाश्चर्यम् नब्राह्मणनिन्दने एवंपद्मपुराणे ब्राह्मणःक्षत्रियोवैश्यः शूद्रोवायदिवेतरः विष्णुभक्तिसमायुक्तोज्ञेयःसर्वोत्तमोत्तमः चांडालोपिमु । निश्रेष्ठो विष्णुभक्तिपरोयदि विष्णुभक्ति विहीनस्तु द्विजोपिश्वपचाधमइति क्रियायोगसारेजैमिनिं प्रतिव्यासवाक्यम् यस्मिन्कुलेद्विजश्रेष्ठजायंतेवै ष्णवाजनाः उत्तमंवानुत्तमंवातत्कुलंमोक्षगामिचे ति शंकराचार्यधृतकात्यायनवचनेच वरंहुतवह ज्वालापंजरस्यान्तर्व्यवस्थितिः न शौरिचिंताविमुख जनसंवासवैशसमिति नारदीयेरुक्मांगदंप्रतिब्रह्म

देववाक्यम् श्वपचोपिमहीपालविष्णुभक्तोद्विजाधिकः विष्णुभक्तिविहीनोपियतिश्चश्वपचाधिकइति एवंचा त्रब्राह्मणानिंदाकृतेनिकस्यचिन्निंदकस्यकथनमेवे तिकृष्णरूपेणप्रादुर्भूतंमांपामराअव्यक्तंमन्यन्तइत्य र्थः अनंतफलायाहोरवल्लकष्टंवर्त्ततइत्यनुक्रोशान्द र्शयतिभगवान् किंनिमित्तंत्वामेवनप्रपद्यंतइत्युच्यते अव्यक्तमिति अव्यक्तं अप्रकाशंव्यक्तिमापन्नंप्रकाशं गतमिदानींमन्यंते मांनित्यप्रसिद्धमीश्वरमपिसंतमबु द्धयोऽविवेकिनइतिशंकरभाष्यम् उक्तेवैपरीत्येकारणा मविवेकातिरिक्तंनास्तीत्यभिप्रेत्याह अहोरवल्विति। भगवद्भजनस्योत्तमफलत्वेपिप्राणिनांप्रायेणतन्निष्ठ त्वाभावेप्रश्नपूर्वकंनिमित्तंनिवेदयति किंनिमित्तमि त्यादिना अप्रकाशंशरीरग्रहणात्पूर्वमितिशेषः इदा नींलीलाविग्रहावस्थायामित्यर्थः प्रकाशस्यनर्हिका दाचित्कत्वंभगवतिप्राप्तंनेत्याह नित्येति कथंतर्हीत्या दितट्टीका एवंचअस्मादिरुद्धत्वादशुद्धोपीतिकस्यचि त्पामरस्यकथनमेवाशुद्धमिति ॥ ॥ ॥

कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येतविना पशुघ्नात् अत्रवेदविहितकर्मकर्तृणांनिन्दाकृताऽथ र्थाद्वेदानामपि नास्तिकोवेदनिन्दकइत्युक्तंमनु ना अतएवायंभागवतस्यास्यकर्त्तानास्तिकः

ऽत्र भगवत्कथामाहात्म्यवर्णनं तद्विमुखानां च निन्दनं कृतम् वायुपुराणे स्कन्दपुराणादौ चैतद्विस्तरेण कथितं तत्रैवावलोकनीयम् योगोऽवातं कनकशृंगमयं ददाति त्यादौ चरितं रघुनाथस्येत्यादावपि तथैवोक्तम् ऽत्र वेद विहितेत्यादिकथनं तु कस्यचिद्दुष्टस्यैव यतो वेदव्यास स्य वेदरूपस्यास्य श्रीमद्भागवतस्य चायं निन्दकोऽतो मनुवचनान्नूनमयं नास्तिक एवेति ॥ ॥ ॥

यद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि० ऽसम्बद्धोयं श्लोकः ॥

ऽत्रापद्याद्यादियुक्तेपिवाचां प्रयोगे यस्मिन् भगवतो नामानि संति स कल्मषघ्नः चित्रपदादियुक्तेपि यत्र भगवतो नामानि न संति स तु न पापघ्नः लौकिकभाषायामपि भगवतो नामकीर्त्तनादिकं पापनिवर्त्तकमिति तदुक्तं मात्स्ये दंष्ट्रिदंष्ट्राहतो म्लेछो हारामेति पुनः पुनः उक्त्वा मुक्तिमवाप्नोति किं पुनः श्रद्धया गृणन्निति इत्यं चास म्बद्धोयं श्लोक इति कस्यचिद्दुर्जनस्य कथनमेवासम्ब द्धमिति

व्यासनारदसंवादे व्यासस्यापि निंदा कृता व्यासः शोकातुरोऽभूत्तत्र नारद आगतः पुनर्नारदेन बोधित इति व्यासस्तु नारायणावतारस्त स्य कथं शोकः संभवेत्

ऽत्र प्राधान्यतो भगवद्यशो ऽवर्णनेन व्यासस्य शोकानुरत्वं कारणान्येषां वार्त्ता नारदेन भगवद्भक्तिवर्णने प्रेरितो व्यासस्तद्वर्णनेन विशोकः सन्परमानन्दं प्राप्तवान् ऽतो भगवद्भक्तिः शोकनाशिनी ब्रह्मज्ञानादपि परमानंददायिनी तिनाश्चर्य्यम् किंच यथा महाभारते पुत्रवियोगेन व्यासस्य शोकानुरत्ववर्णनम् यथा वा वाल्मीकिविरचितरामायणे रघुनाथस्य सीताविरहजदुःखेन शोकानुरत्व कथनं मनुष्य देह धारणेन नटवन्नहारनटनाभिप्रायेणा तद् दत्रापि ज्ञेयम् यथा वा वाल्मीकिविरचितरघुनाथचरिते युद्धकाण्ड युद्ध परिश्रांत चिंतया स्थितं रामं प्रत्यगस्त्योपदेशो लोकानुग्रहाय एवमत्र नारदोपदेशोपि लोक शिक्षणायैवेति ज्ञेयम् एवं चात्र व्यासनिंदाकृतेति कस्यचिन्निन्दकस्य जन्मांधस्य शाउस्येव कथनमिति ॥ ० ॥ ० ॥ ० ॥

भस्मासुरकथायां शिवस्यापि निंदाकृता भस्मासुरभयाच्छिवः कैलासं विहाय वनं गतवान् पुनर्विष्णुनारक्षित इति कस्मादपि त्रैलोक्ये भयं न संभवति शिवस्य यदि कश्चित् ब्रूयात् दत्तवराय भस्मासुराय दण्डं न दत्तवानिति तर्हि रावणाय दत्तवराय शिवेन दण्डः कथं दत्तः यस्य क्रोधलेशेन सर्वं पंचभूतात्मकं जगद्भस्मीभूतं

भवति तस्य भयं कर्त्तुं कः समर्थः पुमान्भवेत्
अत्र सत्वतनोर्विष्णोरुपासनया जीवानां श्रेयांसि नेतरे
षां देवानामुपासनयेति विष्णोरुत्कर्षवर्णने चेतिनात्य
र्थम् तदुक्तमादिपुराणे नजानातिनरो मूढः किं देवैः
सेवितैः सुखम् श्वलांगूलं समाश्रित्य को हि तीर्णोऽम्बु
धेर्जलम् येऽधमाः पापकर्माणो देवतानां तरसे वकाः
कामिनो विष्णु विमुखास्तेयांति नरके ध्रुवम् पतित्य
क्त्वा यथानार्यो जारं सुखलवेक्षया भजन्ति लोके निं
दान्ताः प्राप्नुयांत्यधमां गतिं देवाश्च कर्मसचिवाः के
वलं न हितेरताः अपराधे हृते ऽल्पेऽपि वै देह द्रविणा नाश
काः येयैः संसेवितादेवास्ते वते षां सुखं ध्रुवम् सदैवस
र्वसंसेव्य पंगुरेवासुरोभवत् शिवसेवां समासाद्य क्षयं
प्राप वृकासुरः बाणो बाहुसहस्रस्य नाशं रुद्राद वा
पह विश्वरूपः सुरपतिं संतोष्य निधनं गतः आराधन
विरोधाभ्यां देवैर्नाशो हि दृश्यते विपरीत मिदं विष्णावु
भाभ्यां मुक्तिभाग्भवेदिति एवं भगवदुपासनयैव निः
श्रेयसाधिगमो जीवानां न देवतांतरोपासनयेति हरिवं
शे काशीखंडे च घंटाकर्णकथाप्रसंगे स्पष्टमेवोक्तं वि
स्तरेण तत्रैवावलोकनीयमिति महाभारते व्यासवा
क्यम् आलोड्य सर्वशास्त्राणि विचार्य्य च पुनः पुनः
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदेति हरिवंशेम

हादेववाक्यं हरिरेकः सदाध्येयोभवद्भिः सत्वसंस्थितैरि
ति पाद्मे यस्तुनारायणं देवंब्रह्मरुद्रादिदैवतैः समत्वेनै
ववीक्षेतसपाषराडीभवेद्ध्रुवमिति स्कांदे शिवशास्त्रे
श्रुतग्राह्यं भगवच्छास्त्रयोगियदिति आदिवाराहे ।
जन्मांतरसहस्त्रेण समाराध्यवृषध्वजम् वैष्णवत्वं
लभेद्धीमान्सर्वपापक्षयेसतीति सत्वैकस्वभाव
स्येश्वरस्यनंदनंदनविग्रहेऽतिशयेनसत्वमभिव्य
क्तं अतएवतस्मिन्निरतिशयंधर्मज्ञानवैराग्यैश्वर्या
दिकमस्तिकामक्रोधाऽभिमानिदेवताविग्रहेतुस
त्वंतिरोभूतम् औपाधिकं लोभप्रवृत्त्यादिकंप्रमाद
मोहादिकंचाविर्भूतमितिमहाभारतटीकायामितिन
सिंहतापिन्यांरुद्रजापकशतमेकमथर्वांगिरसशिखाध्याप
केनतत्समं अथर्वांगिरसशिखाध्यापकशतमेकंमंत्र
राजाध्यापकेनतत्सममित्याद्यनेकवचनानांचविष्णोरु
त्कर्षवर्णनेनाश्चर्य्यम् नतुशिवनिंदने निरतंतुसर्वथा
परिहर्तव्यमेव तदुक्तं भगवतायोमांसमर्चयेन्नित्यमे
कांतंभावमास्थितः विनिंदन्देवमीशानं सयातिनरकं ।
ध्रुवमिति भस्मासुरभयाच्छिवस्यपलायनंतुविष्णुरस्मो
पिसंवर्त्तस्वयंछद्मसांप्रतमितिन्यायेन स्वंश्रीभगव
तः कृष्णस्यकालयवनात्पलायनादावपिबोध्यम् कै
लासोत्पाटनेदत्तवरायरावणायशिवेनयोद्रोडादत्तः

मनुरावणस्य हितायैवेति ततः प्रीतो महादेवः शैलाग्रे वि
स्थितं प्रभुः मुक्त्वा चास्य भुजान्रामः प्राह वाक्यं दशानन
म् प्रीतोस्मि तव वीरस्येत्यादि वाल्मीकिरचितरामचरित्र
स्योत्तरकाण्डस्य षष्ठमुक्तम् अथ च भस्मासुरभयात्पला
यनं रावणस्य दाण्डदानमिति स्वतंत्रेच्छस्य नियोगपर्य्यनु
योगानर्हस्य महादेवस्य इच्छैव नियामिकेति बोध्यम्
इत्थं च भस्मासुरकथायामित्यादिकथनं कस्यचिन्म
हामूर्खस्यैवेति ज्ञेयम् ॥

बाणासुरकथायामपि शंकरस्य निंदाकृता
कृष्णेन शंकरः पराजित इति कोपि शंकरं
पराजेतुं समर्थो नास्ति

अत्र श्रीकृष्णात् शंकरपराजयवर्णनं एवं वाल्मीकिरा
मायणस्य बालकाण्डे तदा तु देवताः सर्वाः पृच्छंति स्म
पितामहं शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया
अभिप्रायं तु विज्ञाय सदेवानां पितामहः विरोधं जनया
मास तयोः सत्यवतां वर विरोधे तु महायुद्धमभवद्रोमहर्ष
णम् शितिकण्ठस्य विष्णोश्च परस्परजयैषिणोः तदा तु
जृंभितं शैवं धनुर्भीमपराक्रमम् हुंकारेण महादेवस्त
म्भितोथ त्रिलोचनः देवैस्तदा समागम्य सर्षिसंघैः स
चारणैः याचितौ प्रशमं तत्र जग्मतुस्तौ सुरोत्तमौ जृंभितं
तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः अधिकं मेनिरे विष्णुं

देवाः सर्षिगणास्तथेत्यादिभिः समरेशंकराद्विष्मोरा
धिक्यवर्णनमस्त्येवेति एवंमहाभारतस्य शांतिपर्वणयपि इ
त्यंचबाणासुरकथायामित्यादिकथनंत्वज्ञानमूलकमेवेति

गृहस्थानामपि निंदाकृताकपोतगुरुकरणकथा
यांगृहस्थाश्रमोऽश्रेष्ठ इति यथानदीनदाः सर्वेसा
गरेयांतिसंस्थितिम् तथैवाश्रमिणः सर्वेगृहस्थे
यांतिसंस्थितिम् श्रेष्ठ एवगृहस्थाश्रमोव्यवहा
रेऽतोऽश्रेष्ठ इतिकथनंयत्तत्स्वमत्तगीतमेव ॥

ऽन्याश्रमांतरसाध्यं ज्ञानंगृहस्थेनसाधयितुंशक्यं ननुगृहस्थे
नसाध्यंयज्ञादिकं ऽन्याश्रमांतरेप्यस्तीतिकृत्स्नोधर्मोगार्ह
स्थ्यएवप्राप्यते संन्यासिनांगृहस्थगृहेविहितंभोजनादि
कं गृहस्थः स्वात्मानमन्यांश्च पित्रादीन्तारयति यतींश्च
पुष्णाति यतिस्त्वात्मानमेवतारयतिनपित्रादीन् पोषणां
चस्वस्यापिनकरोतिभिक्षोपजीवित्वादतोगार्हस्थ्यमेव
श्रेष्ठमितिमहाभारतादावुक्तम् सर्वाश्रमानुपादायस्वाश्र
मेणकलत्रवान् व्यसनार्णवमत्येतिजलयानैर्यथार्ण
वमित्यादिवाक्यैः श्रीमद्भागवतेच परंचतत्रगृहासक्ति
र्नकार्य्याकपोतगुरुकरणकथायाः गृहासक्तिस्त्रि
श्चामप्यनर्थहेतुर्मनुष्यस्यत्वतिनिंदितेतितात्पर्य्यमि
ति इत्यंचगृहस्थानामपि निंदाकृतेत्यादिकं कस्यचि
द्भिक्षुकपराणस्यवान्ताशिनः कथनमसंबद्धम् ॥ ०॥

कृष्णस्यापि निंदा कृता रासमण्डलचीरलीला कथायाम् परस्त्रीभिर्लीलां कृतवान् कृष्णः नग्न दाराहरश्चेति अदत्तानामुपादाने हिंसाचैवा विधानतः परदारोपसेवा च शारीरं त्रिविधं स्मृतं पापमिति शेषः नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियमित्याह भगवान्मनुः अस्मा द्विरोधाल्लोकविरोधाच्च प्रमत्तगीतमेतत् ।

रासलीलावर्णनम् ब्रह्मवैवर्त्ते गर्गसंहितायां पद्मपुराणे आदिपुराणे विष्णुपुराणे हरिवंशे आदिवाराहे बृहद्गौतमीयतंत्रे गौरीतंत्रे अग्निपुराणे विष्णुतंत्रे गोपालतापिन्यां ब्रह्मसंहितायां कृष्णयामले विष्णुयामले तथान्येष्वार्षग्रन्थेष्वस्ति तथा मधुसूदनसरस्वतीकृतभगवद्भक्तिरसायने आचार्यकृतप्रबोधसुधाकरे माधवपुरी विष्णुपुरी प्रभृतिग्रन्थेषु तथा गीतगोविंदप्रभृतिकाव्येषु मुरारिनाटकादिषु तथा धर्मशास्त्रनिबंधेषु क्रमदीपिकादिमंत्रशास्त्रग्रन्थेष्वस्त्येव किंच शंकराचार्यैः गोपीमण्डलगोष्ठीभेदमिति गोविंदाष्टके गोपीनां मंडलं समूहस्तेन सह गोष्ठीभेदः क्रीडाविशेषो यस्य स तथोक्तस्तं रासक्रीडारतमित्यर्थः इति तट्टीकाकारेण च रासलीला वर्णिता एवं तत्रैव स्नानव्याकुलयोषिद्वस्त्रमुपादायागमुपारूढं व्यादित्संतीरपदिग्वस्त्रा ह्युपादा

नुमुपकर्षतमिति स्नानार्थंजलक्रीडार्थंव्याकुलाः सं
भ्रांता योषितस्तासांवस्त्रमुपादाय स्वीकृत्यअगंवृक्षं।
अगवृक्षवन्नलीलाकदंबवृक्षमधिरूढमुच्यतइत्या
गमवचनात् कीदृग्विधमित्याह दिग्वस्त्राइतिदिगंव
राः अतएववस्त्रंव्यादित्संतीः विशेषेणादातुमिच्छं
तीः तायोषितः उपसमीपे आकर्षतंस्वनिकटमान
यंतमित्यनेन चौरलीलानेः प्रतिपादितेवेति स्मृति
कारोक्तपरदारोपसेवनादिकं मनुष्याणांपापावहंन
तुदेवानां तदुक्तं महाभारततात्पर्यविनिर्णये ननुवेद
विरुद्धमेकस्याबहुभर्तृता नैकस्येवहवोनेकाद्वो
पतीइतिचश्रुतीनैकस्येवहवस्सहपतयइति नस्मा
न्नेकाद्वोपतीविंदतेइतिचविशेषः अग्नीन्यंचक्रमा
त्प्राप्यहव्यमेतिमनुष्यतां अग्नयस्त्वग्निरर्कःक्ष्मापु
रुषोयोषिदित्यपि अग्नौप्रास्ताहुतिःसम्यगादित्य
मुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाः
द्रोणोवह्निश्चतुष्को स्यायोषिदग्नेरभावतः अग्नित्र
योस्थितासीत्ताभूत्यापित्रोरभावतः अग्निद्वयोस्थितादे
वानस्पृशंतिक्षितिंहिते देवजाः पार्थमाद्र्याभूद्युम
रापग्निवर्जिताः एकाग्निजातोवसुतोद्रुपदस्यसुताधि
को सर्वेसर्वात्मकादेवा विराज्जोवयवायतः सर्वेएवस
माः सर्वेनंताइतिहिवेदगीः नतेषांव्यभिचारोस्तिनचे

त्सूर्य्ययमौकथं पितापुत्रौसतींकुंतीमुपेयातांसुरेनभो
द्रौपदींदेवजांपार्थादेवजायदिभुंजते ननेषामत्रदोषो
स्तिदेवाएवहितेस्वयम् अयतेन्नहिवैदेवान्पापंगच्छति
सर्वथा तस्माद्यज्ञैर्देवभावंप्रार्थयीत निरेनसं एतद्देवा
हिकेव्यासोनानाख्यानोपबृंहणैः दर्शयामासलोका
नां संशयस्यापनुत्तयइति एवमात्मज्ञानिनःपापंकर्म
नलगतितदुक्तंवेदे तद्यथापुष्करपलाशआपोनश्लि
ष्यंते एवमेवैवंविदि पापंकर्मनश्लिष्यतेनकर्मणालि
प्यते पापकेननतसुकृतदुष्कृतेविधुनुते एतंहवावनतप
तिकिमहंसाधुनाऽकरवंकिमहंपापमकरवमिति ए
वंमद्भक्तोवानपेक्षक इत्यादि कथनाद्भगवद्भक्तोपिवि
धिनिषेधातीतइति इत्थंचयदिदेवादीनामपिव्यभि
चारादिकंकर्मनदोषावहं किमुतपुनः श्रीकृष्णस्यप
रब्रह्मणः सकलदेवानामादिकारणस्यव्यभिचारशं
केतिज्ञेयम् एवंशंकरस्यवृषभपृष्ठआरोहणम् प्रे
तैः सहसंवासः शवशयनेषुक्रीडनम् शवदाहभस्म
नोंगेषुधारणम् मनुष्यकपालमालापरिधानम् खट्
वांगधारणमित्यादि यत्स्कंदपुराणादिषुवर्णितं बा
लातपः प्रेतधूमोवर्ज्यंभिन्नंतथासनम् सविनाशंब्रज
त्याशुसत्त्वकोऽशुचिरेवचेत्यादि मनुवचनविरोधात्त
स्यापिनवप्रमत्तस्यमहामूर्खस्यमनेप्रमत्तगीतंस्या

दितिकिंवहुना

आप्तकामोयदुपतिः कृतवान्हेजुगुप्सितमक्लि

मभिप्रायएतन्नः संशयंछिंधिसुव्रत अत्रापि

कृष्णस्यनिंदाकृतासर्वज्ञः कृष्णः कदाचिज्जु

गुप्सितंकर्मनकुर्य्यात्

अत्रशिष्टानांचेतसस्तुष्टिर्धर्मप्रामाण्यमस्मुनेशकुंतला

मीहमानंदुष्यंतस्यमनोयथेतिमहाभारततास्यर्थविनि ।

र्णायोक्तदिशायदिशिष्टानांमनोप्यसन्मार्गेनोः भिनि

विशतेतदापरमेश्वरस्यश्रीकृष्णस्यनिंद्यकर्मसंभावना

तुदूरापास्तैवेतिशास्त्रतत्त्वविदांराज्ञश्चसिद्धांतएवपरं

चनतत्त्वानामनवहितानांकेषांचित्संशयापनुत्तये आप्त

कामइत्यादिनाराज्ञः प्रश्नः अतएवनरुनिवहुत्वकथन

मत्तदीयप्रश्नानुरोधेनैवोत्तरयतिश्रीवादरायणिः कृष्णा

दिपारतंत्र्यरहितानांसमर्थानांधर्मव्यतिक्रमोयोदृष्टः

तथातेषांनिर्भयत्वंचयद्दृष्टंतच्चतेजीयसांप्रत्यवायायन

भवतियथाऽग्नेः सर्वभुक्त्वंनोऽपायिक्यायधर्मव्यतिक्र

मादिमयमीश्वराचरितमसमर्थोनिश्चयेनकदाचिदपि

एकांशेनापिमनसापिनाचरेत् आचरन्लोकद्वयदुः

असमर्थः खित्वादिप्रकारेणनश्यति अनीश्वरोमौढ्यात्कालकूट

विषभक्षणोसद्योनश्यदेव नेश्वरः ईश्वरस्तुप्रत्युतऐश्वर्य्य

विशेषप्रकाशादिनाशोभतेयथानीलकण्ठत्वादिना ।

महादेवः बुद्धिमद्भिरीश्वराणामाज्ञाप्रमाणत्वेनग्राह्या
नैवमाचरितंकुत्रचिन्नदाज्ञानुसारेणनदाचरितमपि
ऽहंकाराभावेनकर्मनिर्लेपात्तोनिरहंकारिणांनपु
ण्याचरणेनाऽर्थःनचापापाचरितेनाऽनर्थःयदिनिरहं
काराभावेसौतपुण्यपापसम्पर्काभावादनर्थाभाव
स्तर्हि परमेश्वरस्य सर्वेषांजीवानांनियन्तुःश्रीकृष्णस्य
कुतोऽनर्थशंकाप्रीत्यादिज्ञेयमतएववसिष्ठस्यशतंपुत्रान्ना
शयामासकौशिकःनैनंबबाधिरेब्रह्महत्यास्तास्तप
सोबलादिति महाभारततात्पर्य्यविनिर्णयेप्युक्तमतः
स्पष्टमत्राऽपिकृष्णस्यनिंदाकृतेतिकस्यचिन्महापा
मरस्यैवोक्तिरितिज्ञेयम्

सुभद्राहरणकथायांकृष्णार्जुनसुभद्राणां
निंदैवकृताकृष्णःकपटरूपिणमर्जुनंमहा
त्मासीतिकथितवानितिअर्जुनःकपटरूपं
कृतवानितिसुभद्रापिनिंदितंकर्मकृतवतीति

इयमेवकथात्वतिविस्तृतामहाभारतस्यादिपर्वण्यपस्ति
नचापिकृष्णादीनांनिंदात्रकृताऽतोमहाभारतंनव्यास
कृतमितित्वयोन्मत्तेनवाच्यम् तत्रकथायांतात्पर्य्यमि
दंज्ञेयमत्रत्यानांवचःश्रेष्ठ्यंवरेश्रेयस्युपागतेश्रीकृ
ष्णोविजयंस्वस्वसारम्हारयदितिअर्जुनस्यमातुल
कन्यापरिणयनंतु आयाहीन्द्रपथिभिरीळितेभिर्यज्ञ

मिमंनोभागधेयंजुषस्वत्र्यंबकर्मानुक्तस्यैवद्योषाभाग
स्तेपैतृष्वसेयीवपामितिमंत्रलिंगात्द्योषापत्यंमातु
लीयंयथाभागःपितृष्वसुःपुत्रस्यैवंवपांमेदंगजुषस्वेंद्रे
स्त्रविर्जगाविति

इंद्रस्यापिगोवर्द्धनोद्धरणकथायांनिं
दाकृतांइंद्रोलज्जितोबभूवेति ॥

इयंगोवर्द्धनोद्धरणरूपाकथानुविष्णुपुराणोपांत्यरख
ण्डेगोपालतापिन्यांहरिवंशपुराणादावपिवर्णितागोविं
दोगोविदांपतिरित्यस्यव्याख्यायामाचार्यैः अहंकिलें
द्रोदेवानांत्वंगवामिंद्रतांगतः गोविंदइतिलोकास्त्वांस्तो
ष्यंतिभुविशाश्वतमित्युक्तम् अमेयात्मामहाद्रिधृगित्य
स्यव्याख्यानेचमहांतमद्रिंगोवर्द्धनंगोरक्षणोद्धृतवानि
तिमहाद्रिधृक्इतितैरेवप्रतिपादितम् किंचशंकराचार्यै
र्गोविंदाष्टकेगोपालंप्रभुलीलाविग्रहगोपालंकुलगो
पालंगोपीखेलनगोवर्द्धनधृतलीलालालितगोपालमि
त्यनेनगोवर्द्धनोद्धरणलीलावर्णितागोपीभिःसहविह
रणांतदर्थवनंप्राप्तेइंद्रकृतभयनिवारणायगोवर्द्धनगिरेर्धृ
तिरकारिसैवलीलातस्माज्जयत्नसाध्यत्वात्तयालीलया
लालिताःपालितागोपालायेनसतथोक्तस्तमितितट्टी
कायांचप्रतिपादितम्इत्यंचेंद्रस्यात्रनिंदाकृतेतिसर्वत्रै
वत्वयाबुद्धिमूल्येनवक्तव्यमिति

अष्टाशीतिसहस्राणामृषीणां महात्मनां
निंदैवकृता समाहात्म्यानकथायाम् तेषांम
ध्ये एकोपिपरिक्षितिंसमाधानेसमर्थोनेति

महाभारतादौसर्वेष्वपिपुराणेषुसूतशौनकसंवादोव
र्ततेतत्रापित्वयादुष्टेनवक्तव्यंशौनकादीनामृषीणाम
त्रनिंदैवकृतातेषांमध्येएकोपिनपुराणादीनांज्ञाताय
तःसूतएवपुराणावक्तृत्वेनतैरुरीकृतइत्थिवस्तुतःप्रकृ
तेश्रीशुकदेवस्यमाहात्म्यवर्णनेतात्पर्यंनतुमुनीनां
निंदायामितिइत्थंचात्रमुनीनांनिंदैवकृतेतिकस्यचि
त्समन्तस्यप्रलपनमेवेतिज्ञेयम्

ब्रह्मणोऽपिवत्सहरणाहंसावतरणकथायांनिंदै
वकृताऽज्ञानीब्रह्मेतिततःपुष्करतःसृष्टस्सर्व
ज्ञोमूर्तिमान्प्रभुः ब्रह्मावेदमयस्साक्षात्प्रजापति
रनुत्तमइतिमहाभारतविरोधात्समन्तगीतमेतत् ।

ब्रह्मारूपवतींपुत्रींसंध्याख्यांवीक्ष्यमदनोन्मदांततःपुत्रीमु
पाहूयसमालिंग्यपुनःपुनःततोतिव्रीडितासंध्यामृगी
जाताततःपरंस्मेविधिर्मृगोभूत्वातंददर्शततोहरःततः
पिनाकमाकृष्यविधिंहंतुंदुराधरम्रभसेनशरंतस्मिन्मु
मोचसशरस्ततःप्रविवेशविधेर्देहंनिर्गतश्चसदेहतःत
तस्तद्रभसेनैवनिहतःसचतुर्मुखइतिशिवरहस्येस्कंद
पुराणादौचवर्णितम्तत्रापिब्रह्मावेदमयःसाक्षादिति

महाभारतविरोधात्प्रमत्तगीतमेतदितित्वयाबुद्धिमूढ्ये
नवक्तव्यमितितन्नतत्रमहादेवोदुर्दर्शान्ब्रह्मादीनितेव:
शिक्षयतिकिमुतान्यानितितात्पर्य्यंएवमत्रापिदेवादी
नामपिदर्पदलनंभगवताकृतमन्येषांकावार्तेतिज्ञेयम्
किंचत्रिपुरासुरवधेमहादेवरथस्यब्रह्मासारथिःसो
मसूर्य्यौरथचक्रेइत्यादिशिवपुराणादौवर्णितंतत्रापि
ब्रह्मादीनांनिर्देवात्रकृताऽतःप्रमत्तगीतमेतदितित्व
याभराडेनवक्तव्यमिति

धर्मेचार्थेचकामेचमोक्षेचभरतर्षभयदिहा
स्तितदन्यत्रयन्नेहास्तिनकुत्रचित् महाभार
ताद्विरुद्धंयत्तन्नव्यासप्रोक्तमितिमहाभार
तेइदंतुभागवतंमहाभारताद्विरुद्धमेवास्ति
तस्मात्प्रमत्तगीतमेव

श्रीमद्वाल्मीकिविरचितरघुनाथचरितेतद्रामबाणाभि
हतंपपातरक्षःशिरःपर्वतसन्निकाशम्बभंजचर्य्यागृह
गोपुराणिप्राकारमुच्चंतमपातयच्चेत्यादिनारामात्कुंभ
कर्णवधउक्तःमहाभारतेतुतंब्रह्मास्त्रेणासौमित्रिर्ददारा
द्रिवरोपमम्सपपातमहावीर्य्योदिव्यास्त्राभिहतोरणो
तंदृष्ट्वावृत्रसंकाशंकुंभकर्णंतरस्विनंगतासुंपतितंभू
मौराक्षसाःप्राद्रवन्भयादित्यादिनालक्ष्मणात्कुंभकर्ण
वधोवर्णितइतिइयंचवाल्मीकिनिर्मितशुभ्मायराम

व

दिभारतादिरुद्धमेवतस्मात्प्रमत्तगीतमेवेतित्वयानि
रयगामिनावक्तव्यम् एवंमार्कंडेयपुराणेपक्षिविद्रे
णाराणामराडामुपरिघराणपतनस्साकथाकथिता
महाभारतेतुसानास्तितत्रापित्वयाधूर्त्तेनवक्तव्यंभा
रतविरुद्धंमार्कंडेयपुराणमतोनव्यासकृतंकिंतुप्रम
त्तगीतमेवेति एवंकाशीखराडादिष्वपिज्ञेयमिति

वंदेमहापुरुषतेचरणारविंदम्घांमूर्द्धानंयस्य
विप्रावदंतिखंवैनाभिंसोमसूर्य्यौचनेत्रेदि
शः श्रोत्रेयस्यपादौक्षितिश्चध्यातव्यः सो
सर्वभूतांतरात्मा॥१॥यद्वाचानभ्युदितंयेनवा
गभ्युद्यतेतदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते
॥२॥यन्मनसानमनुतेयेनाहुर्मनोमतम् तदे
वब्रह्मत्वंविद्धिनेदंयदिदमुपासतइत्यादिभ्यः
श्रुतिभ्योविरुद्धंचरणारविंदवंदनादिकमेवातो
ऽकथनीयमप्रश्रवणीयञ्चेदंप्रमत्तगीतंभागवतम्

एकोपिकृष्णस्यकृतः प्रणामोदशाश्वमेधावभृथेनतु
ल्यः दशाश्वमेधीपुनरेतिजन्मकृष्णप्रणामीनपुनर्भ
वायेतिमहाभारते नत्वाकृष्णपदंदेवमूर्ध्नाजादयागिरे
तिगर्गसंहितायां नमस्करोतिमूर्ध्नायंवावासोतितिरंत
रमितिवायुपुराणे यत्पादपंकजगतामचलांचभक्तिंवां
छंतीतिपुराणादिषु ॐनमोविश्वरूपायविश्वस्थितं

नहेतवइत्यादिनापनीयश्रुतिषु पाद्मे नपस्त्त प्रानरोघोर
मररोपनियतेंद्रियः यत्फलंसमवाप्नोतितंनत्वागरुडध्व
जमिति ब्रह्मवैवर्त्ते शरणागतरक्षणोद्यतंहरिमीशंप्रणा
मंतियेनराः नपतंतिभवांबुधोस्फुटंपतितानुद्धरतिस्मता
नसाविति नारसिंहेश्रीयमोक्तोतस्यवैनारसिंहस्यविक्रमार
मितनेजसः प्रणामंयेपिकुर्वंतितेषामपिनमोनमइतिवि
ष्णुपुराणे पादपद्मप्रणमतीत्यादिच पदनखनिविष्टमू
र्त्तिभिरितिमदंसूदनसरस्वती एवंवामनस्यविक्रमोरुचर
णारविंदवंदनंपुराणादिषु प्रसिद्धं एवंगोविंदाष्टके शंक
राचार्य्यैरासक्रीडायांदेवगणैः श्रीकृष्णस्यचरणवंदनंकृ
तमितितट्टीकायांच वृंदावनभुविवृंदारकगणवृंदाराधितवं
देहंकुंदाभामलमंदस्मेरसुधानंदंसुहृदानंदंवंद्याशेषम
हामुनिमानसवंद्यानंदपदद्वंद्वंवंद्याशेषगुणाब्धिंप्रणम
तगोविंदंपरमानंदमितिवृंदावनभुविवृंदारणप्रदेशेरा
सक्रीडायांसंप्रवृत्तायांवंद्यास्सर्वेऽशेषामहामुनयश्चते
वंद्याशेषमहामुनयोनारदाद्यास्तेषांमानसेनहृदयेनवंद्य
ध्येयमानंदपदद्वंद्वंयस्यसतथोक्त इति एवंश्रीरामा
नंदसरस्वतीभिरपिसीतारामपदद्वंद्वमद्वंदानंदसाध
नम् नमामियद्रजोयोगात्पाषाणोपिसुखंगतइतितद्व
र्णितं इत्थंचयदाचान्नम्युदितमित्यादिश्रुतिविरुद्धं
चरणारविंदवंदनमित्यादिकं कस्यचिद्विलसितमस्य

कारागाराईस्यप्रलपनमिति ॥

पूर्वापरविरुद्धमप्यस्तिनृसिंहेनप्रह्लादाय
वरोदत्तएकविंशतिपित्राद्यास्तवमोक्षंग।
च्छंतु पुनरुक्तम्प्रमत्तेनतावेवरावणाकुंभ
कर्णौबभूवतुः पुनस्तावेवशिशुपालदन्तव।
क्रौबभूवतुरितिचविरुद्धमेव ॥ ॥ ॥

ऽअत्रहेनृसिंहमेपितानवतेजोऽविद्वान्भ्रान्तहेतिमयाहष्टि
सन्त्वांअनिंदत्तस्मात्सः पूयेतइमंवरंवृणोइतिप्रह्लादे
नोक्तंभगवतानुहेवत्सतेपिताएकविंशतिपितृभिःसह
पूतःयतोयस्यकुलेत्वंसाधुर्जातः किंचहेप्रह्लादयत्रय
त्रमद्भक्ताबसंतितेकीकटाअपिदेशाःशुद्धाभवंतीत्यु
क्तम् हिरण्यकशिपोर्मुक्तिस्तुभागवतेनोक्ताश्रीविष्णु
पुराणेच हिरण्यकशिपुत्वेचरावणत्वेचविष्णुनाहत्वा
पनिहतोभोगानप्राप्यानमरैरपि नालभत्तत्रचैवेहसा
युज्यंसकथंपुनःसंप्राप्तःशिशुपालत्वेसायुज्यंशाम्भ
तेहराविस्येवोक्तम् इत्थंच पूर्वापरविरुद्धमप्यस्तीतिक
स्यचिद्देवानांप्रियस्यकथनमेवेति

भवान्कल्पविकल्पेषुनविमुह्यतिकर्हिचिदिति
ब्रह्मणेवरोदत्तोनारायणेनपुनरुक्तंब्रह्मामो
हितोभूत्वावत्सहरणांकृतवानितिविरुद्ध
मेवकथनम् ॥

ब्रह्मणाः स्वकन्याभिगममस्तोमोहः पूर्वकल्पेतत्रैकाभू
न्मनुश्चतुःश्लोकीभागवतोपदेशानंतरमपियत्कृष्णा
ऽवतारेब्रह्मसंमोहनं तन्तु भगवत्कृपाविलसितमेवे
तिनविरुद्धंकथनम्

कृष्णोनग्नोवाराणसुरमानरंनदृष्टवान्पुनरुक्तंप्र
मत्तेनचीरलीलांकृतवानितिविरुद्धमेव ॥ ॥

श्रीरामचंद्रस्ताडकांस्त्रींजघानश्रूर्पणखांराक्षसीभगि
नींराक्षसीस्त्रींनजघानातस्तत्रापिप्रमत्तकथनमेववा
च्यम् किंचहरिवंशपुराणेकृष्णस्यैकस्यतद्रूपंदर्श
नार्थमागता अंतर्धानमुपागम्यतत्कासावासनीपु
नःप्रमुखेवासुदेवस्यदिग्वासाकोटवीस्थितेतिविष्णुपु
राणेनग्नादेवेयविद्याभूत्कोटवीपुरतोहरेरिति श्रीमद्भा
गवतोक्तकोटराएवकोटवीतितत्रप्रसिद्धा एवंचतत्रा
पीयंकथावर्त्तते अथवातुष्यतु दुर्जनइतिन्यायेनउप
नीयगुरुः शिष्यंमहाव्याहृतिपूर्वकम् वेदमध्यापये
देनंशौचाचारांश्चशिक्षयेदिति उपनीयशौचाचारांश्च
शिक्षयेदित्यनेनप्रागुपनयनात्कामचारोदर्शितः इति
मिताक्षरायामुक्तम् एवंचात्रनकश्चिद्विरोधइति ॥

भस्मासुरकथायांशिवस्यनिंदांकृत्वापु
नर्विषपानकथायांभवानेवविष्ण्वादीना
मीश्वरइतिविरुद्धमेव

भस्मासुरकथायां शिवस्य निदानकृतेति पूर्वमेवोक्तम् विद
पानकथायां तु शिवस्य स्तुतिरेव कृतेति न विरोधः महाभार
तटीकायामुक्तम् नन्वत्रानर्थको युद्धादिप्रलापो भूयान् दृ
श्यते कशीकनेत्यादिश्चाधर्मप्रवर्त्तकोपि ग्रन्थोस्ति नत
त्रक्वचिद्धर्मादिकथनेप्यपि विषसंपृक्तान्नवत्कृत्स्न
मप्येतद्धेयमेव एवं धर्मब्रह्मप्रतिपादन एव तात्पर्य्ये अर्थ
वादज्ञानमपि युधिष्ठिरादिवद्वर्त्तितव्यं न दुर्योधनादिवदि
ति तत्र हीनं पक्षमुपाददानः स्वार्थाद्भ्रश्यतीति तेनाधीतम
पि भारतं पापायैव भवति तथा च सर्वस्माद्ग्रन्थात्सा
रमेवादेयमितरत्याज्यमिति श्रूयते ग्रन्थमभ्यस्य मेधावी
ज्ञानविज्ञानतत्परः पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषत
इति एवमत्रापि श्रीमद्भागवते सारं सारमेवादेयमिति ॥

ऋते ज्ञानान्न मुक्तिरिति श्रुतेः नहि ज्ञानेन सदृ
शं पवित्रमिह विद्यत इति स्मृतेश्च एवं सति भ
क्तिरेव मोक्षकर्त्रीति वेदादिभ्यो विरुद्धमेव ॥

अग्रयावै साधनसंपत्तिः पुरुषार्थचतुष्टये तया विना तद
प्नोति नरो नारायणाश्रय इति महाभारते अनेन चतुर्वर्गफ
लं नारायणाश्रयणमात्रेण भवतीति सिद्धम् वाल्मीकिर
चितरामचरित्रे मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान्
गृध्रराज महासत्त्व संस्कृतश्च मया व्रजेति पाद्मे संस्कार
मकरोत्तस्य रामो ब्रह्मविधानतः स्वपदं च ददौ तस्मै सोपि

रामप्रसादतः हरेःसमानरूपेण प्राप्यो परमं पदमिति अ
नेन साधनहीनस्यापि निरस्तः मुक्तिरुक्ता सहस्रनाम
भाष्ये संसारसर्पसंदष्टनष्टचेष्टैकभेषजम् कृष्णेति
वैष्णवं मंत्रं श्रुत्वा मुक्तो भवेन्नर इति भारतविभागे कृ
ष्णः कृष्णः कृष्ण इत्यन्तकाले जल्पन् जंतुर्जीवितं योज
हाति आप्नोति शब्दः कल्पते तस्य दत्तैव व्रीडानम्रो तिष्ठ
तो ऽन्याहरास्याविति गीतायां देवान्देवयजो यान्ति म
द्भक्ता यान्ति मामपि अनन्यनाभवत्साक्तो मद्याजी मां नमस्कु
रु मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणम् मां हि पा
र्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः स्त्रियो वैश्यास्तथा
शूद्रास्तेऽपि यान्ति परां गतिमित्यादि अन्यसाधनानपेक्षत्वं
भक्तियोगस्य ज्ञानयोगादेश्च हरिपदसेवनसापेक्षत्वं ज्ञा
नयोगस्य भगवदाराधनं तत्प्रसादं च विनैव सिद्धिरिति न
क्वापि केनाप्युक्तम् किंच भक्तियोगे दुराचारिणोपि दृढ
वैराग्यरहितस्याप्यधिकारो गम्यते अपि चेत्सुदुराचा
रो भजते मामनन्यभाक् साधुरेव स मन्तव्यः सम्यग्व्यवसि
तो हि सः क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति न निर्विण्णो
कहारीतजयक्रतुमदादयः ३५ एवं कौशिकगोत्रं तु विश्वामित्रैः पृथग्विधं प्रवरांत
रमापन्नं तद्धि चैवं प्रकल्पितं ३६ इति श्रीभागवते नवमस्कंधे षोडशोऽध्यायः १६

ह्णंतः अनुवर्त्तमानाः संतः मां वीरवंतं पुत्रवंतं यत् अकर्त कृतवंतः इत्यर्थः ३४ हे कुशिकाः एष देवरातः
वो युष्मदीयः ३५ कौशिकं एव गोत्रं विश्वामित्रैः तत्तन्मन्विताः तद्गोत्रं अन्ये चाष्टकादयस्त
स्य सुता आसन् प्रवरांतरं इति एवमिति एके प्रामाः एके तु गृहीताः अन्यस्य पुत्रत्वेन स्वीकृतत्वात् क
इति श्रीभावार्थे नवमे षोडशोध्यायः १६ ॥

९८०

श्री
भाग०
नटी०
५०

आयोः सप्तदशे नीलस्येह पुत्रस्य पंचवंश क्षत्रवृद्धादिवंशवर्णनं १ इह श्रीकृष्णा
वतारप्रस्तावे ... क्रमप्राप्तमादिकमेणप्रक्रांतमिति यदुवंशो कृष्णावतारः तस्य वंशो
निविततत्वादेतेनवृष्ण्यंते अतः पूर्ववत् ... निरूपणावशात्क्षत्रवृद्धादीनां प्रथमस

श्रीबादरायणिरुः यः पुरूरवसः पुत्र आयुस्तस्याभवन्सुताः नहुषः क्षत्रवृद्धश्च रजी
रंभश्च वीर्यवान् १ अनेना इति राजेन्द्र शृणु क्षत्रवृधोन्वयं क्षत्रवृद्धसुतस्यासन्सुहोत्रस्या
त्मजास्त्रयः २ काश्यः कुशो गृत्समद इति गृत्समदादभूत् शुनकः शौनको यस्य बव्हृ
चप्रवरो मुनिः ३ काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमःपिता धन्वंतरिर्दीर्घतम
स आयुर्वेदप्रवर्तकः ४ यज्ञभुग्वासुदेवांशः स्मृतमात्रार्तिनाशनः तत्पुत्रः केतुमा
नस्य जज्ञे भीमरथस्ततः ५ दिवोदासो द्युमांस्तस्मात्प्रतर्दन इति स्मृतः स एव शत्रु
जिद्वत्स ऋतध्वज इतीरितः तथा कुवलयाश्वेति प्रोक्तोलर्कादयस्ततः ६ षष्टिं वर्षस
हस्राणि षष्टिं वर्षशतानि च नालर्कादपरो राजन्बुभुजे मेदिनीं युवा ७ अलर्कात्संत
तिस्तस्मात्सुनीथोथ निकेतनः धर्मकेतुः सुतस्तस्मात्सत्यकेतुरजायत ८॥

... माह य इति पुरूरवसः आयोः पुत्र ... ११ दीर्घत
मसः पिता ४ स्मृतिमात्रेणार्तिं रोगदुःखं विनाशयतीति तथा ५ ततः प्रतर्दनादिशब्दवा
च्याद्द्युमतः सकाशादलर्कादयः ६ संततिः सुतः सत्यकेतोर्दृष्टकेतुः ८

५८

तस्मात्सुकुमारः तस्माद्वीतिहोत्रः तस्य भर्गः अतो भर्गात् भार्गभूमि ॥१७॥ काशय काश्यवंश्याः
काश्यप्रपितामहस्य तद्गोत्रं ब्रह्मविदां न्वयं तेषां तीति तथा ततः अनेनेः सः शुद्धो जज्ञे ॥१९॥ कृतकृत्यः स
यतः आत्मवान् ज्ञानी अतः पुत्रोत्पादनेन कृतकृत्य इत्यर्थः ॥२२॥ तेषां मतिभ्रंशाय गुरुणाहू

धृष्टकेतुस्ततस्तस्मात्सुकुमारः क्षितीश्वरः वीतिहोत्रस्य भर्गोतो भार्गभूमिरभून्नृपः ॥१७॥ इती
मे काशयो भूपाः क्षत्रवृद्धानुयायिनः राभस्य रभसः पुत्रो गंभीरश्चाक्रियस्ततः ॥१८॥ तस्य
क्षेत्रं ब्रह्म जज्ञे शृणु वंशमनेनेः शुद्धस्ततः शुचिस्तस्माच्चित्रकृद्धर्मसारथिः ॥१९॥ ततः शां
तरजो जज्ञे कृतकृत्यः स आत्मवान् रजेः पंचशतान्यासन्पुत्राणाममितौजसां ॥२०॥ दे
वैरभ्यर्थितो दैत्यान्हत्वेन्द्रायाददद्दिवं इन्द्रस्तस्मै पुनर्दत्वा गृहीत्वा चरणौ रजेः ॥२१॥ आत्मा
नमर्पयामास प्रह्लादाद्यरिशंकितः पितर्युपरते पुत्रा याचमानाय नो ददुः ॥२२॥ त्रिविष्ट
पं महेन्द्राय यज्ञभागान्समाददुः गुरुणा हूयमानेग्नौ बलभित्तनयान्रजेः ॥२३॥ अवधी
द्भ्रंशितान्मार्गान्न कश्चिदवशेषितः कुशात्प्रतिः क्षात्रवृद्धात्संजयस्तत्सुतो जयः ततः कृतः
कृतस्यापि जज्ञे हर्यबलो नृपः सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः संकृतिस्तस्य
विजयः क्षत्रधर्मा महारथः ॥२४॥ क्षत्रवृद्धान्वया भूमे (भूपा) शृणुथ नाहुषान् ॥२५॥ इति श्रीभा
गवते नवमस्कंधे सप्तदशोध्यायः ॥१७॥

दस्पतिः नाम्नाभिचारविधानेनाग्नौ हूयमाने सति ॥२३॥ सिंहावलोकेनाह क्षत्रवृद्धपौत्रात् कुशात्
प्रतिः प्रतेः संजयः ॥२४॥ इति श्रीभावार्थे नवमस्कंधे सप्तदशोध्यायः ॥१७॥

श्री:
भाग:
नवी:
५०

982

अष्टादशेय यातेस्तु नाहुषस्य कथोच्यते यत्र पुत्रस्य पूरोश्च कनीयान् अपि जीर्णतां तस्य राज्यस्य परि
णाममतयोऽत्र [illegible] तिनीतियाति तत्र देवः युञ्जीति १ स्थानान्भ्रंशिते द्विजैरजगरत्वं प्रापितेऽभि: ३ ५
यवीयसो भ्रातृनादिशत् [illegible] शुक्रस्य वृषपर्वणश्च कन्यां प्राप्य कृतदारः सन् नप्रतिलोमता दोष

शुक उ॰ यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः षडिमे नहुषस्यासन्निन्द्रियाणीव देहि
नः १ राज्यं नैच्छद्यतिः पित्रा दत्तं तत्परिणामवित् यत्र प्रविष्टः पुरुष आत्मानं नावबुध्य
ते २ पितरि भ्रंशिते स्थानादिन्द्राण्या धर्षणाद्द्विजैः प्रापितेऽजगरत्वं वै ययातिरभवन्नृपः
चतसृष्वादिशद्दिक्षु भ्रातृन्भ्राता यवीयसः कृतदारो जग्राहोर्वीं काव्यस्य वृषपर्वणः ४
राजोवाच ब्रह्मर्षिर्भगवान्काव्यः क्षत्रबन्धुश्च नाहुषः राजन्यविप्रयोः कस्माद्विवाहः प्रति
लोमकः ५ शुक उ॰ एकदा दानवेन्द्रस्य शर्मिष्ठा नाम कन्यका सखीसहस्रसंयुक्ता गु
रुपुत्र्या च भामिनी देवयान्या पुरोद्याने पुष्पितद्रुमसंकुले व्यचरत्कलगीतालिनलि
नीपुलिनेऽबला ७ ता जलाशयमासाद्य कन्याः कमललोचनाः तीरे न्यस्य दुकूलानि
विजह्रुः सिञ्चतीर्मिथः ८॥

ईश्वरवदिनादिति दर्शयन्कथामाह एकदेत्यादिना प्रतिजयादनहुषवर्णितेन गुरोः शुक्र
स्य पुत्र्या देवयान्या च व्यचरदिति द्वयोरन्वयः ६ कलगीतान्यलयो षु तानि नलिनी पु
लितानि यस्मिंस्तु तीरे यानेऽबला या मिथः ७ सिञ्चतीः सिञ्चन्त्यः ८॥

983

सुजानन्ती स्त्रीयं मत्वा गुरुपुत्र्या वासः समवाप्यमर्षयात् ॥ असांप्रतं मामाप्य ॥ आमायमेवत्वा
स्त्रा मे तत्कर्ष वर्णेनेन अनभिज्ञैर्यैर्विधिविभिः ये ब्राह्मणाः परस्परं सोऽत्र वे सुवोऽत्मत्रवेन त्वमिदावते

वीक्ष्य व्रजं तं गिरिशृङ्गं सह देवाह्वसस्थिते सह सोतीर्थे वासांसि पर्यस्तं ब्रीडिताः स्त्रियः ॥
शर्मिष्ठाग्रजनी वासो गुरुपुत्र्याः समन्वयत स्त्रीयं मत्वा प्रकुपिता देवयानी दमब्रवीत ॥
महोनि दीर्घता मृस्पाद्मासाः कर्मस्यासां मते असाधुपर्येष्टनवती स्तनी वह विरये ॥ येरिदं
तपसा सृष्टं सुवचं संप्रवस्ये यार्यते ये विह जोतिः शिवः पंथाद्य दर्मितः ॥ यानदंस्तु
पतिष्ठते लोकनाथाः स्तदेवगाः भगवानपि विष्णात्मा पावनः श्रीनिकेतनः ॥ वर्धनवापि
रंगवः शिष्यो स्यान्नः पिता स्वरः अस्मदार्यप्रतवती मुह्यवदमिवासती ॥ एवं क्षिपन्तीं श-
र्मिष्ठा गुरुपुत्रीमभाषत रुषास्य समवं गीवयर्षिनादष्टदकदा ॥ आत्मभूतमविज्ञाय
कन्यसे वक्ष्मिन्ते कि किं न प्रतीयसे स्त्राकं ग्रहानलिप्तजोयया ॥ एवंविधैः स्वपरुषैः
विमावार्यस्त तां सती शर्मिष्ठा प्राक्षिपत्कूपे वासस्यादाय सत्वरा ॥ तस्मागतायासत्र गृहं
ययातिर्मृगयां चरन् प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह ॥ दत्त्वा स्वमुत्तरं वास-
स्तस्यै राजा विवासते [illegible] प्राणिना पाणिमुज्जहार दयापरः ॥

नष्टे हास्य पंथाः [illegible] पंथा वेदमार्गः ॥ ॥ तदेवं ब्राह्मणामेव तावत्स्वयं तत्रापि वयं भगवः
प्रस्या स्व पिता नः शिष्यः पवस्तापि स्मामिर्यो वासस्य मसतीष्टनवती ॥ ॥ ॥

निषिद्धोयं प्रतिलोमसंबंधः इतित्राह एष इति २१ अनुलोमएवतंगृहाणेति किमनेनाग्रहेणेतिवेत्त

त्राह न ब्राह्मणो मे [illegible] बृहस्पतेः सुतः कचः शुक्रान्मृतसंजीवनीविद्यामध्यगात् तदा च देवयानीप्र

तिचकमे स च गुरुदुहितेत्यसमर्थोऽभूत्तदा कुपिता सतीनतेयंविद्या निष्फलाभव

त्विति तं शशाप सचतत्र ब्राह्मणोपतिर्नभविष्यतीति तां शशाप तदेतदाह यमहमशपं तस्य शापात्॥

तं वीरमाहौशनसी प्रेमनिर्भरया गिरा। राजंस्त्वया गृहीतो मे पाणिः परपुरंजय २० ह

स्तग्राहोऽपरो मा भूद्गृहीतायास्त्वया हि मे। एष ईशकृतो वीर संबंधो नात्र पौरुषः २१ यदि

दं कूपमग्नाया भवतो दर्शनं मम। न ब्राह्मणो मे भविता हस्तग्राहो महाभुज। कचस्य बा

र्हस्पत्यस्य शापाद्यमशपं पुरा २२ ययातिरनभिप्रेतं दैवोपहृतमात्मनः। मनस्तु त

द्गतं बुद्ध्वा प्रतिजग्राह तद्वचः। गते राजनि सा वीरे तत्र स्म रुदती पितुः न्यवेदयत्ततः स

र्वमुक्तं शर्मिष्ठया कृतं २४ दुर्मना भगवान्काव्यः पौरोहित्यं विगर्हयन्। स्तुवन्वृ

त्तिं च कापोतीं दुहित्रा स ययौ पुरात् २५॥

पात् २२ [illegible] ययातिरनभिप्रेतमपि दैवेनोपहृतं प्रापितं बुद्ध्वा तद्गतं तत्स्नेहकामं स्वमन

स्तु बुद्ध्वा तस्य धर्मेण मदीयं मनः प्रविशादिति तस्याः वचः प्रतिजग्राह अंगीकृतवान् २३ शर्मि

ष्ठयोक्तं यीपि दैववशादेवाभवदिति दर्शयन्नाह गत इति राजनीति नवभिः उक्तं भिक्षुकीत्या

दि [illegible] तत्कृतं कूपप्रक्षेपादि २४ कापोतीं संवृत्तिं २५॥

प्रत्यनीका देवास्ते विवक्षिताः जयं प्राप्य पणी याः स्वमभिप्रेतं यस्य तथाभूतं ज्ञात्वा प्रत्यनीकानां विव-
क्षितमिति वा २६ सानुगा सखीसहिता शर्मिष्ठा मामनु यात्विति २७ २८ ततस्मान्निर्गता कृकास
कटं वीक्ष्य तस्माद्देवस्यितादर्थस्य प्रयोजनस्य गौरवं च वीक्ष्य २९ तल्पे मा धा नोपगच्छेत्यर्थः

वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितं गुरुं प्रसादयन्मूर्ध्ना पादयोः पतितः पथि २६ क्ष-
णार्धमन्युर्भगवान् शिष्यं व्याचष्ट भार्गवः कामोऽस्याः क्रियतां राजन्नैनां त्यक्तुमिहोत्सहे २७
तथेत्यवस्थिते प्राह देवयानी मनोगतं पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु २८ स्वा-
नां तत्संकटं वीक्ष्य तदर्थस्य च गौरवं देवयानीं पर्यचरत्स्त्रीसहस्रेण दासवत् २९ नाहु-
षाय सुतां दत्त्वा सह शर्मिष्ठयोशना तमाह राजञ्छर्मिष्ठामाधास्तल्पे न कर्हिचित् ३०
विलोक्यौशनसीं राजञ्छर्मिष्ठा सुप्रजां क्वचित् तमेव वव्रे रहसि सख्याः पतिमृतौ सती ३१
राजपुत्र्यार्थितोऽपत्ये धर्मं चावेक्ष्य धर्मवित् स्मरञ्छुक्रवचः काले दिष्टमेवाभ्यपद्यत ३२
यदुं च तुर्वसुं चैव देवयानी व्यजायत द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ३३ गर्भ-
संभवमासुर्या भर्तुर्विज्ञाय मानिनी देवयानी पितुर्गेहं ययौ क्रोधविमूर्छिता ३४

अपत्यार्थं स्तनकाले प्रार्थनात् तयोः कामस्वरूपं धर्ममवेत्य शुक्रस्य वचस्संस्मरन् दिष्टं दैवप्राप्तं
तमेव अभ्यपद्यत न तु कामत इत्यर्थः ३२ आसुर्याः शर्मिष्ठायाः भर्तुः
सकाशात् ३४ उपमन्त्रयन् प्रसादयन् ३५॥

विहातेह्येकबीतीनिनत्याते इहितरिकामेवयाण्णः नमोस्मिकामानांभोगेहितिवाउक्तया
इताहियोः भियासवीः अमितोयाचयिष्यति नमानुयन्ताकामं यासेस्मेनायश्येकेनराण्यस्य
यानुव्यासरोनीयत [illegible] श्वासमोनिदिः नांजरांवामासमयमयेनपर्यः ३४ इतिलव्या

त्रियामनुगतः कामीवबीभिस्तपमेनृयन् नमस्मादयितंशोकेपादसंवाहनादिभिः ३५
शुक्रस्तमाहकुपितः स्त्रीकामानृतपूरुष नांजराविशतंमदविरूपकरणीनृणां ३६
ययातिरुवाच अतृप्तोस्म्यघकामानांब्रह्मन्दुहितरिस्मते शुक्रउवाच व्यत्यस्यतांयथाकामं
वयसायोभिधास्यति इतिलब्धव्यवस्थानः पुत्रंज्येष्ठमवोचत यदोतातप्रतीछेमांजरां
देहिनिजंवयः ३७ मातामहकृतांवत्सनतृप्तोविषयेष्वहं वयसाभवदीयेनरंस्ये
कतिपयाःसमाः ३८ यदुरुवाच नोत्सहेजरयास्थातुमंतराप्राप्तयायानवं अविदित्वासुखं
ग्राम्यंवैतृष्ण्यंनैतिपूरुषः ३९ तुर्वसुश्चोदितः पित्राद्रुह्युश्चानुश्चभारत प्रत्याचख्युर
धर्मज्ञाह्यनित्येनित्यबुद्धयः ४० अपृच्छत्तनयंपूरुंवयसोनगुणाधिकं नत्वमग्रजवद्वत्स
मांप्रत्याख्यातुमर्हसि ४१ पूरुरुवाच कोनुलोकेमनुष्येंद्रपितुरात्मकृतः पुमान् प्रतिकर्तुंक्षमोयस्यप्रसादाद्विंदतेपरं ४२ ॥
[illegible]

तथापि पितर्यश्चिन्तितं कुर्यात् स उत्तमः यस्तु प्रोक्तकारी स मध्यमः यस्त्वश्रद्धया कुर्यात् सोऽधमः यस्तु अक
र्ता पितुरुच्चरितं पुरीषप्रायः ४४ जुजुषे सेवितवान् यथोपजोषं यथाप्रीति जुजुषे ४५ नानाविभा

उत्तमश्चिन्तितं कुर्यात्प्रोक्तकारी च मध्यमः अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ४४ इति
प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः सोऽपि तद्वयसा कामान्यथावज्जुजुषे नृप ४५ सप्तद्वी
पपतीः सम्यक्पितृवत्पालयन्प्रजाः यथोपजोषं विषयाञ्जुजुषेऽव्याहतेन्द्रियः ४६ देवया
न्यप्यनुदिनं मनोवाग्देहवस्तुभिः प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ४७ अयजद्यज्ञ
पुरुषं क्रतुभिर्भूरिदक्षिणैः सर्वदेवमयं देवं सर्ववेदमयं हरिं ४८ यस्मिन्निदं विरचितं
व्योम्नीव जलदावलिः नानेव भाति नाभाति स्वप्नमायामनोरथः ४९ तमेव हृदि विन्य
स्य वासुदेवं गुहाशयं नारायणमणीयांसं निराशीरयजत्प्रभुं ५० एवं वर्षसहस्राणि
मनःषष्ठैर्मनःसुखं विदधानोऽपि नातृप्यत्सार्वभौमः कदिन्द्रियैः ५१ इति श्रीभागवते न
वमस्कन्धे ययातिचरिते अष्टादशोऽध्यायः १८॥

ति यावदिन्द्रियसंहतिः तद्रूपेणेव नाभाति स्वप्नमायाभ्यां सहितो मनोरथः स्वप्नादिवत्सर्वार्थः मनःसुखं का
मभोगं कदिन्द्रियैः कुत्सितैः पराङ्मुखैरिन्द्रियैः ५१ इति श्रीभावार्थदीपिकायां नवमे अष्टादशोऽध्यायः १८

श्री॰
भाग॰
नटी॰
५॰

ऽनविशेषयया नि:संदेहितेन नन्नोपमं देवयानी सभायां स्थानवस्को ऽशक्ति मानवान् शुक्रो योगमा
यांहसन जवहूतमात्मनः विंडं वयस्त्रियाभा ऽनिवेदयित मात्मवान् २ कामानां च रत्नुपभुंजानः
गायामितिदास १ मेहियेन माहशेनाचरितां महिषस्पाचरितं यस्यामिति वा यस्याममनिवा
सिनः कामिनो महि[illegible] स्याचरि[illegible] स्यवने स्थिता थीवाः योचंतितस्य गायां शृण्वात्मानमनुल

श्रुक उ॰ सद्रूपमाचरन्कामान्नेहाणाम्यतवमात्मनः उद्धास्यिवाये निर्विस्रो गायामेताममगाय
त १ स्तएभार्गवमूं गाथा महिथाचरितां भुवि धीरायस्माच्छोचंति वने ग्राममनिवासिनः
२ वस्तकमको वने कश्चिद्विचिन्वन्प्रियमात्मनः ददर्श कूपे पतितां स्वकर्मवशगांमजो ३ त
स्याउद्धरणोपायं वस्तः कामीविचिंतयेत् वधद्भतीर्थमुद्भ्रमविषाणाग्रेण रोधसि ४ सो
तीर्य्यकूपात्सुश्रोणीतमेव वस्तकमेकिले तयाहतं समुदीक्षय बस्तो जा कांतकामिनी ५।
पीवानं श्मश्रुलं प्रेष्ठं मीढांसं यभकोविदं सएकोजवर्षस्तासां बस्तीनां रतिवर्द्धनः रेमेका
मग्रहग्रस्तआत्मानंनावबुध्यत ६॥

द्या ह वस्तारति प्रियामनुलद्याह भ्रजामिति वनेसंसा
रे प्रियात्वेषयं ३ तोयस्तितटे विषाणाग्रेण रूदादिकमुद्भृत्यतीर्थे निर्गमाय मार्गं व्यधत ४ कूप
स्य [illegible] सीमिष्टा प्रभुरवाः कामयानाः कांतं प्रति कामिनी कामवृत्तः ५ पीवानं पुष्टं श्मश्रुलं श्म
श्रुवन्तं रतिसमर्थं श्रेष्ठं मीढांसं रेतः सेक्तारं यभे कोविदं अभिदं अत एव प्रेष्ठेनावबुध्यत

९

स्वामिनमिति ७ शुक्राभिप्रायेणाह ८ इडविडाकारे वसुमातिशाह्वे प्रसादयितं ९ वृषणम
कि नतु जरया संभोगासमर्थमकरोत् शर्मीयत्वस्वयाः कामभोगाय योगवित् उपायज्ञः जरा
ऽऽन्यासेन रतिशक्तिर्दत्तावित्यर्थः १० रूपलब्धया सह कामैः सेव्यमानैर्नतृप्यति ११ नतुत
हि उनर[illegible] स्वोविषयाः सेविता ततो मनसि प्रीते सति कामोपशान्त्यमोहोनिवर्तते तिचेत

तमेवप्रेष्ठतमया रममाणमजाम्मया विलोक्य रूपसंविज्ञानानस्पष्टहस्तकर्मतत् ७
तेऽईर्दं सुहृद्रूपं कामिनं त्राणसौहृदं इंद्रियाणाममुत्सृजन्नामिनं ऽः खिन्ता ययौ ८ सो
पितानुगतः स्वैर्णरूपणस्तोप्रसादितं ऊर्वविडविडाकारे नाशक्नोन्मयितं संधितं ९ तस्य
स्तत्रद्विजः कश्चिद्जाम्सास्वाक्किनहुषा लेवेतं वृषणं भूयः संदृश्येर्थायपयोगवित् १० सव
ब्धवृषणः सोपि स्त्रियाहूपलब्धया कालेवहूतिथं भद्रकामैर्नाघापितृप्यति ११ तया
देहरूपाणः सुभुमंक्ताप्रेमयंत्रितः आत्मानं नाभिजानाति मोहितस्तव मायया १२ यत्पृथि
व्यां व्रीहियवं हिरण्यं पशवः स्त्रियः नदुह्यन्ति मनःप्रीतिं पुंसः कामहतस्य ते नजातु कामः
कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते १४ यदा न कुरुते भावं
सर्वभूतेष्वमंगलं समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः १५

तत्राह यदिति द्वाभ्यां नदुह्यन्ति
ति न पूरयन्ति १३ हविषा घृतेन कृष्णवर्त्मा १४ अग्निरेव तर्हि कदा केनोपायेन वा मनसः संतु
ष्टिः प्रीतिः स्याद्यथा कामोपशमः स्यादित्यत आह यदेति द्वाभ्यां अमंगलभावं रागद्वेषादिवैष

श्री. भाग. नवी. ५१

ऽः खानि नितरां बहूनि नित्यानां १५ स्त्रीसन्निधानं सर्वथा त्याज्यमित्याह मात्रेति अविविक्तं संकीर्णमासनं यस्य सः कर्षति न शक्नोति आत्मारामस्यापि इंद्रियविकारदर्शनात्कथं ब्रह्मणि मनस आधानं स्यात्तत्राह दृष्टमिति यो नानुध्यायेन्न संविशेन्न चोपभुंजीत तत्र दृष्टश्रुतयोरनुध्यानादौ

या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् १६
मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् बलवानिंद्रियग्रामो विद्वांसमपि कर्षति
पूर्णं वर्षसहस्रं मे विषयान्सेवतोऽसकृत् तथापि चानुसवनं तृष्णा तेषूपजायते १८
तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसं निर्द्वंद्वो निरहंकारश्चरिष्यामि मृगैः सह १९
दृष्टं श्रुतमसद्बुद्ध्वा नानुध्यायेन्न संविशेत् संसृतिं चात्मनाशं च तत्र विद्वान्स आत्मदृक्
इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः दत्वा स्वजरसं तस्मादाददे विगतस्पृहः २१
दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुं प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुमीश्वरं २२
भूमंडलस्य सर्वस्य पूरुमर्हत्तमं विशां अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ २३
आसेवितं वर्षपूगान्षड्वर्गं विषयेषु सः क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः २४

संसृतिरात्मनाशश्च भवति १८ तस्य पूरोर्वशे स्थापयिता २३ विषयेषु शब्दादिषु आसेवितं षड्वर्गं षडिं-
द्रियवर्गं मुमुचे तत्याज यद्वा विषयेष्वासेवितं सेवितं षण्णामिंद्रियाणां वर्गं मुमुचे उपेक्षितवानित्यर्थः

५१

990

951

विधुतंत्रिरसंतेविगुणात्मकंलिंगयेनप्रतीतःप्राप्तवानः २४ प्रस्तोभमेवाह परिहासमिति यद्वा
प्रस्तोभंनिवृत्तिमार्गेप्रोत्साहनंमेने २७ कथंसमावेशमत आह नमइति नमनादिभिःसमावानम

सतत्रनिर्मुक्तसमस्तसंगआत्मानुभूत्याविधुतत्रिलिंगः परेमलेब्रह्मणिवासुदेवेलेभे
गतिंभागवतींप्रतीतः २६ श्रुत्वागाथांदेवयानीमेनेप्रस्तोभमात्मनः स्त्रीपुंसोःस्नेहवै
क्लव्यात्परिहासमिवेरितं २७ सासन्निवासंसुहृदांप्रपायामिवगच्छतां विज्ञायेश्वर
तंत्राणांमायाविरचितंप्रभो २८ सर्वत्रसंगमुत्सृज्यस्वप्नौपम्येनभार्गवी कृष्णे
मनःसमावेश्यव्यधुनोल्लिंगमात्मनः २८ नमस्तुभ्यंभगवतेवासुदेवायवेधसे स
र्वभूताधिवासायशांतायबृहतेनमः २९ इतिश्रीभागवतेनवमस्कंधेययातिचरि
तेनामैकोनविंशोध्यायः १९ बादरायणिरुः पूरोर्वंशंप्रवक्ष्यामियत्रजातोसिभारत
यत्रराजर्षयोवंश्याब्रह्मवंश्याश्चजज्ञिरे १ जनमेजयोह्यभूत्पूरोःप्रचिन्वांस्तत्सुतस्ततः
प्रवीरोथमनुस्युर्वैतस्माच्चारुपदोभवत् २ तस्यसुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः संया
तिस्तस्याहंयातीरौद्राश्वस्तत्सुतः ३

स्करोति २९ इतिश्रीभावार्थेनवमेनामैकोनविंशः १९
विशोपितृप्रसादात्मराजासनमहोत्रतः पूरोर्वंशोत्कृष्टोर्ष्यंतेभरतस्योर्ष्यंतेयशः १ तत्सुतःस्म

धर्मेषु प्रसक्तेषु प्रवृत्तेषु स्वधर्मस्थानवर्तेयवः धर्मेषु भावमोक्षतः एवंदशैतेष्वतेषु प्रसक्ता
नस्येशोऽवश्यसा स्वता भावं सस्वरवत्तिषु वाना नाः स्वस्वसृस्वरूपतिषु शीलसमन्वर्य वशवर्तिते इष्वातः
जगदात्मनः जगतः आत्मनः तस्य स्वरूपास्य प्राणास्येंद्रियाणीव १ उष्यंतस्य शाकंतलाया

स्तेषु स्वस्य जलेषु स्थलेषु कालेषु कः जलेषु स्वतने प्रसक्ष्यधर्मस्थानवर्तेयवः ४
दृष्टेति स्वतः प्रस्तुवनेषु भावमः स्वतः देवताभ्यामिंद्रियाणीव स्वस्य जगदात्म
नः ५ स्तेषो दति भारो भूतत्त्व यस्यात्मनात्स्य स्वमतिषु बोप्रतिरथः कण्वोऽप्रतिर
थि[illegible] ८ तस्य मेधातिथिस्तस्मात्प्रस्कण्वाद्याद्विजातयः पुत्रोभूत्सुमतेरेभिः
[illegible]ततो मतः ९ उष्यंतोनुसमयातः कण्वाश्रमपदंगतः तत्रासीनां स्वप्रभया मं
यंतीमाश्रमामिव विलोकयंस्तां सुदेवमायामिव स्थितं १० वभाषे तां वरारोहां
भटैः कतिपयैर्वृतः तद्दर्शनप्रमुदितः संनिवृत्तपरिश्रमः ११ एप्रच्छ कामसं
तप्तः प्रहसन्श्लक्ष्णया गिरा का त्वं कमलपत्राक्षि कस्यासि हृदयंगमे ११ किंस्वि
च्चिकीर्षितं तत्र भवत्या निर्जने वने व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे १२

भवान्[illegible]भवदिति कथाद्वारेणाह उष्यंतो मृगयामिति पंचदशभिः तमाश्रमं मंडयंती
[illegible]वविलोकयन्मुमुदे ९ तस्या दर्शनेन प्रमुदितः अतएव संनिवृत्तः परिश्रमो यस्य १०
११ पौरवाणां चेतो न स्यधर्मे रमते [illegible] तामचेतस्तत्त्वयि रमणादेवाहं त्वां राजन्यतनयां वे

विश्वामित्रस्यात्मजाहं मेनकायां जाता तया त्यक्ताहं कण्वस्यात्मजा एवं मेनकैवाहमित्य
र्थः । १४ किं करवाणि पादिवाक्यात तदभिप्रायं ज्ञात्वाह उपपन्नमिति १९ गांधर्वविधिनामियः ।

नहि वेत्ति ततः पौरवाणामथ धर्मेरमते कवित् शकुंतलोवाच विश्वामित्रात्मजैवाहं त्यक्ता
मेनकया वने वेदैतद्भगवान्कण्वो वीर किं करवाणि ते १४ आसतां तावद्विदितात्त्वयता
मर्हेणानन्ः भज्यतां संतिनीवा राज्यं तात यदि चेच्छसि १५ दुष्यंत उ० उपपन्नमिदं सुभुजा
तायाः कुशिकान्वये स्वयं हि ... ते राजकन्याः स्वयंवरं १६ ओमित्य मेयथाथ
[illegible] यमे शकुंतलो गांधर्वविधिना राजा देशकालविधानवित् १७ अमोघवी
[illegible] महर्षिं महिष्यी वीरमादधे स्त्रीभूते स्वपुरं याते कालेनासूत सा सुतं १८ काण्वक
मारस्याश्रमे नसर्वे समुदितां किंयाः वहारस्योदं त्रसाक्रीडंति सर्ववालकाः १९ तं
दुष्यंतपर्यविक्रांतमात्र ... द्रोतस्मा द्वेवंशांशासंभूते भर्तुरिति कमागमत् २० या
हानजगृह्देराजाभार्याश्वत्रावनिंदितो स्थावतां सर्वभूतानां वाग्बाग्ना शरीरिणी २१
माता भस्त्रा पितुः पुत्रो येन जातः स एव सः भरस्व पुत्रं दुष्यंत मावमंस्थाः शकुंतलां २२

समयपूर्वकं ... १७ दुष्यंतपर्यविक्रांतं विक्रमणं यस्य २० २१ भस्त्रा चर्मपात्रं तद्वन्माता आधा
रमात्रं पितुरेव तत्पुत्रः तत्र हेतुः येनेति आत्मा वै पुत्रनामासीति श्रुतेः भरस्व पुत्रमाण्यतेन

श्री.
भाग.
नौ.
५२

किंच रेतोधाः रेतःसेक्ता वै पुत्रकृत् पुत्रो यमक्षयात् नरदेव नयति तारयति तथाच श्रुतिः
पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति धाता
त रेमात्स्यपुत्रोः पुत्र इति विवादे यमक्षयात् इमं निर्णीतवद्यं मम सभायाः स का शाल रेतोधा
रेतः सेक्ता पिता वंशेऽस्मिन् विशिष्टपुत्रं नयति न तु मातेत्यर्थः ततस्त्वं भार्यापुत्रौ स्वीकुरु तव।

रेतोधाः पुत्रो नयति नरदेव यमक्षयात् त्वं चास्य धाता गर्भस्य सत्यमाह श-
कुन्तला २२ पितर्युपरते सोऽपि चक्रवर्ती महायशाः महिमा गीयते तस्य ह-
रेरंशभुवो भुवि २४ चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः ईजे महा-
भिषेकेण सोऽभिषिक्तोऽधिराड्विभुः २५ पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वा-
जिभिः मामतेयं पुरोधाय यमुनायामनु प्रभुः २६ ॥

नितिशेषं २३ चक्रवर्ती बभूवेति शेषः तस्य महिमा गीयते तदप्येते श्लोका अभिगीतास्तथा।
हरेरंशभुवः अंशप्रजातस्य २४ तत्र लिंगमेवाह चक्रमिति गंगायां अनु
लोमं पंचपंचाशता वाजिभिरीजे पुरोधाय पुरोहितं कृत्वा यमुनायामनु च यमुनाया।

५२

अष्टाधिकसप्ततिमितेभ्यो मेध्यान्बध्वा न वध्य किं कुर्वन्सस्यधनं सकर्षेण ददत साचीगुणप्रकृष्टगुणावति देशे
अग्निश्चितो भूत् यस्मिन्नग्निचयने देशे वा सहस्रं ब्राह्मणाः भरतेन भूरिदत्ताः गाः बद्वशः प्रत्येकं बद्वं वि
भेजिरे विभज्य अगृह्णन् चतुरशीतिमधिके सहत्रयोदशगोसहस्रैरेकं बद्वं भवति तथा हिरण्येन परिवृता
न्कृष्णान् शुक्लदतो मृगान् मष्णारे भरतो दयात् कुले वंशे नियतानि सप्तचेति शुक्लकृष्णानि यामाधिशतेबद्वानि
श्रीमुके नोमरश्लोके चतुर्दशलक्षाणेन संगृहीतानि अदात्कर्मणि मष्णारे नियुतानि चतुर्दशेति प
वं चतुर्दशलक्षाणां समाधिकशतभागो बद्व मितं भवति यच्च बद्वस्तत्श्लोकेन संगृह्यते च

अष्टसप्ततिमेध्यांश्ववंध्यप्रददद्धरः भवतु स हि दौष्यंतेरग्निः साचीगुणेचितः सहस्रं बद्वशो
यस्मिन्ब्राह्मणा गा विभेजिरे त्रयस्त्रिंशच्छतं ह्यश्वान्बद्धा विस्मापयन्नृपान् दौष्यंतिरत्यगान्मा
यां देवानां गुरुमाययौ २८ मृगान्शुक्लदतः कृष्णान्हिरण्येन परीवृतान् अदात्कर्मणि म
ष्णारे नियुतानि चतुर्दश २९ ॥

तुर्दशानां लक्षाणां सप्ताधिकशततोंशकः बद्वं चतुरशीति सहस्राणि त्रयोदश २७ देवाना
मपि मायां वैभवं अत्यगात् तस्मात् यतो गुरुं बृहस्पतिं आययौ प्राप्तस्तद्दशाभवत् तत् मायावतर
इति पाठे ह्रस्व श्रुमं त्रुसारेण मायावतां श्रेष्ठः हरिर्वा माविसर्थः २८ मृगान् श्रेष्ठगजान् मष्णस
द्धस्यगादयो गजजातिभेदाः मष्णारे उत्तस्य श्रुतिपदस्य व्याख्यानेकर्मणीति कस्मिंश्चित्कर्म वि
शेषे केचित्तु मष्णारे तीर्थे इति व्याचक्षते २९ ॥

श्री॰
भा॰
टी॰
२४

१। पुरादेवान्जित्वाये॰ सुरा रसौकांसि रसातलादिस्थानानि भेजिरे तैः प्राणिभिर्बद्धाभिर्देवस्त्रि
यो रसातलं नीताः सतीः पुनराहरदानिन्ये प्राणिभिरबलैर्मनुष्यादिभिः सह नीता इति वा प्राणिभि
रिति पाठे पणयो॰ सुरास्तैर्नीताः सतीः पणापणाय सुरा स्वैरं तानसुरान्याहरदित्यर्थः ३२ त्रिणा
वसाहस्रीः समाः सप्तविंशतिसहस्रवत्सरान् चक्रं सेनामाज्ञां वा नारायणांशत्वाच्चक्रं सुद

भवतस्य समस्तकर्मनष्टैर्लोकपालैस्त्यक्तपाः नैवापुनर्नैवमा संपत्तिवाङ्क्षांत्रिदिवं यथा ३। कि
रातहूणान्यवनान्पौण्ड्रान्कङ्कान्खशान् शकान् अब्रह्मण्यनृपांश्चाहन्म्लेच्छान्दिग्विजयेऽखिला
न् ३॰ जित्वा पुरासुरा देवान्ये रसौकांसि भेजिरे देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत
सर्वकामान्दुदुहतुः प्रजानां तस्य रोदसी समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्तयत् ३३।
स सम्राड् लोकपालाख्यमैश्वर्यमधिराट् श्रियं चक्रं चास्खलितं प्राणान्मृषेत्युपरराम
ह तस्यासन्नृपवैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः जघ्नुस्त्यागभयात्पुत्रान्नानुरूपा इतीरिते ३४
तस्यैवं वितथे वंशे तदर्थं यजतः सुतं मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः ३५॥

भ्रूणमेव वा ३२ तस्यैवं राज्ये णामोक्तप्रकारमाह स सम्राडिति मृषेति विचार्येति शेषः ३४ नानुरूपा म
त्सदृशा न भवन्तीति अभिचारशंकया स्वात्मसदृशा इति भयात्स्वपुत्रान् जघ्नुः पुनः पुनः पुत्राणां दर्शना
नैवं सादृश्याभावेन त्यजेत् नाशयेत्पत्याशयेन नैवं तस्याः ५ वितथे व्यर्थे सति तदर्थमरु
त्स्तोमेन योगेन यजतस्तस्य प्रसन्नाः सन्तो मरुतो भरद्वाजं नाम पुत्रमुपाददुः समर्पयामासु

५८

मरुत्स्तं भरद्वाजं गर्भप्रकारं दर्शयन्नाह अंतर्वत्न्यामिति चतुर्भिः अंतर्वत्न्यां गर्भिण्यां भ्रातुरुतथ्य
स्य पत्न्यां ममतायां वीर्यमैथुनाय कदाचित्प्रवृत्तः तदा द्वितीयगर्भस्यावकाशाभावादाक्रोश
पूर्वकं गर्भस्थेन वारितः ततः क्रुद्धो बृहस्पति देवो भवेति तं गर्भं शप्त्वा बलाद्वीर्यमुपसिषेच ततो बृहस्पतेः
शापाद्गर्भस्थो दीर्घतमा अंधो बभूव तेन च तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निःसारितं भूमौ पतितं
सद्य एव कुमारोऽभवत् तं च परवीर्यजं भर्तृत्यागाद्विशंकिता सती त्यक्तुकामां ममतां प्रति सुराः प्र
बृहस्पतेर्ममतायाश्च विवादे तं पश्लोकं जगुः किं स जगुः अत आह तस्य नाम निरुच्यते येन तं

अंतर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ३६ तं
त्यक्तुकामां ममतां भर्तृत्यागविशंकितां नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः ३७ मू
ढे भर द्वाजमिमं भर द्वाजं बृहस्पते यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयं ३८

तन्नामनिर्वचनेनैव भर्तृत्यागशंकामपाकर्तुमित्यर्थः तत्र पुत्रं त्यक्तुकामां ममतां बृहस्पतिरा
ह हे मूढे इमं पुत्रं भर पुष्णाण भर्तृतो बिभेमीति चेत्तत्राह भरद्वाजं एकस्मात्क्षेत्रे अन्यस्माद्बीजाद्द्वि
भ्यां जातं अतस्त्वं पोषय इति न तस्माद्भयं शंकेत्यर्थः एवमुक्ता ममता प्रत्याह हे बृहस्पते त्वम
पि इमं भर द्वाभ्यामावाभ्यामस्मायत्तो जातं अतो नाहमेकाकिनी भरामीत्यर्थः यद्यस्मादेवमुक्त्वा पित
रौ ममता बृहस्पती पुत्रं परित्यज्य यातौ ततो अयं भरद्वाज इति पाठांतरे यस्य पुत्रस्य ममतया
पितरौ यातौ इत्यर्थः ३८ ३९ ॥

श्री. भाग. नटी. ५५

वितथं व्यभिचारसंभवात् आत्मजं वितथं निरर्थकं मम ममतां सुस्त्यजत्वाद पाठांतरे आदिजं प्रथमजं भर्तवी यः जानने [illegible] भरद्वाजस्य तेनातनयो जन्मथः एवं तत्याम त्क्रमतो विभ्रतुः अभिभक्तः तदेवम [illegible] आमोय भरतस्यान्वये वितथ इति दत्तः १९ इति नवमे विंशः २० एकविंशे तदीयान्वये सतस्यान्वयः [illegible] रंतिदेवाजमीढादयः कीर्तिः प्रतन्यते १ भरतस्यान्वये वितथ [illegible] तितततत्वादित इथ [illegible] भरतस्य दत्तपुत्रो जात इति तद्वंशोनुक्रम्यते वि

चोदितमानान्स्वैर्देवैर्[illegible]नावितथं मामजं बृहज्जन्मनो विभृह्न्तो यं वितथेऽन्वये १९ इति श्री भागवते नवमे विंशोध्यायः २० श्रीशुक उ. वितथस्य सुतान्मन्योर्बृहत्क्षत्रो जयस्ततः महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः १ गुरुश्च रंतिदेवश्च संकृतेः पांडुनंदन रंतिदेवस्य हि यशः इहामुत्र च गीयते २ वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः निष्किंचनस्य धीरस्य सकुटुंबस्य सीदतः ३ व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल घृतपायससंयावं तोयं प्रातरुपस्थितं ४

वितथस्य सुतो मन्युः तस्माद्बृहत्क्षत्रजयमहावीर्यनरगर्गाः पंच पुत्रा बभूवुः १ वियद्वित्तस्य वियतो गगनादिवोद्यमं विना दैवादुपस्थितमेव वित्तं भोग्यं यस्य यदा वियद्वद्व्ययं प्राप्नुवद्वित्तं यस्य तद्वदाह बुभुक्षतोपि सतो लब्धं लब्धं ददतः तत्प्रयच्छति निःकिंचनस्यान्नादिसाधनैः पंचदशभिः ३ अपिबतो जलपानमप्यकुर्वतः घृतादित्रयाणां द्वंद्वैकवद्भावः ४

५५

१८ अथान्यो वृषलोऽतिथिरागमत् विभक्तस्य ऊर्ध्ववार्यमन्नादिकं विभक्तवतः ५ सगणाय श्रम
दित्सय ८८ उच्छेषमुर्वरितं एकस्य तर्पणं यस्मिन् तथा ९ पुक्कसः श्वपाकः स्वतयास्वर्वैक्लव्यं विस्मयं मो
क्षमार्गास्त्वेति अणिमाद्यष्टसमृद्धियुक्तां गतिमपि मोक्षमपि वाहं न कामये तर्हि किं कामा
यसे तत्राह अखिलदेहभाजामार्तिं दुःखं तेषामन्तःस्थितः सन्प्रपद्ये प्राप्नुयामिते

कृच्छ्रप्राप्तकुटुंबस्य क्षुत्तृड्भ्यां जातवेपथोः अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत्
तस्मै संव्यभजत्सोन्नमादृत्य श्रद्धयान्वितः हरिं सर्वत्र संपश्यन् स भुक्त्वा प्रययौ द्विजः ४
अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपतेः विभक्तं व्यभजत्तस्मै वृषलाय हरिं स्मरन् ५ या
ते शूद्रे तमन्योगादतिथिः श्वभिरावृतः राजन्मे दीयतामन्नं सगणाय बुभुक्षते ६ स आ
दृत्यावशिष्टं यद्बहुमानपुरस्कृतं तच्च दत्त्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ७ पानीय
मात्रमुच्छेषं तच्चैकपरितर्पणं पास्यतः पुल्कसोभ्यागादपो देह्यशुभस्य मे ८ तस्य तां
करुणां वाचं निशम्य विपुलश्रमां कृपया भृशसंतप्त इदमाहामृतं वचः ९ न कामये
हं गतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवं वा आर्तिं प्रपद्येऽखिलदेहभाजामंतःस्थितो येन
भवंत्यदुःखाः १० क्षुत्तृट्श्रमो गात्रपरिभ्रमश्च दैन्यं क्लमः शोकवि

वं कामये येन तद्दुःखं
भोक्तृकामयादेव भूतेनैतेषां सर्वे अदुःखा भवंति १२ ननु दुःखं किमिति प्रार्थयसे परदुःखनिवृत्त्यैव
मम सर्वदुःखनिवृत्तिरित्याह क्षुत्तृडिति कृपणस्य जंतोर्जीवनहेतोः जलस्यार्पणान्मे सर्वे

1000

श्री·
भाग·
नटी·
५९

एवमिति सार्द्धं प्रभाष्य १५ त्रिभुवनाधीशाः ब्रह्मादयः मायामात्रं तस्य धैर्यपरीक्षार्थं प्रथमं मायया याह
षलादिरूपेण प्रतीताः संतः स्वमर्थाः फलं केवलं वासुदेवे भगवान नमस्कृत्य नत्वा ताकिमपियावि
तवान् १७ अनन्यराधसः ईश्वरातिरिक्तफलानि नाराधयतः तस्य प्रलीयत आत्मन्यवलीनाऽभूदेव
१८ १९ मन्युसुतस्य नरस्य संकृतेर्वंशमुक्त्वानंतरं तस्य गर्गस्य वंशमाह गर्गाच्छिनिः महावीर्यस्य वंशः।

एवं प्रभाष्य पानीयं म्रियमाणः पिपासया पुल्कसायाददद्धीरो निसर्गकरुणो नृप १५
तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छतां आत्मानं दर्शयां चक्रुर्मायया विष्णुविनिर्मिता
१६ स वै तेभ्यो नमस्कृत्य निःसंगो विगतस्पृहः वासुदेवे भगवति भक्त्या चक्रे मनः परं १७
ईश्वरालंबनं चित्तं कुर्वतोऽनन्यराधसः मायागुणमयी राजन्स्वप्नवत्प्रत्यलीयत १८ त
त्प्रसंगानुभावेन रंतिदेवानुवर्तिनः अभवन्योगिनः सर्वे नारायणपरायणाः १९ गर्गा
च्छिनिस्ततो गार्ग्यः क्षत्राद्ब्रह्म ह्यवर्तत दुरितक्षयो महावीर्यात्तस्य त्रय्यारुणिः कविः १९ पु
ष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिनापुरं २० अज
मीढो द्विमीढश्च पुरुमीढश्च हस्तिनः अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः २१॥

माह दुरितक्षयः तस्य त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्राः कथंभूताः ये अत्र क्षत्र
वंशे ब्राह्मणगतिं ब्राह्मणरूपतां गताः ते महावीर्यपुत्राः एव बृहत्क्षत्रस्य वंशमाह बृहत्क्ष
त्रस्येति यत्र येन हस्तिना पुरं कृतमित्यर्थः १९ २० अजमीढादयस्त्रयो हस्तिनः पुत्राः २१

1001

अजमीढाद्देव्यामः पुत्रो बृहदिषुर्नामाभवत् २२ पारस्य तनयो नीपः नीपस्य पुत्रशतं स एव कृत्वायां से
त्वायां शुककन्यायां ब्रह्मदत्तं जनयामास तदुक्तं हरिवंशादिषु पराशरकुलोत्पन्नः शुको नाम महा
यशाः व्यासादरण्यां संभूतो विधूमोऽग्निरिव ज्वलन् स तस्यां पितृकन्यायां पीवर्यां जनयिष्यति २३।
कृष्णं गौरं प्रभुं शंभुं तथा भूरिश्रुतं जयं कन्यां कीर्तिमतीं षष्ठीं योगिनीं योगमातरं ब्रह्मदत्तस्य ज

अजमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः २२ तत्सु
तो विशदस्तस्य सेनजित्समजायत रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः २३ रुचि
राश्वसुतः पारः पृथुसेनस्तदात्मजः पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् २४ स कृ
त्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् योगी स गवि भार्यायां विष्वक्सेनमधात् सुतं २५
जैगीषव्योपदेशेन योगतंत्रं चकार ह उदक्सेनस्ततस्तस्माद्भल्लाटो बार्हदीषवाः २६ य
वीनरो द्विमीढस्य कृतिमांस्तत्सुतः स्मृतः नाम्ना सत्यधृतिस्तस्य दृढनेमिः सुपार्श्वकृत् २७
सुपार्श्वात्सुमतिस्तस्य पुत्रः सन्नतिमांस्ततः कृती हिरण्यनाभाद्यो योगं प्राप्य जगौ स्म षट्
२८

नेमीमहिषीमण्डदस्य चेति २४ यद्यपि शुकः उत्पत्त्यैव विमुक्तसंगो निर्गतः तथापि विरहातुरं
व्यासमनुयान्तं दृष्ट्वा कृपया शुकः निमायां गतवान् तदभिप्रायेणैवायं गार्हस्थ्यादिव्यवहारः अ
विरोधः स च ब्रह्मदत्तो योगी गवि वा विष्वक्सेनं सुतं २५ स एव योगतंत्रं चकार बार्हदीषवाः बृ
हदिषोर्वंशाः इमे दीर्घत्वमार्षं २६ सुपार्श्वकृत् सुपार्श्वस्य पिता २७

श्री॰ भाग॰ टी॰ ५२

1002

प्राच्यसाम्नां षट्संहिता जगौ विभज्याध्यापितवान् २८ अजमीढस्यैवं वंश्याः प्रियमेधादयः केचिद्ब्राह्मणा बभूवुः बृहद्विषुपुत्रो जयः तस्यैवान्वये निवसन्ति पञ्चकाः तस्यैव वंशान्तरमाह नलिन्यामिति यः

संहिताः प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुंजयः २९ ततो बहुरथो नाम पुरुमीढोऽप्रजोऽभवत् नलिन्यामजमीढस्य नीलः शान्तिस्तु तत्सुतः ३० शान्तेः सुशान्तिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् भर्म्याश्वस्तनयस्तस्य पञ्चासन्मुद्गलादयः ३१ यवीनरो बृहद्विश्वः कांपिल्यः संजयः सुताः भर्म्याश्वः प्राह पुत्रा मे पञ्चानां रक्षणाय हि ३२ विषयाणामलमिमे इति पञ्चालसंज्ञिताः मुद्गलाद्ब्रह्मनिर्वृत्तं गोत्रं मौद्गल्यसंज्ञितः ३३ मुद्गलाद्ब्रह्मनिर्वृत्तं गोत्रं मौद्गल्यसंज्ञितं मिथुनं मुद्गलाद्भार्म्याद्दिवोदासः पुमानभूत् अहल्या कन्यका यस्यां शतानन्दस्तु गौतमात् तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः ३५ शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात्किल शरस्तंबेऽपतद्रेतो मिथुनं तदभूच्छुभं ३६ तद्दृष्ट्वा कृपयाऽगृह्णाच्छन्तनुर्मृगयां चरन् कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृपी ३७ इति श्रीभागवते नवमस्कन्धे एकविंशोऽध्यायः २१

ब्रह्मवादि ३०।३१ मुद्गलप्रमुखाः यवीनरादयश्च तावत् इत्येवं पंच ३२।३४ भार्म्यादिवंश्यात् मिथुनं बभूव तत्र दिवोदासः पुमान् अहल्या च कन्यकेति ३५।३७ इति नव

श्री॰ टी॰ २१

द्वाविंशे तु दिवोदासवंशमुक्त्वाथ वर्णिताः ऋक्षवंशे जरासंधपार्थदुर्योधनादयः १ तस्य सोमक
स्य पुत्राणां शतं च भूत तेषां जन्तुर्ज्येष्ठः यवीयान्पृषदः २ अजमीढवंशे च वंशान्तरमाह यद्दिति ततः सं
वरणात्कुरुः ३४ तस्य कृतिनः उपरिचरो वसुः ततो वसोः बृहद्रथो मुखं आदिर्येषां ५ तानेवा

शुक उ० मित्रायुश्च दिवोदासाच्च्यवनस्तत्सुतोन्नृप सुदासः सहदेवोथ सोमको जंतुज
न्मकृत् १ तस्य पुत्रशतं तेषां यवीयान्पृषदस्ततः द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सु
ताः २ धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्याः पांचालका इमे योजमीढसुतो ह्यन्य ऋक्षः संवरणस्त
तः ३ तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः परीक्षित्सुधनुर्जह्नुर्निषधाश्च कुरोः सुताः
सुहोत्रोभूत्सुधनुषश्च्यवनोथ ततः कृती वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ५ कु
शांबमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः बृहद्रथात्कुशाग्रोभूदृषभस्तस्य तत्सुतः ६
जज्ञे सत्यहितोपत्यं पुष्पवांस्तत्सुतो जहुः अन्यस्यां चापि भार्यायां शकले द्वे बृहद्रथात् ७
ते मात्रा बहिरुत्सृष्टे जरया चाभिसंधिते जीव जीवेति क्रीडंत्या जरासंधोभवत्सुतः तत
श्च सहदेवोभूत्सोमापिर्यच्छ्रुतश्रवाः परीक्षिदनपत्योभूत्सुरथो नाम जाह्नवः ९ त
तो विदूरथस्तस्मात्सार्वभौमस्ततोभवत् जयसेनस्तत्तनयो राधिकोतोयुतायुभूत् १०

ह कुशांबेति तत्सुतः पुष्पवान् जज्ञे तस्यापत्यं सत्यहित इति योज्यं ७ जरया राक्षस्या ८ तस्मा
त्सोमापेः श्रुतश्रवाः कुरोः पुत्रः परीक्षिदनपत्यः जाह्नवः जह्नोः पुत्रः ९ अतो राधिकादयुतो
भूदित्यर्थः १० ॥

तस्य प्रतीपस्य देवापि शंतनु बाह्लीकाः ॥ १२ ॥ प्राक् पूर्वजन्मनि महाभिष इति संज्ञा यस्य सः ॥ १३ ॥ यदा देवो न वव
र्ष तदा शंतनुस्तत्र कारणं ब्राह्मणान्पप्रच्छ [illegible] अयमग्रजे स्थिते परि
वेत्ता [illegible] परिवित्तिः [illegible] अग्रभुक् [illegible]
वैतेन भवति अतस्तद्दोषपरिहाराय राज्यमग्रजाय देहि ॥ १५ ॥ तेन ज्येष्ठो [illegible] शंतनुः ।

ततश्च क्रोधनस्तस्माद्देवातिथिरमुष्य च । ऋक्षस्तस्माद्दिलीपोभूत्प्रतीपस्तस्य चात्मजः ॥ ११ ॥ देवा
पिः शंतनुस्तस्य बाह्लीक इति चात्मजाः । पितृराज्यं परित्यज्य देवापिस्तु वनं गतः ॥ १२ ॥ अभवच्छं
तनू राजा प्राङ्महाभिषसंज्ञितः । यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ॥ १३ ॥ शांतिमाप्नोति
चैवाग्र्यां कर्मणा तेन शंतनुः । समा द्वादश तद्राज्ये न ववर्ष यदा विभुः ॥ १४ ॥ शंतनुर्ब्राह्मणैरुक्तः
परिवेत्तायमग्रभुक् । राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये ॥ १५ ॥ एवमुक्तो द्विजैर्ज्येष्ठं छंदयामा
स सोब्रवीत् । तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा ॥ १६ ॥ वेदवादातिवादान्वै तदा देवो ववर्ष
ह देवापिर्योगमास्थाय कलापग्राममाश्रितः ॥ १७ ॥

वेदांगनाज्येष्ठं छंदयामास राज्ञः प्रजापालनादिधर्मः अतस्त्वं राज्यमंगीकुर्विति प्रार्थितवान् ततः
पूर्वमेव तस्य मंत्रिणा अश्मसरावसंज्ञेन देवापिः पाषंडीकृतः राज्यानर्हत्वे [illegible] विप्रैः पाषंडम
तानुपायाभिर्वेदाद्विभ्रंशितः सन् वेदवादस्य निंदाद्यतिवादवचनानि सोऽब्रवीत् ततस्तस्य पाति
त्येन राज्यानर्हत्वे जाते शंतनोर्दोषाभावाद्देवो ववर्षेत्यर्थः ॥ १७ ॥

श्री॰
भाग॰
टी॰
५८

भविष्यानाह तस्य पुत्र इति यावत्समाप्ति याज्ञवल्क्यात्क्रियाज्ञानं परं वात्मज्ञानं शौनकात्प्राप्स्यति
अस्त्रज्ञानं च कृपाचार्यादित्यन्वयः याज्ञवल्क्यात्त्रयीमधीत्य कृपादस्त्राण्यवाप्येति वैष्णवोक्तेः क्वचि
त् अस्त्रज्ञानं कृपाचार्यादित्येव पाठः ३८ ३४ यद्यप्यत्र सुषीनलः पुत्रः तस्मात्पारिप्लवात्सुनयः य

तस्य पुत्रः शतानीको याज्ञवल्क्यात्त्रयीं पठन् अस्त्रज्ञानं क्रियाज्ञानं शौनकात्परमेष्यति ।
सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः असीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ३७
गजाह्वये हृते नद्या कौशाम्ब्यां साधु वत्स्यति उक्तस्ततश्चित्ररथस्तस्मात्कविरथः सुतः ३८ त
स्माच्च वृष्टिमांस्तस्य सुषेणोथ महीपतिः सुनीथस्तस्य भविता नृचक्षुर्यत्सुषीनलः ३९ ।
परिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः नृपञ्जयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति ४०
तिमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः शतानीकाद्दुर्दमनस्तस्यापत्यं महीवरः ४१
दण्डपाणिर्निमिस्तस्य क्षेमको भविता नृपः ४१ ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिसत्कृतः क्षे
मकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ४२ अथ मागधराजानो भवितारो वदामि ते भवि
ता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ४३ ततोयुतायुस्तस्यापि निरमित्रोथ तत्सुतः सुन
क्षत्रः सुनक्षत्राद्बृहत्सेनोथ कर्मजित ४४

स्यात्मजो मेधावी इत्यर्थः तस्मात्सुदासः ततः शतानीक इत्यर्थः ४० बृहद्रथस्य जरासंधः तस्य सह
देवः तस्य मार्जारिः तस्मान्मार्जारेः श्रुतश्रवाः ४४

साहस्रं संवत्सरमेते भाव्या भूपालाः ततः परं भाव्यान् द्वादशस्कंधे वक्ष्यति ४९ इति श्रीभावार्थे
नवमे द्वाविंशः २२ ययातिसुतेषु अनोर्द्रुह्योस्तु वंशो यथाक्रमात् यदोस्तु वंशोऽनुक्रान्तो यावन्माम

ततः सुतंजयाद्विभुः शुचिस्तस्य भविष्यति क्षेमोऽथ सुव्रतस्तस्माद्धर्मसूत्रः शमस्ततः ४८
द्युमत्सेनोऽथ सुमतिः सुबलो जनिता ततः सुनीथः सत्यजिदथो विश्वजिद्यद्रिपुंजयः ४९
बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरं ४९ इति श्रीभागवते नवमे द्वाविंशः शुक
उ० अनोः सभानरश्चक्षुः परेष्णुश्च त्रयः सुताः सभानरात्कालनरः सृंजयस्तत्सुतस्ततः
जनमेजयस्तस्य पुत्रो महाशालो महामनाः उशीनरस्तितिक्षुश्च महामनस आत्मजौ २
शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः वृषादर्भः सुवीरश्च मद्रः कैकय आत्मजाः शि
बेश्चत्वार एवासंस्तितिक्षोश्च रुशद्रथः ३ ततो होमोऽथ सुतपा बलिः सुतपसोऽभवत् अं
गवंगकलिंगाद्याः सुह्मपुंड्रान्ध्रसंज्ञिताः ५ जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीपतेः च
क्रुः स्वनाम्ना विषयान्षडिमान्प्राच्यकांश्च ते खनपानोऽङ्गतो जज्ञे तस्माद्दिविरथस्ततः
सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजाः रोमपाद इति ख्यातस्तस्मै दशरथः सखा शां
तां स्वकन्यां प्रायच्छदृष्यशृंग उवाह तां ७ देवेऽवर्षति यं रामा आनिन्युर्हरिणीसुतं नाट्यसं

च संभवः तदेवं ययातेः पुत्राणां पंचमस्य पूरोर्वंशोऽनुक्रान्तः इदानीं चतुर्थस्य वंशमनुक्रामति
अनोरिति कर्णस्य जगतीपतेरित्यन्तेन १ तस्य जनमेजयस्य महाशालः तस्य महामनाः च

किं चानया भगवन्नियुक्तेनाखिलानामेव दंडः कार्यः साधवस्त्वत्र त्वणीयाः अतो विप्रवत्त्वेणोना
सा नु प्रहाणेनाह सततमिति हे जगन्नाणसर्वं भूस्वेखिलानामेव प्रहरणार्थं निरूपितो।

सर्वं जगन्नाणाखिलप्रहाणार्थे निरूपितः सर्वं सहो गदाम्भना विप्रस्य वास्मत्कालेदेव
देन वैविधेहिंसं तदनुग्रहो हिनः ४ यद्यस्तिदंनमरहू ना स्वधर्मो वाह्यनुष्टितः अलं
नो विप्रदैवं चेद्विजो भवतु विज्वरः ५ यदि नो भगवान्प्रीतएकः सर्वगुणाश्रयः स
र्वभूतात्मभावेन द्विजो भवतु विज्वरः ६ शुक उवाच इति संस्तुवतो राज्ञो विष्णुच
क्रं सुदर्शनं अशाम्यत्सर्वतो विप्रं प्रदहद्राजयाञ्चया ७ स मुक्तोऽस्त्राग्नितापेन
दुर्वासाः स्वस्तिमांस्ततः प्रशशंस तमुर्वीशं युञ्जानः परमाशिषः ८ दुर्वासा उवा
च अहो अनंतदासानां महत्त्वं दृष्टमद्य मे कृतागसोपि यद्राजन्मंगलानि समीहसे।

से ९॥

नियुक्तः अतोऽस्मत्कालस्यदैवहेतवेभामप्लाभायविप्रस्यमह्रूंविधेहितेदेवनोऽनुग्रह ४ सर्वस
हतार्थेणेनविप्ररक्तार्थं प्रार्थयतोयद्यसीतिद्वाभ्याविप्रोदेवदेवतायस्मिन्नतत ५।२ राजस

१९ १७ राजेत्यादि श्लोकद्वयं शुकोक्तिः १८ १९ प्रीतोस्मीति श्लोकद्वयं वाहिनोक्तिः आत्मनि
मेधायेनातिथ्येन २० भुवियंतत्रयोजनः कीर्तिं यिष्यति २१ २२ तस्यैवेयोति शापमाह ग
डकरः कोन्वत्र साधुनोऽहं स्पन्नोवा महात्मनां ऐः संप्रहीनो भगवान्त्रानतानत्स्वभोर
विः २४ यन्नाम श्रुतिमात्रेण पुमान्भवति निर्मलः तस्य तीर्थपदः किं वादासाना
मवशिष्यते २५ राजनत्र गृहीतो हेत्यानिककल्याणात्मनः मदर्वेष्टतः कृत्वा प्राणा
यत्नैभिरवहितः राजानमकृत्वाहारः प्रत्यागमनकांक्षया चरणावुपसंगृह्य प्र
साधसमभोजयत् सोशितानमानीनमातिथ्यं सार्वकामिकं तृप्तात्मान्यतिश
इत्युत्पनाशितं सादरम् प्रीतोस्म्यनुगृहीतोस्मि तव भागवतस्य वै दर्शनस्पर्शना
लापैरातिथ्येनात्ममेधसा २७ कर्मावदातमेतत्ते गायंति स्वःस्त्रियो मुहुः कीर्ति
परमपुण्यां च कीर्तयिष्यति भूरियं २८ श्रुकउ० एवं संकीर्त्य राजानं दुर्वासाः परि
तोषितः ययौ विहायसामंत्र्य ब्रह्मलोकमहेतुकं २९ संवत्सरोत्यगात्तावद्यावता
नागतो गतः मुनिस्तद्दर्शनाकांक्षो राजाभक्षो बभूव ह ३० गतेथ दुर्वाससि सोम्बरी
षो द्विजोपयोगातिपवित्रमाहरत् ऋषे
र्विमोक्षं व्यसनं च वीक्ष्य मेने स्ववीर्यं च परानुभावं ३१
तो मुनिर्यावत्तानागतः तावत्संवत्सरोतिक्रा
न्त इति ३२ द्विजसोपयोगेन अतिपवित्रमाहरत् बुभुजे स्ववीर्यं चवेयादिलक्षणं परा

तुष्टावं भगवतः प्रभावात् २५

परिक्लीयमानविप्रकमाहरणात्कुत्स्यगुरोः पितुः शापात्कौशिकस्य विश्वामित्रस्य तेजसा प्रभा
वेण ९ तेनैव कौशिकेन २ यदितिणोः आडीबकयोः विश्वामित्रो राजसूयदक्षिणाछलेन हरि
श्चंद्रं सर्वस्वमपहृत्य पातयामास तत्कृता ऋषिर्वासिष्ठो विश्वामित्रं त्वमाडी भवेति शशाप सो
पि त्वं बको भवेति शशाप तयोश्च युद्धमभूदिति प्रसिद्धं हरिश्चंद्रो हवैधस ऐक्ष्वाको राजपुत्र आ

मास श्चांडालत्वं शापाद्गुरोः कौशिकतेजसा सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते ९
पातितो वाकिरादेवैस्तेनैव स्तंभितो बलात् २ येषां कथा हरिश्चंद्रे विश्वामित्र वसिष्ठ
योः १ यन्निमित्तमभूद्युद्धं पक्षिणोर्बहुवार्षिकं ८ सोनपत्यो विषण्णात्मा नारदस्योप
देशतः वरुणं शरणं यातः पुत्रो मे जायतां प्रभो ९ यदि वीरो महाराज तेनैव त्वां यजे
इति तथेति वरुणेनास्य पुत्रो जातस्तु रोहितः १० जातः पुत्रस्त्वतेनेन मां यजेस्वति
सोब्रवीत् यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति ११॥

स तेनादिष्टस्त्विति प्रसिद्धं ८ हरिश्चंद्रस्य चरितमाह सोनपत्य इति यावत्समाप्तिकथं शरणं या
तस्त्वत्प्रसाद पुत्रो मे जायताम् ९ यदि मे पुत्रो जायते तर्हि तेनैव पुरुषपशुना त्वां यजेयमिति भा
षया तथेत्युक्तवता वरुणेन निमित्तेनास्य रोहितो नाम पुत्रो जातः १० जाते पुत्रे सर्ववरुणेना
तः स्वतो मामनेन यजस्वेति ब्रवीत् यदा पशुर्निर्दशः निर्गतदशादिवसः स्यादिनस्त्वराजाब्रवी

हरिश्चंद्रो
॥

श्री॰
भाग॰
नवी॰
२१

राजन्नुद्देवं वरुणं राजानं गतः पर्वतनारदौ सोनापि काकवचनं दंआह संज्ञामसमर्थः ॥ १॥ अथ तदा
शुचिरिति देवतं कालं वंचयता राज्ञोक्तः प्रार्थितो देवो वरुणः तेन कालं प्रतीक्षतेनमर्थः ॥ ९॥ चि
कीर्षितं आत्मना पशुना वरुणं यजनं ॥ १॥ ततः अजापितेन वरुणेन यस्मात् प्रजन प्रवृत्तं म

निर्दशे च स आगत्य यजस्वेत्याह सोऽब्रवीत् दन्ताः पशोर्यज्जायेरन्नथ मेध्यो भवेदिति १२
दन्ता जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् यदा पतन्त्यस्य दन्ता अथ मेध्यो भवेदिति १३।
पशोर्निपतिता दन्ता यजस्वेत्याह सोऽब्रवीत् यदा पशोः पुनर्दन्ता जायन्तेऽथ पशुः शुचिः १४
पुनर्जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् सान्नाहिको यदा राजन् राजन्योऽथ पशुः शुचिः
१५ इति पुत्रानुरागेण स्नेहयन्त्रितचेतसा कालं वंचयता तं तमुक्तो देवस्तमैक्षत।
१६ रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितं प्राणप्रेप्सुर्धनुष्पाणिररण्यं प्रत्यप
द्यत १७ पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरं रोहितो ग्राममेयात्तमिन्द्रः प्रत्यषेधत
१८ भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः रोहितायादिशच्छक्रः सोऽप्यरण्येऽवसत्स
मां १९ एवं द्वितीये तृतीये चतुर्थे पंचमे तथा अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाह वृत्र
हा २०

इदमेव यस्मात्तेनैनं श्रुत्वा १८ समाः वत्सरमेकं १९ द्वितीये वर्षे तत्र अभ्येत्याभ्येत्य।
तथैव तं प्रत्यषेधत् किंचित्किंचिदाह २०॥

२१

1011

एवंविधाअनेकगुणायसस्मः विविंचसदःसहितान्भोगान्निरयशायानपश्यदित्यर्थः २७
इतिश्रीभावार्थदीपिकायांनवमेपंचमोध्यायः ५ षष्ठारंभेमन्वरीषस्यवंशमुक्त्वाततःपरं षष्ठाद्यष्टभि
रध्यायैःश्क्ष्वाकोर्वंशउच्यते तत्रषष्ठेशशादादिर्मांधातन्तोनिरूप्यते प्रसंगात्सौभरेराख्या

एवंविधानेकगुणःसराजापरात्मनिब्रह्मणिवासुदेवे क्रियाकलापैःसमुवाहभ
क्तिंययाविरिंच्यान्निरयांश्चकार २७ श्रीशुकउ० अथाम्बरीषस्तनयेषुराज्यंसमानशी
लेषुविसृज्यधीरः वनंविवेशात्मनिवासुदेवेमनोदधद्ध्वस्तगुणप्रवाहः २८ इत्ये
तत्पुण्यमाख्यानमंबरीषस्यभूपतेः संकीर्तयन्ननुध्यायन्भक्तोभगवतोभवेत् २९
इतिश्रीभागवतेनवमस्कंधेपंचमोध्यायः ५ श्रीशुकउ० विरूपःकेतुमान्शंभुरम्ब
रीषसुतास्त्रयः विरूपात्पृषदश्वोभूत्तत्पुत्रस्तुरथीतरः १ रथीतरस्याप्रजस्यभा
र्यायांतंतवेर्थितः अङ्गिराजनयामासब्रह्मवर्चस्विनःसुतान् २॥

मांधातृतनयोपते १ तंतवेसन्तानार्थंअंगिरसाजनिताःएतेरथीतरस्यक्षेत्रेप्रसूतत्वेनर
थीतरगोत्राःसन्तःआंगिरसावीर्येणप्रसूतत्वादांगिरसाश्च २

श्री॰
भाग॰
नवी॰
१९

पुनरपि तयोन्तस्यागामनीषां जातानां प्रवराः स्मृताः स्वरनाः यतः स्तत्रैपिताः ब्राह्मणाऋष
यः ३ तदेवं मनोर्देशास्तु पुत्रेषु एव भय्यकविश्वविरकतानां वंशप्रवर्तकोक्तवादीनां च स
मानां वंशात्ता इति तस्मान्मेण्णोक्ताः इदानीमतिवितनुमिक्षाकोर्वंशमाह जवतस्तिमादि
नायावन्तो मवंशप्रस्तावः स्वनऊर्वं तेमनोत्राणातानन्तस्पृशयांजनयामासदशपुत्रा
नितिपूर्वोक्तवाक्यात्मिभ्राये [illegible] ति दृष्टव्यापुत्राणांशानेस्पृष्टः ५ आर्यावर्तःपुण्यभूमि

एतेत्त्वत्रपत्रतातैपुनस्त्वांतिरस्ताःस्मृताः वर्थातरवाणांप्रवरः तेत्रापिताद्विजातयः
३ तदेवस्तुमनोर्जतेस्त्वाऊर्ध्वाणतःस्मृतः तस्यपुत्रशतज्येष्ठोविकुक्षिनिमिदंडकः ५
तेषांपुरस्तादभवन्नार्यावर्तेनृपानृप पंचविंशतिपश्चाच्चत्रयोमध्येऽपरेन्यतः २
सएकदाष्टकाश्राद्धइक्ष्वाकुःसुतमादिशत् मांसमानीयतांमेध्यंविकुक्षेगच्छ
माचिरं तथेतिसवनंगत्वामृगान्हत्वाक्रियार्हणान् [illegible] श्रांतोबुभुक्षितोवीरःशशंचा
दद्पस्मृतिः १

मध्येविंध्यहिमाचलयोः तस्मिन्नवस्थानास्मद्रूपयोः [illegible] विभागेनपंच
विंशतिर्नृपाअभवन् हेनृपतथैवपश्चाच्चत्वारिंशतःमध्येतस्मेष्टाश्चयःअपरेतुअन्य
त्रदक्षिणोत्तरादिषु ३ विकुक्षिर्देवश्राद्धेश्वासिदिविश्वुत्वदपति तवदेतमाह सएकदे
तित्रिभिः ४ क्रियार्हणान्श्राद्धार्हान् श्रादयत्स्वभतयत् १॥

१९

नकुहर्वसिष्ठः प्रोद्दणायमात्मदोविनसंस्काराय ८ तस्कोविधिः सदाचारोयेनतं ९ सवइक्ष्वाकुःया
जकेनवसिष्ठेनयज्ञभोगेविरक्तोयोगीसन् तेनयोगेनकलेवरंसन्त्यायसपरतत्वंतदवाप १० या
सनपालयनृदविभीजे ११ देवपुरस्सज्ञपात पुरंजयोइंद्रोवाहोसेतिइंद्रवाहः ककुदिस्थितनात

योवोग्निवद्दसामासपिदेतेनचतकृतः योदितप्रोद्दणायाहदृष्टैमेतदकर्मकं ८ त्ता
तापुत्रस्सतत्कर्मगुरुणाभिहितन्नृपः देशान्तिःसावधानास्सतंत्सक्कविधिकृपा ९ सत
विप्रेणसवादयाजकेनसमावसत् सन्त्याकलेवरंयोगीसतेनावापयत्परं १० पितर्युप
रतेभ्येत्याविकुक्षिःपृथिवीमिमां शासदीजेहवियतैः शशादइतिविश्रुतः ११ पुरंजय
स्तस्यसुतइंद्रवाहइतीरितः ककुत्स्थइतिवाप्युक्तः यत्रनामानिकर्मभिः १२ कृतां
तस्मासीत्समरोदेवानांसहदानवैः पार्ष्णिग्राहोहभवत्
योदेवैर्दैत्यपराजितैः १३ ॥

ककुत्स्थइतिवशशादस्तस्यजीर्णानामानितत्तकर्मनिमित्तानि १२ नामेवव्याचष्टेकृत्सा
कृतांतइतिसमर्पितः कृतेविश्वमनेयतीतितथा पार्ष्णिग्राहः सहायः १३

श्री·
भाग·
नटी·
८

1014

इन्द्रो यदि मम वाहनं स्यात्तर्हि दैत्यान् हनिष्यामीति वाहनत्वे वृतः संनिद्धोल्लायात्तदनं
गोऽजर्वं निस्लोकेन वाहनस्य वाहनना यमसताङ्घोचमूत्वेत्यर्थः १४ १९ येभिमुखं येयपुस्तान्यमे
दर्शायितं सदेहनेन वभल्लैरनयदित्यर्थः १० तस्येषुपातस्य मेङकुतुः स्वमालयं पाताले १८ इति

वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः । वाहनत्वे वृतस्तस्य बभूवेन्द्रो महावृषः ॥१२॥ स
संनद्धो धनुर्दिव्यमादाय विशिखाञ्छितान् । स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः ॥१३॥
तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः । प्रतीच्यां दिशि दैत्यानां न्यरुणत्त्रिदशैः पुरं ॥१४॥
तैस्तस्य चाभूत्प्रधनं तुमुलं लोमहर्षणं । यमाय भल्लैरनयद्दैत्यानभिययुर्मृधे ॥१५॥ त
स्येषुपाताभिमुखं युगान्ताग्निमिवोल्बणं । विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयं ॥१६॥
जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये । प्रत्ययच्छत्स राजर्षिरिति नामभिराहृतः ॥१७॥
पुरञ्जयस्य पुत्रोऽभूदनेनास्तत्सुतः पृथुः । विश्वगन्धिस्ततश्चन्द्रो युवनाश्वस्तु तत्सुतः ॥२०॥
श्रावस्तस्तत्सुतो येन श्रावस्ती निर्ममे पुरी । बृहदश्वस्तु श्रावस्तिस्ततः कुवलयाश्व
कः ॥२१॥

तैः कर्मभिः पुरञ्जयादिनामभिराहूतः पाठान्तरे आहृत इत्यर्थः १७ श्रावस्तिः श्रावस्त
स्य पुत्रः कुवलयाश्वस्य पुत्रः धुन्धुमार इति ख्यातः २१ ॥

1015

तत्रकारणमाह हतानामेकविंशत्यासहस्रैर्हतः सनन्दनवानुपुंडमारस्तिचेति चकारस्मानयः
२२ २४ अयुतैस्मान्नि[illegible]भात्कृशाश्चः २३ भार्यायाणंशतेन सह [illegible]पुत्रार्थमिद्रदेवमामिष्टिं वर्तया।
मा[illegible]स्मान्यश्चर्यो २६ तर्षितः तर्षितः सन् जलार्थं प्रविष्टः मे[illegible]मे वितते जलेपत्नीदेयंस्वयंययौ २७

यः स्त्रिया सहितेकस्यपुंडवामासस्वंवली हताना[illegible]कविंशत्यासहस्रैरदनहुतः २२ पुं
डमारस्तत्र[illegible]तान्तवजनतः पुंयोमुनोत्रिणामसर्वेत्रयप्रवावशोषिताः २३ ह
तास्यः कपिलाख्य[illegible]महाम्बरस्तिभारत हतास्यपुत्रोदरप्रेषानिक्रमलात्ततःस्मृतः २४ व
[illegible]णाया[illegible]स्पकृपाखाखायास्वेनजित मन्नाखोभवत्तस्यसोनपमोवनेगतः मा
र्याः[illegible]तेननिर्विलस्य[illegible]योस्पकृपालवः इतिस्तवमेयाचक्रे[illegible]नसमाहिताः २६ ए
जानयत्तसदनं[illegible]निशितर्षितः [illegible]यानानि[illegible]योमंत्रजलेस्वयं २७ अग्नि
नाल्लेनिशाम्याय[illegible]कलशंप्रभो प्रमक्तः कस्पकर्मेदपीतंपुसवनंजलं २८ राजापि
तंविदित्वाथईश्वरप्रदितेनते ईश्वरायनमस्कृतहोदेवबलंबल २९ ततःकाल।
उपाहृते[illegible]निर्भिद्यदक्षिणं पुंवनाश्चस्पततनयश्चक्रवर्तीजजानह ३०

मुदकेनिरुदकंपुंसवनंपुत्रोसतिकारणं ३१ अहोदेवबलमुग्रंवलेनकदितिवदंत ईश्वरा
यनमस्कारंचक्रुः ३२ ३३ ॥

श्चयं कं धास्यति पास्यतीति किं विलापिनः विप्रैरुक्ते सति तत्र स्वाभिप्रायमाविष्कृतं इंद्रो मां धाता हे वत्स मा रो
दीरिति मुखे तद्देशिनीं तर्जनीं अदात् ददौ इत्यर्थः ३१ तस्य पिता युवनाश्वो भिन्नकुक्षिरपि न म
मार किंतु कालांतरे ब्राह्मणप्रसादात् तपसा सिद्धिमगात् ३२ मांधातुर्महिमानमाह त्रसद्दस्युरिति षड्भिः त्रं

कं धास्यति कुमारोयं स्तन्ये रोरूयते भृशं मां धाता वत्स मा रोदीरितींद्रो देशिनीमुखे ३१
न ममार पिता तस्य विप्रदेवप्रसादतः युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ३२
त्रसद्दस्युरितींद्रोंग विदधे नाम यस्य वै यस्मात्त्रसंति ह्युद्विग्ना दस्यवो रावणादयः ३३
यौवनाश्वोथ मांधाता चक्रवर्त्यवनिं प्रभुः सप्तद्वीपवतीमेकः शशासाच्युततेजसा
ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः सर्वदेवमयं देवं सर्वात्मकमतींद्रियं ३५
द्रव्यं मंत्रो विधिर्यज्ञो यजमानस्तथर्त्विजः धर्मो देशश्च कालश्च सर्वमेतद्यदात्मकं ३६
यावत्सूर्य उदेति स्म यावच्च प्रतितिष्ठति सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते ३७

गदेः यस्मान्मांधातुः ईश्वरबुद्धिग्नाः कं पिता ... तस्य इति तत्र तं इंद्रो यस्य त्रसद्दस्युरिति
नाम विदधे तस्मान्मांधाता चावनीमेकः प्रशशासेत्युत्तरेणान्वयः ३३ अच्युतस्य तेजसा प्रभु
तेनेति ... ३४ आत्मविदपि सन् यज्ञं विष्णुमीजे तमेव विशिनष्टि सर्वदेवमयमि
ति सार्द्धेन ३५ प्रतितिष्ठति अस्तं गच्छति ३७

४२४४ वसुदेवस्यपत्नीः पुत्रांश्चाह ४४ पौरवीत्येकादशभिः ४१ कौसल्याभद्रा ४८ ॥ अष्टम

स्वमिश्रानेनपालादीशामीकानसदामिनी कंकस्यकर्णिकायांवैस्वतयामजयावपि ४४
पौरवीरोहिणीभद्रामदिरारोचनाइला देवकीप्रमुखाआसन्पत्न्यआनकदुंदुभेः ४५ बल
गदंसारणंचदुर्मदंविपुलंध्रुवं वसुदेवस्तुरोहिण्यांकृतादीनुदपादयत् ४६ सुभद्रो
भद्रबाहुश्चदुर्मदोभद्रएवच पौरव्यास्तनयाह्येतेभूताद्याद्वादशाभवन् ४७ नंदोपनं
दोकृतकशूराद्यामदिरात्मजाः कौशल्याकेशिनंत्वेकमसूतकुलनंदनं ४८ रोचना
यांःसुताजाताहस्तहेमांगदादयः इलायामुरुवल्कादीन्यदुमुख्यानजीजनत् ४९ विपृ
ष्टोधृतदेवायामेकआनकदुंदुभेः शांतिदेवात्मजाराजन्प्रशमप्रसितादयः राज
न्यःकल्पवर्षाद्याउपदेवासुतादश वसुहंससुवंशाद्याश्रीदेवायास्तुषट्सुताः ५१
देवरक्षितयालब्धानवचात्रगदादयः वसुदेवःसुतानष्टावादधेसहदेवया पुरुवि
श्रुतमुख्यांस्तुसाक्षाद्धर्मोवसूनिव वसुदेवस्तुदेवक्यामष्टपुत्रानजीजनत् ५३ की
र्तिमंतंसुषेणंचभद्रसेनमुदारधीः ऋजुंसंमर्दनंभद्रंसंकर्षणमहीश्वरं अष्टमस्तुत
योरासीत्स्वयमेवहरिःकिल सुभद्राचमहाभागातवराजन्पितामही यदायदाहिध
र्मस्यक्षयोवृद्धिश्चपाप्मनः तदातुभगवानीशआत्मानंसृजतेहरिः
स्तुस्वयमेवासीत् नत
कर्मादिनाहेतुनानाभ्यांजनितोवायतोसोहरि ५२ तदेवाषपाद्यतिपृश्निभिः ५३

ईशस्य मायया नियंतुः परस्य सर्वस्य द्रष्टुः साक्षिणः आत्मनः सर्वगतस्य नह्येभूतस्य मा।
याविनोदेविना जन्मनः कर्मणो वा हेतुः संभवतीत्यर्थः ५४ किंच यस्य मायाचेष्टितं पुंसोजी।
वस्यानुग्रहकस्य जनकर्मादि पावतस्य तेन जन्मनादिसंभवः अनुग्रहमेवाह हि यस्मात्तदेव।
स्थित्यादयश्चष्यते प्रलयस्तीनो गुणयेनो तत्स्य धर्मो यस्य संभवान्तदुपादिसृष्ट्यादिनाय मोहिंसपादने
नानुग्रहः तथात्मलाभाय मोक्षाय चेष्यते तेन चहेतुः तेनेव सूयमाणेन तत्सा यिमा देनेहेतोः

नह्यस्य जन्मनो हेतुः कर्मणो वा महीपते आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ५५
यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ५६
अक्षौहिणीनां पतिभिरसुरैर्नृपलाञ्छनैः भुव आक्रम्यमाणाया अभाराय कृतोद्यमः
५७ कर्माण्यपरिमेयाणि मनसापि सुरेश्वरैः सहसंकर्षणश्चक्रे भगवान्मधुसूदनः
५८ कलौ जनिष्यमाणानां दुःखशोकतमोनुदं अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः
५९

५७ ननु विहितेऽस्मिन्नेवानुग्रहस्तत्राह अक्षौहिणीनां नृपलाञ्छनानां अभाराय भारपरिहाराय ५८
सुरेश्वरैरपि मनसाप्यपरिमेयानि अवितर्क्याणि संकर्षणसहितश्चक्रे ५७ संकल्पमात्रे।
ण भूभारहरणसमर्थस्यापि कर्मकरणं यशो विस्तारद्वारा भक्तानुग्रहार्थमित्याह क
लाविति दुःखशोकतमांसि नुदतीति तथा तद्यशो व्यतनोत् ५८

1021

ॐ नमो भगवते वासुदेवाय नमः ॐ गुणानां गुणानां वासेहृल्लीनेकल... निधिं नमहेश्वर
णां यामि परमानंदमाधवं त्रिगुणाद्दभिरध्यायैर्नवमस्तनस्कंधान्वयः नव मेकुलसत्कीर्ति
संगायवितन्वते २ एवमुक्तोष्टमस्कंधेसद्धर्मः सत्वशोधकः कर्तृपालकवक्तादिमना
हीनोनिरूपणोः ३ सद्धर्मेशुद्धसत्वानांमंत्रवंशेशासत्कथा स्वधीसोमानयाख्यानैरधु

परीक्षिदुवाच ॐम न्वंतराणिसर्वाणित्वयो
क्तानिश्रुतानिमे वीर्या ण्यनंतवीर्यस्यहरेस्तत्र
कृतानिच १ योसौसत्य व्रतोनामराजर्षिर्द्रवि
डेश्वरः ज्ञानंयोतीतक ल्पांतेलेभेपुरुषसेवया
सवैविवस्वतःपुत्रोम नुरासीदितिश्रुत त्वत्त
स्तस्यसुताःप्रोक्ताइक्ष्वा कुप्रमुखान्नृपाः ३ तेषां
वंशंपृथग्ब्रह्मन्वंशा नुचरितानिच कीर्तय
स्वमहाभागनित्यंशु श्रूषतांहिनः ४ येभूताये
भविष्याश्चभवंत्यद्यतनाश्चये तेषांनःपुण्यकीर्तीनां सर्वेषांवदविक्रमान् सूत
नाखंगतोवदने ५ तत्रचात्रयोद ॐ एवंपरीक्षितावाक्तासदसिब्रह्मवादिनत ६
शाभिरध्यायैःसूर्यवंशानुवर्णते एकादशाभिरध्यायैःसोमवंशस्ततःपरैः २ तत्रत
प्रथमेध्यायेवैवस्वतमनोवंशानये सोमवंशप्रवेशांको सुद्युम्नसोमउच्यते ९ उक्तानुवादस्

ॐ श्रीभागवतटीकायांनवमस्कंधे ...

वंशोवैवस्वतमनोर्वंशप्रोक्तोमन्वंतराणीतिपंचभिः ८॥

दृष्ट्वा तां पत्नीसहस्राणां भार्यापुत्रस्य प्रेमैकं सौ... लक्षमिमिवं तासु पुत्राणां दशलक्षसहस्राणि
जनयामास षष्टिपुत्रा बभूवुः हृष्टकीर्तिः पृथुश्रवा बाहुस्तादय षट्प्रधानाः श्रेष्ठा ये वा तेषां मध्ये पंच आत्म
जा आसन् स्फुसन्ना नैवाह पुरुजिदिति भार्याभयादेकैकभार्यासु सर्वथा पुनस्तेषामेव साश्रुत्स
तन्नयमेव पुत्रप्रदेशमवदितिदर्शयन्नाह जामयन्तीति १४ यदि सपत्नी सा न ततोर्दिस्तुषियंपु

दृष्ट्वा लक्षसहस्राणि पुत्राणां तास्वजीजनत् तेषां त्वष्टप्रधाना ये श्रेष्ठ्यश्च वरूत्थात्मजाः ११
धर्मी नामो शनात्त सहयं मेघशातस्य याह नन्हनो रूचक्रा सत्स पंचास त्रात्मजाः स्फुरण पु
रुजिद्कुकारुकेन्द्रपृथुश्यामसन्मजिताः १२ ज्ञामयं त्रस्तप्रजोप्यसौ भार्याशैब्यापतिभया
न्नाविंदत्कन्तु भर्तुराज्ञाम्ना कन्यामाहारयीत् १३ रथस्थानां निरीक्ष्याह शैब्यापतिममर्षि
ता कोयं ऊरुदकभस्त्यानरथमारोपितेतितिवे १४ स्नुषा तवेन पिहिते स्मयंनीयतिमब्रवी
त् यदेव यासपत्नीचस्नुषामेपुत्र्योतस्व जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते अ
न्वमोदंत तद्विश्वेदेवाः पितर एव च १६

येनापि न तेन दत्ता इत्याह २१ असपत्नीचेति २८ अतिभयव्याकुला आह जनयिष्यतीति भा
र्याभयप्रकंपमानस्विन्नसर्वांगस्य राज्ञः प्राणसंकटमालोक्यानुकंपिता स्तेन पूर्वं बहुका
लमाराधिता विश्वेदेवाः पितरश्च तथास्त्विति अन्वमोदन् ततश्च देवताप्रसादेन जनयिष्य

श्री॰
भाग॰
टी॰
३१

1024

प्रतिवचनमहूर्नेगुणेनचनिवृत्त रजस्कापि शैव्या गर्भं धात् तदेवचमहिम्नाय वाशावादिभिः स्तुतः
यथोक्तं भार्यासु त्वसापत्न्येकेविद्भविषु स्पृष्टा नाद्रताः ते धर्मावस्था मत्वः श्रेष्ठः शैव्यापतिरभूत्स्य ३।
नि ३९ इति नवमस्कन्धे टीकायां त्रयोविंशः २३ चतुर्विंशे तु विदर्भस्य पुत्रत्रयसमुद्भवः वंशाना नामुखाः प्रोक्ता

शैव्यागर्भमधात्काले कुमार्यः सुषुवे शुभं स विदर्भ इति प्रोक्त उपयेमे स्नुषां सती ३९ इ
ति श्रीभागवते नवमस्कन्धे त्रयोविंशोऽध्यायः २३ शुक उवाच तस्यां
विदर्भोजनयत्पुत्रौ नाम्ना कुशक्रथौ तृतीयं रोमपादं च विदर्भकुलनंदनं १ रोमपादसु
तो बभ्रुर्बभ्रोः कृतिरजायत उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृपाः २ क्रथस्य कु
न्तिः पुत्रोभूद्वृष्णिस्तस्याथ निर्वृतिः ततो दशार्हो नाम्नाभूत्तस्य व्योमः सुतस्ततः ३ जीमूतो
विकृतिस्तस्य यस्य भीमरथः सुतः ततो नवरथः पुत्रो जातो दशरथस्ततः ४ करंभिः श
कुनेः पुत्रो देवरातस्तदात्मजः देवक्षत्रस्ततस्तस्य मधुः कुरुवशादनुः ५ पुरुहोत्रस्त्वनोः
पुत्रस्तस्यायुः सात्वतस्ततः भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोन्धकः ६ सात्वतस्य
सुताः सप्त महाभोजश्च मारिष भजमानस्य निम्लोचिः किंकणो धृष्टिरेव च ७

रामकृष्णोद्भवावधि ॥ वैधाद्यः दमघोषाद्यः २ ततो दशारथाद्भजनिः पुत्राणां नवादेवमा
णमात्रं स्वछायां निरीक्ष्य ततः क्षणमन्तरिक्षं पश्यन् स्वकीयं स्वदेहमु[illegible]म्लानमाग्निहीनमेघाक्तैः
समानाधछायाकान्तिर्यस्यासौ तं न यः पश्येत्स न पश्यन्नयेन किंच इह स्वकाये विकृतौ दृष्टायां स्वस्यां
विकारः स्यात् यस्यांगस्य यथाविकारो दृष्टस्तस्य तथाविकारः स्यादित्यर्थः १२ ॥ दुर्गायै नमः

६०

1359

1360

यश्चत्वगादिहेतुं विनान्यलंभदयति यश्च नस्मकादिव्याधिं विनावक्रभ्रू रिमदयति यश्च सदसत्प्रवृत्ति विष
येनीन सात्म्यस्य कः स्वभावः सत्प्रवृत्तिस्वभावो सति प्रवर्त्तेनासत्प्रवृत्तिस्वभावश्चरतीति यश्चांगुलिभ्यां
क्रांतो तिपीडितो विलोचनांतो नेत्रप्रांतो येन स मेचकमासुरपत्रनिभं बद्धकं स्वद्योतायमानं स्वानुभू
वसिद्धं नेत्तते ८ मध्य इति मध्ये ललाटमिति पारमध्ये षष्ठ्या वेत्यव्ययीभावः यः ललाटस्य मध्ये मणि

अतीवनद्धं वहुवान्यहेतो रतीव सात्म्यः सदसत्प्रवृत्तौ अप्यङ्गुलिक्रांतविलोचनांतो न मेचकं
चंद्रकमीक्षते यः ८ मध्ये ललाटं मणिवंधधारी न वालिकां पश्यति यः कलावी अह
रेकं यः शवगंधिगात्रः सर्वत्र सीमंतितमूर्द्धजो वा ९ अपि त्वरं द्वेममनखः शरीरात्सद्यः स्न
वकाम विलोचनो वा निरीक्षते सत्त्वमभानुषं यः विस्रस्तनासानयनश्रुतिर्वा १० ॥ छ

वंधं धत्वालिकां कृशांकलावीन पश्यति नल्लहस्तादथस्तसंधिर्मणिवंधः तदधो हस्तभागः कलावी स्त्री
णां करभूषणस्थाने यश्चाहेतुकमकारणं शवस्येव गंधः शवगंधो येषां तानि शवगंधीनि तानि च तानि गा
त्राणि यस्यासौ तथा पि वा सर्वत्र सीमंतिता जाता सीमंताः मूर्द्धजाः केशा यस्यासौ तथा सीमंतः स्त्रीणां ल
लाटादूर्द्ध्वे केशावेशः प्रसिद्धः ९ अपीति यो वा शरीरात्त्वरितं गलेतिरोमाणि नखानि यस्यासौ तथा
यो वा सद्यः स्रवदस्रुविम्बकामं विलोचने यस्यासौ तथा यो वाऽमानुषपिशाचादिकं सत्त्वं निरीक्षते

अथप्रकृतं नत्रतावत्स्वस्यारिष्टान्याह श्लोकसप्तकेन छायामिति यश्चंवरं नष्टवर्णीरत्नमुत्तरेण सर्व
त्रसंवंधः अनेकं यः विधोश्छायां कलंकेनालोकयेत् ध्रुवं नक्षत्रमालां वमात्तचक्रं चुनारामंडलामप्र
केनालोकयेत् यस्यचपदं कर्दमेधूलादौ निनिम्नं खंडं जायते यस्यवनिष्ठ्यूतः कफः श्लेष्मा उदके च प्र
तोवुद्बुदवी भजलेसंगीमज्जनमधोयाति ५ उरइति यस्यवोरोवक्षःश्चंदनादिनालिप्तमिनरांगात्सर्वमेव

छायां विधोर्नध्रुवमप्युतमालामालोकयेद्योनचमात्तचक्रं खंडं पदं यस्यचकर्दमादौ क
फश्चप्रुतोमज्जतिचांवुचुंवी ५ उरःपुरः शुष्यतियस्यचार्द्रं नमानितिस्तोकगलयश्च
वक्रे स्नातस्यमर्त्यपिधूमवद्धीनिलीयतेरिक्तमुखः खगोवा ६ नाकीर्णकर्णः श्रुणु
याच्चघोषंयोवामुमुक्षोपिघतिनधत्ते निःश्रीरकस्मात्सुनरांचमुश्रीःशुभाःस्यवीर्यान्ते ९

शुष्कं भवति यस्यवमुखेकनिष्ठांगुष्ठोविहायमध्यमांसिस्तोकगलयः परस्परकर्तृसंलग्नानसमा
विशंति मरिष्यतोहिमुखवृत्तंसंकुचितं भवति यस्यवोदके स्नातसमस्तकेधूमाभिरवास्यान्त यस्यवा
मूर्द्धिफलधान्यादिनारिक्तचंचुः काकश्येनादिर्निवसति ६ नाकीर्णेति यश्चांगुल्यादिना वृतकर्णं
धुः स्वाभाविकंघोषंनश्रृणुयात् योवामुमुक्षोपिवित्तिंनयाति यश्चमुश्रीरपिविनैववरोगादिना भया

सानवृत्तिन।

एवमनेकेषु फलाध्वसु समाधानमाह प्रागिति पूर्वजन्मनि यदुपार्जितं सदसत्कर्म तत्प्राक्कर्मेत्युच्यते त
देवदैवं यद्धैहिकं कर्म तत्प्रयत्नः पौरुषं चोच्यते प्राक्कर्मणः शोषाय पोषाय च ऐहिकं विधीयमानं क
र्म समर्थं भवति किंवत् सलिलादिवत् जलाग्निभूमीसंस्कारवत् यथा बीजं संस्कारसंस्कृतं सदुदे
निवर्द्धनेषां न्यायात्तीयते तथा प्राक्तनबीजमैहिकेन यत्नेन वर्द्धनेन न्यायात्तीयते तस्मात्सदाचारवतां
श्रुतिस्मृत्याद्युदितां चरणनिष्ठानां कदापि न हानिः अतः सदपि कर्म फलं सता प्रयत्नेन निवार्यते ततो

प्राक्कर्मबीजं सलिलानलोर्वीसंस्कारवत्कर्म विधीयमानं शोषाय पोषाय च तस्य तस्मा
त्सत्कालसदाचारवतां न हानिः ३ फले यदि प्राक्तनमेव तत्किं कृष्याद्युपायेषु परः प्रयत्नः
श्रुतिः स्मृतिश्चापि न लौकिकवैधविध्यात्मके कर्मणि किं निषक्ता ४ ॥

निमित्तलक्षणप्राक्तनादयो प्यवष्टम न्वेष्याः ३ केचित्प्राक्कर्मैव फलदमिति मन्यन्ते तन्मतं निरस्य
ति फलेदिति विपरीतास्थानि कौ प्रागभवं प्राक्तनं कर्मैव चेत्फले न यत्नः तदा यदवश्यं भावि तद्
वत्येव तथा याम्यात्सर्वजने कृष्यादिषु न यतनीयम् यतन्ते चातः प्रत्यक्षविरुद्धं तदित्यर्थः आगमविरो
धमप्याह श्रुतिरिति लौकिकवैधविध्युपेकर्मणि श्रुतिः स्मृतिश्चापि किं निषक्ता आत्मानं सतत
तं रक्षेदित्यादि न वृत्तमारोहेन्न कूपमवेक्षेत न बाहुभ्यां नदीं तरेन्न संशयमभ्यापद्येतेत्यात्मत्राणायनके हि

तदेव प्रपंचयति स्वप्न इति एवं स्वप्नादिकोविविधोनेकप्रकारः फलाध्वा फलागमकमार्गोस्ति तत्र स्वप्नं नि
शि जन्तूनां ग्रहवासनावासितमनसः परिणामपदार्थज्ञानं समिथ्याभूतोपि शुभाशुभसूचकः निमित्तानि
ह्युतदुर्वचनादीनि शकुनाः पूर्णकुम्भादयः स्वकर्म निजप्राचीनकर्मविपाकः शारीरं सामुद्रिकल
क्षणं आगंतुकं भविष्यत्सूचकं जातकादि अद्भुतानि दिव्यभौमांतरिक्षजा उत्पाताः दोषा वातपित्ताद
यः स्वाभाविकादेहस्यास्तेषामभिचारः स्वरविभंगादि ग्रहचारः ग्रहाणां वक्रमार्गोदयास्तादयः का

स्वप्नो निमित्तं शकुनाः स्वकर्म शरीरमागन्तुकमद्भुतानि दोषा
भिचारग्रहचारकालकाम्यानि चैवं विविधः फलाध्वा २

लः संवत्सरमासलग्नादि काम्यं कांक्षितं रोहिकं पुरुषचेष्टितादि तथाह शौनकः तिथिकरणर्क्ष
निशाकरविलग्नपरिकल्पनामयं गर्गः पाणिग्रहणे शुभफलं वदन्ति यवना वसिष्ठश्च ग्रहराशिगो
चरफलं जातकविहितं च देवलः प्राह शकुनफलज्ञाः शकुने निमित्तकुशला निमित्ते च कर्मस्वभाव
मन्ये कुलदेशजातिस्वभावमपरे तु इत्यमन्यमनयः कालविशेषात्फलमिति यत एव फलाध्वा विवि
धोतो वरवध्वोः सामुद्रिकलक्षणस्वरादिकमप्यस्माभिरुच्यत इति भावः तथोक्तं जातकनिर्मि
तश्च द्वा शुभलक्षणलक्षितां कुलोद्भूतां वरयेत्सुतसौख्यार्थी यवीयसीं कन्यकामिशाम् यवीयसीव

अथ स्त्रीपुंसयोर्लक्षणज्ञानाय निश्चाध्यायारंभः तत्र तत्कारणमाह उद्दिश्येति वरः प्रथमं कुमा
र्याः समुद्रेण प्रणीतानि लक्षणानि उद्दिश्य स्फुटं ज्ञात्वा निमित्तैः शुभशकुनादिभिः शुभं ज्ञात्वा
कुमारीं वृणुयात् एवं कुमार्यापि वरस्य लक्षणानि सन्ति शुभं निमित्तं च ज्ञात्वा वरं वृणुयात् एवं चे

उद्दिश्य सामुद्रिकलक्षणानि वरः कुमारीं वृणुयान्निमित्तैः ।
एवं कुमारी वरमप्युदर्कं न त्वेकधारं निरधारि धीरैः १ ॥७

आत्मकफलसंदर्भस्यैकैकमर्थमित्यत आह उदर्कः इति हि यतो धीरैर्गर्गादिभिरुदर्कोत्तरफल
मरं निश्चितमेकधैकविधं न निरधारि किं तु बहुधोक्तमिति तोयमप्येकः प्रकार इत्यर्थः समुद्रः
कित्वलक्षणशास्त्रस्य प्रवर्तकः यथा व्याकरणस्य पाणिनि
श्छंदसो वा पिंगलः अतस्तानि सामुद्रिकानीत्युच्यं
ते ॥ १ ॥७ ७

अपवादापवादमाह हिमरश्मीति यदि चंद्राक्रांतनवांशकात्सप्तमग्रहः शरसायकांशके पंचपंचाशदंशे भव
ति तदायं यामित्रदोषउपसर्गंडवरउपद्रवोघमोनिविडैः प्रचुरैरप्यन्यगुणैर्न हन्यते दुष्परिहर इत्यर्थः १२
अथैषां योगानां विचारगम्यत्वमाह मोघाइति केपियोगाः शरीरधारिणः प्रत्यक्षपुरुषावतत्त्वाहृश्यमा
नाअपि दिग्निविनाग्निना दग्धेनअक्षेनबीजेन तुल्या मोघाः सुकार्यवत्तमा न भवन्ति परेकेचन योगाः पर्णैः पत्रैराहु

हिमरश्मिनवांशकात्तवलोयदि खेटः शरसायकांशके अयमन्यगुणैर्न हन्यते निविडैरप्युपसर्ग
ङ्वरः १२ मोघाः शिखिदग्धबीजवद्योगाः केपिशरीरधारिणः दृढगूढफलोदयाः परे पर्णकी
र्णहुताशराशिवत् १३ इतियः प्रतिकूलकारकग्रहभावांशनिवेशदृष्टिभिः तन्वादिफले
षु दत्तहृत्कस प्राप्नोत्यवतंसतां सताम् १४ इति विवा० ग्रहयोगबलाबलाध्यायः १२

कीर्णः आधन्तो यो हुताशराशिरग्निपुंजस्तद्वद्दृढा आवश्यके गूढा गुप्ताः फलोदयाः फलप्राप्तिर्येषां ते तथा
सुः निर्बलानां ग्रहाणां पूर्णोपि योगो न कार्यक्षमः सबलानां त्वेकोपि स आवश्यक इति भावः १३ ईदृ
शविचारवंतं प्रशंसति इतीति इत्युक्तरीत्या प्रतिकूलकारका अरिष्टदायेग्रहाः भावाः अंशाः अनेषां निवे
शेन स्थानेन दृष्टिभिः अज्ञायमानेषु तन्वादीनां भावानां फलेषु बलाबलाभ्यामाधिक्यन्यूनतां विचारा
ययादत्तहृत्कुनिवेशितमतिर्भवति स देवज्ञः सतां विदुषामवतंसतां अवतंसः शिरोभूषणं तद्भावं लभते।

वैनाली अथ याशाली यां लौकिकीं व्याख्याति नृपहसति कवेरिति लग्नात् तृतीयस्य कवेः शुभायरे
खा लग्नस्य ग्रहवत्वावलोकनेन गणनार्थं प्रतिगृह्य मे केकारे खा क्रियत इति स्पोतिर्विदांसमय
स्तत्र द्वितीयो भङ्गः परि रेखा वदङ्गस्येकारीतिः नभस्याद्दशमो भौमो लग्नं न भन क्कि इति द्वितीया
तथा द्वादशो शनिरपि लग्नं न भन क्कीति तृतीया रीतिः पञ्चतिर्जनेषु लोके षु कुतस्त्या जागर्तित
रां सर्वथा निर्मूलेति भावः कुतो जानाकुतस्त्या अतिशयेन जागर्तीति जागर्तितराम् आख्याता
कवेस्तृतीयस्य शुभाय रेखा लग्नं नभस्यान भन क्कि भौमः तद्वद्व्यये सौरिः पीतिरीति
र्जनेषु जागर्तितरां कुतस्त्या १० उशनाग्रहः सिंहकुतेंदृनः शशियामित्रगपापतापहृत
नवपंचमकेंद्रमित्रभगण्यी पृथु दृढशाविधुंस्य शान् ११
तत्र ग्रामस्य तदन्तमव्ययम् १ अथयामित्रभंगमाह उशनाइति शुक्रो गुरुर्वा बुधो वा कोणगः
केंद्रगः मित्रराशिगो वा दृढ्ंदृक्साचेंद्रुपश्यन् शशिनोयामित्रगः सप्तमस्थायः पापस्तस्यतापनं ज्ञ
न्पादिहं हरतीति तथा स्यात् अत्र केंद्रं स सप्तम वर्जितं ग्राह्यम् तदुक्तम् हरिजादिवसचंद्र
सप्तमक्रूर दोषहृतयकेंद्रमरेषु जः सोमपुत्रः सितोवा उदयाहिवुकधर्मव्योमपुत्रालयस्थोप्यदि

अथ ग्रहविशेषैर्बलविशेषान्फलविशेषमाह नरइति बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती न
राश्च शेषा इति स्त्रीग्रहद्विच्चेपि वक्तव्ये पूजार्थं नरग्रहैः सूर्यमंगलगुरुभिः कृष्टरश्मिबलैः सद्भिः।
स्त्रीणां नरो प्रियः स्यात् चंद्रभृगू बलिनौ चेद्बुधमंदसुतौ मनोहरा स्यात् कैः स्वभोगैर्निजभोगकौ बालैः १
किंच पतिरिति वैतालीयम् दिवाकरलग्नात्सप्तमेशः पतिः रविः श्वशुरः मंदग्रहः शुक्रस्तस्य श्वशुरस
नरः प्रियो नीरजलोचनानां नरग्रहे रुत्कटकांतिवीर्यैः नारीनराणां चित्तहरा स्वभोगैर्नि
रीत भोगैर्बलशालिभिस्तु ७ पतिरस्य पतिर्विरोचनः श्वशुरस्तत्र मंदा मंदग्रहः अत्र व।
लाव लिनौ दिशंत्यमी सुदृशां तेषु शुभं अशुभं क्रमात् ८ शशिसूर्यसुतावनीसुतै रवि
नीचास्तगतैः करग्रहे अपि तन्वधिपेन तत्पतेनिरपत्यानियतं नितम्बिनी ९ ॥ ७॥
प्रमदाश्वश्रूः अमी अस्य पत्यादयो निर्बला वधूनां तेषु पत्यादिषु शुभं बलिन अशुभं दिशंति ददति अ
तएषां बलमावश्यकमित्यर्थः ८ किंच शशीति विवाहे चंद्रशनिभौमैः शत्रुराशिगतैर्नीचगैरस्तं
वीतयालग्नेशेनापि तादृशेन सतानितंबिनी वधूर्निरपत्यानि स्संतानानियतमवश्यं पपरितत्पते
अत्र सप्तमभवनेनिर्बलेइतिशेषो बोध्यः बलरहिते च द्यूने स्त्रीणां न भवन्त्यपत्यानीति शौनकोक्तेः ९

1368

अथास्त्रहुद्रयोगद्वयमाह नन्विति तनुर्लग्नं तनुहिनमरीचिश्चन्द्रस्तयोरस्थिरगृहं चरराशिंगतयोः आधारे स
प्तमी अंगनाखेटः शुक्रस्तस्मात् दशमस्थाने चेद्याथिनो ग्रहाश्च विदिशिस्थिताः सन्तो वलिनः सुसत्कुमा
र्य्याः कांतयुग्मं भर्तृद्वितयं स्यात् अथ मर्थः जातके प्राच्यादिषु जीवबुधादिस्यादिनादिग्बलाद्यत्वात्त
तनं प्राची तथ्येतदीचीस्तृतमं प्रतीचीदशममवाची विशानपत्तेन दन्तरालविदिशां चतुष्टयं भवति
तत्र कोणगता विदिक तदन्याऽविदिक् सा दिगेव तत्स्थिता याथिनो ग्रहाः केंद्रगा इत्यर्थः यातुमीलं

तनु हिनमरीचौ रंगनाखेटदृशो चरगृहगतयोः स्याकांतयुग्मं कुमार्य्याः अविदिशिवति
नश्चेद्याथिनो युग्मइन्द्रावङ्कमद्दशमपेते कन्यकात्वन्यकाम्या ६

येषां तेयायिनः स्यात् शीलं येषां ते स्यायिनः तत्व पौराः उभयविलक्षणाः आक्रंदाः तेव राहेरोतुकाः
रविराक्रंदो मध्येपौराः रवैपरेस्थितो याधी पौरा बुधगुरुरविजानितंशीतांशुराक्रंदः केतुकुजराहुग्र
कायायिनइति अथ योगः शौनकेनसप्रकृदितः लग्नेंदूचरराशौ केंद्रस्याया यायिनः सदा वलिनः योषि
त्रुहस्तदस्याप तिद्वयं गच्छतेनारी अथ ययोगान्तरमाह युग्मइन्द्राविति युग्मे युग्मराशावि न्दौ चन्द्रे अग्र
मद्दशपापदृष्टेपेते प्राप्ते नदा कन्या काऽन्यकाम्या अन्येन काम्या स्यात् परपुरुषाभिलाषविषया स्यात् य

1369

दि० टी० ५५

अथैषां फलमाह इतीति इतीमे सप्त शुभयोगाः मुनिभिरुक्ताः न केवलं विवाहे ऽपि तु जन्मकाले यात्राकालेपि शुभदाः राशिर्योगेन्द्रु द्वावधूर्भूपसीमन्तिनीत्वं राजपत्नीत्वं भजन्ते नक्षत्री राज्ञा स्यादिति भावः किंचास्मिन्योगसप्तके ग्रहाणां युतियोगस्तत्र वलयोगः सवलत्वं तस्मादेतत्राधर्ध्यं उत्तरस्योत्तमस्याधरस्यापि कृष्णस्य स्वभावस्तत्त्वज्ञेयं योगकर्तृग्रहाणां प्राबल्ये फलाधिक्यं निर्बल्ये तन्न्यूनत्वं

इति शुभफलयोगाः सप्त सप्तर्षिमुख्यैर्मुनिभिरभिहितास्ते जन्मयात्रास्वपि स्युः भजन्ति युवतिरेभिर्भूपसीमन्तिनीत्वं ग्रहयुतिवलयोगादेत्तराधर्ध्यमस्मिन् ४ दिनकररुधिराभ्यां बालपातालवक्त्रौ तयः इति रविपुत्रे सैंहिकेये तमस्कः तनुयुजि केनावतकस्ते सुशोकव्यसननिधनताभिस्तप्यते पङ्क्तजाक्षी ५ ॥ छ ॥ ग्रहाः छ ॥

कल्पमिति भावः ४ अथाशुभयोगानाह दिनकरेति तनुग इत्युत्तीतिसर्वत्र संवध्यते दिनकरे लग्नगे वालः भौमे पातालमुखं शनौ द्वयः राहौ २ तमस्कः केतौ २ त्र्यं तकः एषु पंचसु योगेषु वधूः शोकव्यसननिधनताभिस्तप्यते कर्मकर्त्तरि रूपं तत्त्नीया करणे यथा कर्मणि रूपं तथा कर्त्तरि तत्नीया एतन्नत्र्येकं फलम् ५

श्रीदुर्गायैनमः ५५

अथ सप्तमदशमचंद्रस्य विशेषमाह अतनुर्येति प्रामाणिका तुर्यं च तुर्यं कायो लग्नं ताभ्याम् अन्यानि केंद्राणि
७।१० तत्र गतः शशी शुभः स्यात् कीदृशः सुहृदः स्वस्य सौम्यस्य वा वर्गेण युतः सुहृदा शुभेन च वीक्षितः
मयूखै रश्मिभिर्मांसलः पुष्टः पूर्णमण्डलः बहु मांसोऽस्यास्तीति मांसलः स्निग्धादिभ्यश्चेति म
त्वर्थीयो लः इह च चंद्रः सप्तमे दशमेऽपि स्थितः शुभ इत्यर्थः अकायकोणकेंद्रग इति पाठे लग्नवर्जं
कोणकेंद्रस्थः ५।९।४।७।१० गतश्चंद्र इत्यर्थः तथा च शौनकः त्रिकोणसप्तमाम्बरव्ययायगो विल

अतनुर्यकायकेंद्रगः सुहृत्स्वसौम्यवर्गयुक् सुहृच्छुभेक्षितः शुभः शशी मयूखमांसलः २
शशिनि तनयसिताभ्यां नंदभद्रावुभाभ्यां जय इति तनुयाते जीव इत्येष जीवे अमुरसुर
गुरुभ्यां स्याद्वरान्तेऽपि शुक्रे विजय इति विशुक्रं तं च जीमूतमाहुः २

गतः हिमद्युतिः शुभर्क्षगः शुभेक्षितः शोभन इति अत्र व्ययस्थोऽपि हीनः सन् नारदेन महादो
षेषु पठितो सोऽग्रंथकृता त्यक्तः २ अथ शुभयोगानाह शशीति मालिनी तनुयाते इति यथोचि
ते विपरणते त्वन्येकं संबध्यते बुधशुक्राभ्यां तनुगताभ्यां क्रमेण नंदभद्रौ योगौ स्तः बुधे लग्नेन नंदः
शुक्रे भद्रः उभाभ्यां बुधशुक्राभ्यां जयः जीवे लग्नगे जीवः जीवशुक्राभ्यामुभाभ्यां लग्नगाभ्यां स्या
वरः बुधगुरुशुक्रैर्लग्नगैर्विजयः तन्मेव योगं विशुक्रं जीमूतमाहुः बुधगुरुभ्यां लग्नगाभ्यां जीमूतः २

अथ ग्रहबलार्थमाह षडिति शार्दूल० अशुभाः पापाः ६।३।११ स्थिताः शुभायान्यत्राशुभाय भवन्ति
सौम्याः शुभाः बुधगुरुशुक्राः ८।७।१२ स्थिता न शुभाः अन्यत्र शुभाय शशी चंद्रः ३।११।२ शुभः शनि
रवी उपलक्षणं तथा राहुकेतू अपि स्मृतावष्टमे शुभाय अपरे चं०मं०बु०र० शुक्रास्तत्र भंगाय लग्न
भंगकर्त्तार इत्यर्थः किंच शशिनि तनौ चंद्रलग्ने क्रूरद्यूनवृत्तान्विते भंगाय भवति क्रूरे द्यूनं सप्तमं ष्ट

षट्व्यायेष्वशुभाः शुभाय निधनद्यूनान्त्यवर्ज्जे परे ऋायार्थेषु शुभाः शुभी म
नौ शनिरवी भंगाय तत्रापरे क्रूरद्यूनिवृत्तान्विते शशिनि तनू स्तौ स्तेति
नष्टौ विधुर्लग्ने सोमसितनाधिपाः द्विषि सितः सेंदुर्विनष्टोंशपः १

२२

नमावृतं ययोस्ते द्यूनवृते ते च ते अन्विते च तथा चंद्रस्य लग्नस्य वा सप्तमं क्रूराक्रांतं स्वयं चंद्रो लग्नं
वा क्रूराक्रांतं चेत्तदा लग्नभंग इत्यर्थः किंच लग्नचंद्राभ्यामस्ते सप्तमे स्थितः सौ शुक्रो बुधो वा सो
पि भंगाय लग्ने विधुश्चंद्रः सितः शुक्रः अधिपाः स्वामिनः लग्नांशाद्रेष्काणानामष्टमे लग्नादे।
वनं तु चंद्रात् सोमग्रहणात् सितः शुक्रः सेन्दुः यत्र क्वापि स्थितो भंगाय अंशपो नवांशाधीशो
विनष्टोस्तंगतो भंगाय स्यात् १

1372

ऐश्वर्यादीनामंबराणां वस्त्रानानां द्रविणस्य धनस्य च भोगाभरेरोगान्सुखानि संज्ञानानि सुखानि ददाति ग्र
य सर्वसाधारणमाह सर्वेपीति सर्वेपि ग्रहाः ग्रबलाः स्थानादिबलहीनाः सबलाः सर्वभवनेषु लग्नादि
ष्वपि किंचित्शुभमशुभं वा न ददुः अर्थादुक्तं सर्वफलं सबलानामेव जायते ११ व्ययइति रुचिरा
छंदः व्यये द्वादशे स्थिताः शुभाः बुधगुरुशुक्राः स्त्रियं सनाशुभमिति मितकृतेन धनापचयेन कर्षितां कु
र्वन्ति हानिः सुरापांमध्ये रुचिर्यस्याः सातां विधुश्चंद्रः दुर्विधां दुष्टकर्मकारिणीं जानाति कुजोग्रदहि

व्यये शुभाः सव्ययकर्षितांशनिः सुरारुचिं रक्षयति दुर्विधांविधुः ग्रदति णावयवकृत् जंकु
जो रविर्विरूपव्ययमति रुचिरामपि स्त्रियम् १२ इति मुनिजनमतमनन्यवितर्केप्रतिग्रह
चरखचरो ग्रहदुदर्के परिविगणय्य विशेषमशेषं फलमिदमखिलमनुक्तितरेखम् १३
इति श्रीविवा० ग्रहभावफलाध्याय एकादशः ११ ॥ वामो यो व्ययवोंगं नत्र रूपव्याधिर्यस्यासां

रविः रुचिरां मनोज्ञामपि विरूपां करोति रुचिरेति छंदो नामापि १२ अथ शेषां भावफलानां प्राशस्त्य
माह इतीति इतीदमनंतरोक्तं फलमखिलं सर्वमनुक्तितरेखमनुपक्रमर्यादं यथावद्भवतीत्यर्थः
कीदृक्फलं मुनिजनानां मतं संमतं अतनुः पृथुवितर्कोयस्य सतेन तथा यद्यज्ज्ञानार्थमिव बृहस्पते
नयापि ग्रहबलादिविचारवशाद्धृविचारमित्यर्थः प्रतिग्रहं ग्रहं प्रतिप्रतिग्रहं चरतिनेप्रतिग्रहच

१५

1373

वि०टी०
५३

अथ नवमस्य शशिसुतेति मालिनी नवमस्थितवमभावेबुधगुरुशुक्राः कुमारीसांद्रघनंयुतसौभाग्यं नसलील
यासरलेन स्वजना हसितेन स्त्रीयेन कांतस्वभनुः स्वांतचित्तेकेलिः क्रीडयस्याः संवधेनसानथातांकरो
ति रविशनिकुजाः कोपटमुक्तमनसंचंद्रः कन्यापुस्ते ९ अथ दशमस्य शनिरिति मालिनी व्योम्निदशमे
शनिः कन्यकां नियमोव्रतादिस्त्रीकारः शौचपावित्र्यं तांभ्यांहीनां करोति वक्रो भौमः शाकिनीं मांसभक्षकदे

शशिसुतगुरुशुक्राः सांद्रसौभाग्यलीलासरलहसितकांतस्वांतकेलिं कुमारीम् रविरविसुतवक्रा
ः केतवाक्रांतशीलां तपसितहिनरश्मिः क्षीसवित्री करोति ९ शनिरनियमशौचां कन्यकाम
न्यकार्यैर्विधुरपिविधुरांगीं शाकिनीं व्योम्नि वक्रः रचयति रविरुग्रां कोविदः कर्मणा ज्ञामविकृ
तसुकृतश्रीमालिनां मार्यशुक्रौ १० एकादशे दर्शतां प्रमुखाग्रहे द्वारत्नांवरद्रविणभोगभरो
न्मुखानि पाणिग्रहे ददतिदीर्घदृशां सुखानि स०शा०वैपिसर्वभवनेषु वलानकिंचित ११॥

वताविशेषसदृशीं रविरुग्रामशीलां कोविदो बुधः कार्मिणांवशीकरणार्थंतद्रकर्मसुतदभिज्ञां गुरुमार्ग विशेष
अविकृते येसुकृतंपुण्यं श्रीर्लक्ष्मी श्रोभे नाभ्यां मालने शोभते तथातां अनेन मालिनीति छंदोनामापि
सूचितम् १० एकादशभावस्य एकादशेति वसंत० दीर्घदृग्लोचनं यासांतासांपाणिग्रहे विवाहे ११
स्थिताः दर्शशतानि सहस्रमंशावोरश्मयो यस्यासौनथा समुखमादिर्येषांते सूर्योदयोग्रहें द्राः रत्नानोमा

५३

अथ षष्ठभावः विधुरिति पृथ्वी वैरिगः षष्ठगः विधुश्चंद्रश्चारुभवेद्वधूनां निधनं व्यनक्ति प्रकटयति बुधः
शत्रुभयं दत्ते भानुमान् सूर्यः जयं कुजो भौमः कुशलत्वं दत्ते मंदश्च कर्मभूः शनिः विगतवैरितां निःसपत्नतां
उशना शुक्रः सहचरेण भर्त्रा समं सरिपुत्वं वच्वतां पतिर्गुरुः पतिभर्त्तारं न जातशत्रु स्तुतिर्यस्य तं व्यनक्ति
लभ्यति शत्रुः क्वापि न श्रूयत इत्यर्थः ६ अथ सप्तमभावः बुध इति शिखरिणी विवाहे सप्तमभवने स्थिता
विधुर्निधनमिंदुजः परमयंत्र यं भानुमान् कुजः कुशलमर्कभूर्विगतवैरितां वैरिगः रिपुत्वमुशनाः
समं सहचरेण चारुमुवाव्यनक्ति वचसांपतिः पतिमजातशत्रुस्तुतिम् ६ बुधो वंध्यामिंदुः परिचि
नसपत्नीपरिभवांगलद्गर्भां पंगुः परनरस्तां दानवगुरुः अवीरामस्तेको गुरुः स्वमरसेवाव्यसनिनीं ७
विवाहे माहेयः स्त्रियमतिरजस्कां जनयति ७ सितस्तिनकिरणोऽ्याम त्यवमसुवेश्म न्यनवरत
सुखायुः संपदे सूर्यसौरी भवति पतिशारीरद्रोहकृद्धौहिणेयो दुहितृणां हमखीनायन्मगोत्ताणि
बुधः स्त्रियं वंध्यां जनयति इंदुः परिचितः प्रत्यग्रमनुभूतः सपत्न्याः परिभवस्तिरस्कारो यया सा तां जनयति
पंगुः शनिः गलन्तो भ्रश्यंतो गर्भा यस्याः सा तां दानवानां गुरुः शुक्रः परनरेरतां व्यभिचारिणीं सूर्यः अवीरां
विधवां माहेयः कुजो निरजस्कां प्रदरव्याधिमतीं करोति ७ अथाष्टमस्य सितेति मृत्युवेश्मन्यष्टमभावे
मृगचंद्रगुरवः दुहितृणां ब्रह्मानस्य गृहं कमलं तद्भवः [illegible] खंवया सां तासां वधूनां मृत्यवे मरणाय भवन्ति सूर्य

वि०टी० ५२

इनेति द्रुतविलंबितम् सहजे तृतीयभावे रविशनी वधूं धनवतीं कुरुतः सचिवः शुक्रस्तथा गुरुरल्पधनां चंद्रो भाग्यवतीं भौमबुधौ पुत्रवतीं देवानां रिपवो दैत्यास्तान् पनयत्याचार्यः सन्नित्यनेन तथा सप्तक्रो देवरिदेवरेनयते देवरगामिनीं करोति समौन्देवृदेवरावित्यभिधानात् ऋकारान्तो देवृशब्दः ३ चतुर्थभावस्य दारिद्र्यमिति सुखे ४ रविर्निर्धनतां सृजति भौमः ४ बरांगशिरः स्त्रीप्रकरणात्स्वरमंदिरं वा

इनशनी सहजे सधनां वधूं तनुधनां सचिवः सुभगां शशी सुकृतिनीं कुरुतः कुजसोमजौ नयति देवरिदेवरिपूपनीः ३ दारिद्र्यं रविरर्वनीसुतो वराङ्ग्या घातं गुरुर्भगुजेंदुजाः प्रभुत्वं वाल्ये स्नः प्रियपुर्वीति शनिः स्तनाभः शून्यत्वं सृजति सुखे सुवासिनीनाम् ४ सत्पुत्राम सुरसुरेज्य सोमपुत्राः पुत्रारिं रवेरसुतत्वं प्रजांद्विजेंद्रः शोकार्तामवनिसुतः सुतैश्च सौरिः संतान

तस्य भंगं बुधगुरुभृगवः स्वामितां चंद्रः ४ वाल्येपि भर्तृवियोगं शनिस्तनाभस्तस्तनद्ग्धेन शून्यतां सुवासिनीनां प्रोढांगनानां चिरंटीनां सुवासिनीत्यमरः ४ पंचमभावः सत्पुत्रेति प्रहर्षिणी सुते पंचमे तिष्ठतीति सः ज्ञमुरेज्यौ भृगुः सुरेज्यो गुरुः सोमपुत्रो बुधः कुमारी सत्पुत्रां कुर्युः रविः ५ पुत्रारिं पुत्रघातिनीम् चंद्रः सुतासुनेन रा प्रजा यस्याः कन्याप्रसूं भौमः शोकपीडितां सौरिरिनापत्यं शनिः सता

दुगो ५२

सर्वमरिपराक्रमेत्यादिना साधारण्येन ग्रहाणां भावफलान्युक्तान्यधुनातु प्रतिस्थानं विशेषतः प्राह तत्रादौ ल
ग्नस्य ग्रहाणां फलानि चिरंजीवेति शिखरिणी मूर्त्तौ लग्ने स्थितो जीवो मृगदृशं वधूं चिरंजीविनीं दीर्घायु
षं सृजति कविः शुक्रः अविरलो निविडो योऽनंगः कामस्तेन सुभगां भाग्यवतीं चंद्रकुजौ यमस्य यायुव
तिस्तत्पार्श्वप्रणयिनीं यमलोकगां सृजतः बुधो भर्त्तुर्भक्तां शनिः १ अशीलां दुष्टां त्रयीमूर्त्तिः सूर्य्यः १

चिरंजीवां जीवः कविरविरलानंगसुभगां मृगाक्षीं पुत्रौ यमयुवतिपार्श्वप्रणयिनीम् बु
धो भर्त्तुर्भक्तां मृगदृशमशीलां शनिरपि त्रयीमूर्त्तिर्मूर्त्तौ दिशति शिखिप्रास्त्रादिनिधनम्
१ नितांतं धनिनी धनेसितसितांशुजीवेंदुजा रुजादहनदस्युभिर्विधुरतां धरानंदनः सुते
ष्वपि मितंपचां मलिनमूर्त्तिमर्कात्मजः स्त्रियं सहजदुर्भगां जनयति द्युतीनां पतिः २ ॥७

शिखिनाग्निनाशस्त्रादिना च निधनं सृजति १ धनभावस्य पृथ्वीवृत्तम् धने द्वितीयभावे स्थिताः शु
क्रचंद्रगुरुबुधा नितांतमत्यन्तं धनवतीं वधूं जनयंति धरानंदनः कुजः रोगेणाग्निना चौरसर्वादिना
वा विधुरतां विधवतां सृजति शनिः पुत्रेष्वपि मितंपचतीति मितंपचा नाम कृपणानां कृपणां मितनरवेचेति
खवत् खित्वात्तुम् मलिनरूपां च सृजति द्युतीनां पतिः सूर्य्यः सहजदुर्भगां जनयति स्वतएवभाग्य

वि० टी० पू०

भवेति सूर्यः ११ कुजे दशानिः ३ एभिर्ग्रहैः क्रमादिभिर्ग्रहैः सनाथैः सहितैः सद्भिर्दलेन्दुनामयोगः परिण
मति जायते किं करिष्यन् इदं मस्याः कन्याद्रवदनायाः वध्वाः कुलयुगलं पतिपितृकुलद्वयं तस्योद्धृति
रुद्धरणं तत्र धुर्यतां सामर्थ्यं विधास्यन् अत्रोढाकुलद्वयोद्धारणे समर्था जायत इत्यर्थः १० वयेति

भवपरे भव विक्रमैः क्रमेण धुमणिमहीसुतसौरिभिः सनाथैः परिणमति दलेन्दुरिन्दु
मुख्याः कुलयुगलोद्धृति धुर्यतां विधास्यन् १० वयनिधनततनसुमंदचंद्रा हरण कि
रणोमुशलं जगुर्मुनींद्राः इह तु सितकुलानके कुमारी कुलमारी न च कापि कार्यसि
द्धिः ११ ननननवभवगैर्यथाक्रमेण बुधविबुधार्चितपङ्किभिर्गजः स्यात् इह युवतिर
हं कृता कृतार्था चितरति दैवत दैवततत्परा वा १२ इति विवा० ग्रहयोगाध्यायो दशमः १०

औपछंदसिकं शनिः ९ चंद्रः ८ सूर्यः ६ अयं मुशलयोगः मुशलनामतया यादवकुलक्षयकरत्व यो
गः ऊढा कुमारी कुलनाशिका भवति कापि कार्यसिद्धिर्न स्यात् ११ नन्विति पुष्पिताग्रा बुधः गुरुः शश
निः ८ एवं गजो योगः इह युवतिरूढा हं कृता सा हंकारा कृतार्था निष्पादितार्थी सा ल्लान्ददाति यद्वा दैव
ते दैवतार्चने दैवे भाग्ये च नतपरासुरार्चने लग्ना भाग्यवती च स्यादित्यर्थः १२ इति श्री विवाहवृंद

श्री० ग्रहयोगाध्यायो १० ५९

स्नाऽइति शुक्रः ५ जीवचंद्रौ ३ तदंगनायाः कन्यायाऽभ्युपगमो विवाहश्चेत् यदंगनाभ्युद्गमः क
न्यालग्नं नन्दयमानंदो नामयोगस्तेन सुंदरीसांद्रसौख्या वंशयोः पितृभर्तृकुलयोरानंदं विस्तृणाति
विस्तारयति गणिज्ञन्तभीव ७ व्ययेति पृष्ठितागता भौमः १२ भृगुः ६ शनिः ४ क्रमात्स्थिताश्चेत्तदेष
कुठारः इहयोगे विटपटलैर्भंडसमूहे विहरति कीदृशी संहृतो मारिनः स्ववंशो यया सा पटेवस्त्र

स्तनौ शुक्रः सौ गिराः शीतरश्मिर्दुश्चिक्येस्यादंगनाभ्युद्गमश्चेत् आनंदोयं सुंदरीसांद्र
सौख्यानेनानंदं वंशयोर्विस्तृणाति ७ व्ययारिपुहिबुकेषु वक्रशुक्रद्युमणिसुतैः क्र
मशः कुठारएषः इहविहरंति संहृतस्ववंश्या विटपटलैपटलैस्विताभिसारा ८ रवि
कविरविजेंदुभिः क्रमेणव्ययधनषट्निधनेषु कर्म्मएषः इहविहितकरग्रहाग्रहलि

चल्लेल्लेखितोभिसारोयस्याः सानिःसंदेहमभिसारिणीत्यर्थः नरंभोगार्थिनी याति संकेतं साभिसा
रिकेति कोशः पाठान्तरे भिचारो व्यभिचारः ८ रवीति सूर्य १२ भृ २ श ६ चंद्रे ८ रेषु स्थितैः कर्मयोगः
इहविहितः करग्रहो यस्याः सा परः शतानि गृहाणि वारि भ्रमति शतेभ्यः परा गृहाणि परः शतानि पार
स्करादित्वात्सुट् यद्वा परः शब्दो निपातनः इति भोजराजः शतेभ्योधिकानीत्यर्थः कयामजिघ्यतयाऽ

एकेति भौमसूर्यौ ११ शनिः ६ चंद्रः २ बुधबृहस्पतिभृगवः ९ चेद्भवंति तदा श्रीवत्सनामा योगः राघः रूपेण सौंदर्येण रिक्तां अन्याम पिवधूं सुखयति कीदृशीं सौभाग्यस्य योभोगभरस्तस्य भंग्या रच नया तरंगितानि संजाततरंगाणी वांगानि यस्याः सा ५ सौम्येति शुभाः ८ पापाः २।१२ अथायं थं का मुकं नाम योगं कुर्युः अस्मिन्योगे परिणीता कन्या कांतं वेषाम्दरने पथ्यधरा वेश्यारामं वेश्यारम

एकादशे कुजरवीरविजः सपत्ने वित्ते विधुस्तपसि शेषनभश्चराश्चेत् श्रीवत्स एष सुखय त्यपि रूपरिक्तां सौभाग्यभोगभरभंगितरंगितांगीं ५ सौम्या मृत्यौ खांतराश्ययोरसौम्या कुर्यु र्योगं कार्मुकं कन्यकास्मिन् हत्वा कांतं कां न वेषाविषाद्यैर्वेश्यारामं रंरमीति स्वरीत्या ६

यतीति तं वेश्या नो गिनं कामुकं रंरमीति अतिशयेन रमयति यशेलकु कया स्वरीत्या निजोपभो गकौशलेन किं कृत्वा विषाद्यैर्विषशस्त्रादिधनादिभिर्भर्त्तारं हत्वा तथा च ग्रंथांतरे निधने यदि सौम्याः क्रूराव्ययधनस्थिताः धनुर्योगं वदंतीह पतिं हंति सदा बुधाः तथा च वामदेवः क्रूरेषु वित्तव्ययगेषु लग्नात्रून भवनस्य मृत्युस्थितेषु उदासुदयत्र स्वचारिणीत्वं विषेण शस्त्रेण पतिं निहं

तन्विति द्रुतं० लग्नगे: शुभै रष्टमगे: पापे ध्वजोयोग: इह कृतमुद्वहनं यस्या: सा वधू: गुणाढ्यालाभयुता
च भवति इंगितैर्हावभावादिचेष्टितै: प्रियमनसोयमनेव शीकरोत्यनुखो विभ्रमो विलासो यस्या: सा
भवति २ अखिलेति पापैस्तनु: केंद्रगतैर्वापीयोग: इह योगेऽर्पितो दत्त: पुंसेवराय करो यया सा परि
णीता वधू: स्वपत्नीपतिमंदिरं जनयितु: पितुर्गृहं कुरुते। कुशाब्दास्तेषामुत्सवो नानानन्दान् कुरुते पितृग
हे व्याभिचारदुष्टा पश्चादमन्त्रभवतीत्यर्थ: ३ गगनेति शुभैर्ग्रहैर्दशमचतुर्थनवमेषु यथायथं स्थि
तन्नुनिमीलनगेष्वशुभाश्शुभे: ध्वजइती हकृतो द्वहनावधू: सगुणालाभवतीभवती गितै: प्रिय
मनोयमनोन्मुखविभ्रमा २ अखिलकेंद्रसखे: खलखेचरैर्भवतिवापिरिहार्पितपंस्करा युव
तिरुज्झितकान्तगृहा गृहे जनयितु: कुरुते कुरुतोत्सवान् ३ गगनतोयतनुष्वशुभैर्ग्रहै
गदितिशंखमशंसखलयत्यसौ परिणयेन पयोरुहचक्षुषां धनयशोनयशोभितत्क्षियां
तै: शंखसंज्ञंयोगंमुनयोनिगदंति असौ योगोऽशंदु:खंसखलयति प्रतिवध्नाति निराकरोती
त्यर्थ: केनपरिणयेन कासांपयोरुहचक्षुषांकमलनयनानां वधूनां कीदृशां धनेनय
शसानयेनशोभिनीरम्याननोर्वेपुष: श्रीर्यासांतासां ४ ॥ ६ ॥ ४ ॥

१०

अत्रोदाहरणमाह क्रूरमष्टममिति जन्मकालेष्टमं क्रूरमरिष्टमशुभमप्रशांतिं बाधंतिमुनयः इयमुद्वहनरी
तिर्विवाहमार्गेण न भवति तथाहि जन्मकालेष्टमः क्रूरोऽशुभः विवाहेप्यशुभः जन्मनि सप्तमः शुभो विवा
हेप्यशुभः अतोनयोः शास्त्रयोरन्यथात्वमिति हेतो यत्र विवाहे सो गोचरमार्गो रथ्योद्धृतो रथ्येरूढ इति
द्विष्टः अस्य मार्गेऽश्लेषः गोचरमार्गः पारंपर्यागतः स्फुटः रथ्योद्धृत इति छंदसोपि सूचनम् ७ इति विवाह
वृंदावनटीकायां नामविचाराध्यायः ९ अथ प्रातस्त्विकं भावफलमुक्त्वा योगजमाह चक्रेति श्लो

क्रूरमष्टममरिष्टमिष्टदं सप्तमं शुभमप्रशांति जन्मनि नेयमुद्वहनरीतिरित्यसावत्र गोचरपथो
रथ्योद्धृतः ७ इति विवाहवृंदावने नामविचाराध्यायः ९ चक्रस्यार्द्धं प्राचि पश्चात्क्रमेण
क्रूराक्रूरैश्चक्रमित्याम नंति अत्रोढायाः सुभ्रुवः स्वैरिणीत्वे भ्राम्यत्युच्चैश्चक्रवच्चित्तवृत्तिः १॥

शालिनी चक्रस्य प्राच्यर्द्धं पश्चादर्द्धं चक्रमेण क्रूराक्रूरैः कृत्वा चक्रमिति योगमामनंति अयमर्थः दशमभा
वभागानारभ्य चतुर्थभावभागपर्यंतं चक्रस्य पूर्वार्द्धं चतुर्थभागानारभ्य दशमभागपर्यंतं पश्चिमार्द्धं
तत्र चक्रस्य पूर्वार्द्धे यदा क्रूरग्रहाः पश्चार्द्धे सौम्यास्तदा चक्रं नाम योगः अस्य फलं अत्र योगे ऊढायाः प
रिणीतायाः सुभ्रुवो योषित चित्तवृत्तिः स्वैरिणीत्वे पौंश्चल्ये चक्रवदुच्चैर्भ्राम्यति चतुर्थे स्वैरिणी प्रोक्ता.

यदि चांद्रे मुख्यत्वं तदा पृथक् सौरमानं कथमुक्तमित्याशंक्याह प्रायइति शालिनी यदि प्रायो वाहुल्येन सौरमा
नं विवाहे स्वीकृतं तत्तत्फलेन चांद्रमासं किमाहुः शोनकादयः धनमानपरिभ्रष्टा चैत्रे वा तत्र मे पुना
त्वसतीत्यादिना यस्मादेतौ सौरचांद्रमासौ विवाहे उक्तौ तस्मात्तदैकोनयोः सौरचांद्रमासयोरेकत्वे सति फला
नि संपूर्णकृपरिपूर्णानि स्यात् केवलः सौरमासः चांद्रापेक्षया किंचिदूनः चांद्रस्य मुख्यत्वादित्यर्थः ४ एवं सौरचां
द्रयोर्वलावलमुक्त्वा गोचराष्टकवर्गयोर्वलमाह योषितां स्त्रीणां गुरुपतंगयोर्गुरुसूर्ययोर्गोचरे शोभने सति क
प्रायः सौरमानमिष्टं विवाहे तत्किं चांद्रमासमाहुः फलेन यस्मात्सम्यक्तत्फलानि स्तदेकः सौरो मासः
केवलः किंचिदूनः ४ योषितां गुरुपतंगगोचरे शोभने निगदितं करग्रहः अष्टवर्गविधिना तदत्ययेस्तुर्य
शुद्धिमपरे नृणां जगुः ५ अष्टवर्गफलमेव जातके नास्य किं परिशीलयेद्विमृष्वता सत्यमुद्वहनजन्मशास्त्रयो
रग्रहः शुभः मतांतरमाह तूर्येति अपरे नृणां पुरुषाणां सूर्यशुद्धिं जगुः ननु गुरुशुद्धिं गोचरविधिना तदत्यये अ
ष्टकवर्गविधिनेति उक्तं च प्राग्भानुरष्टपंचयेति नृणां गुरुशुद्धिमुक्त्वा तेऽवंधरा वा तो न विवाहे शूद्रादीनां तत्र नव
धाभावाद्विवाहः एवं गुरुशुद्धिः सूर्यशुद्धिश्चेति ५ ननु त्रगोचरस्य कथं मुख्यत्वं तत्राह अष्टवर्गफलमिति
जातके ष्टवर्गफलमेवास्ति नत्वयं वंद्रराशिफलं तदेव गोचरफलं संहिता सु पठितं अतस्तस्याष्टकवर्ग
फलस्य परिशीलये विमृष्वता किं न स्यात् गोचरफलं स्वकस्मात्स्वचंद्रराशेर्वाष्टकवर्गफलं त्वष्टराशिभ्यः अतोस्या

वि०टी०
४८

एवं कृत्स्नं पूर्वपक्षमाह नेष्ट इति सुंदरीणामुपयामे विवाहे मृगयुजि मकरगे रवौ पौषो नेष्टः मकरगार्कस्य शु
भत्वेपि शुभपौषयोगाभावान्नेष्ट इति भावः ननु विपरीतं कुतो न स्यादित्यत आह आहत इति प्रवीणोऽपंडित
मन्यैर्मृगयुजि रवौ पौषश्चेदाहृतः मकरगतार्कस्य शुभत्वात् नदा चैत्रो व्यज्ज सहचरे मेषगे भास्करे सति चास्य
शुभः स्यान्नचैवमस्ति किंचास्य प्रसिद्धस्य फाल्गुनस्य मांडव्याद्यैः स्मृतशुभफलस्य प्रसंगाद्योगान्मीनो।
मीनगतार्कोपि विकृतफलो यथावत्फलः किं न स्यादपि तु विकृतफल एव शुभफलके फाल्गुनयोगाद्दुष्टो

नेष्टः पौषो मृगयुजि रवावाहृतश्चेन्नवीणैः श्लाघ्यश्चैत्रो व्यज्ज सहचरे भास्करे सुंदरीणाम् मांडव्या-
द्यैः स्मृतशुभफलस्यास्य किं नोपयामे मीनोपि स्याद्विकृतफलः फाल्गुनस्य प्रसंगात् २ झषो
न निंद्यो यदि फाल्गुने स्यान्मेषस्तु वैशाखगतो न निंद्यः मध्वाश्रितौ द्वावपि वर्जनीयावित्याद्यिवाच्या

पि मीनो दुष्टफल एवेति भावः न चाप्येवमस्ति एवं सौरप्राधान्यकर्तृरानेष्टद्वयम् २ एवं हतनिसिद्धांतमा
ह झष इति यदि फाल्गुने झषो मीनगतार्कस्तदा न निंद्यः चांद्रस्य मुख्यत्वात् एतत्प्रसंगेन व्रतबंधेपि निर्ण
यमाह मेष इति मेषो मेषगतार्को यदि वैशाखगतस्तदा न निंद्यः मेषगे र्के व्रतं न हीनं शुक्ले च शुभस्य मे
षस्य शुभवैशाखयोगाच्छुभत्वमिति भावः प्रकृतमाह मध्वाश्रितावपि मध्वाश्रितौ चैत्रगौ मीनमे
षगतार्कावपि वर्ज्यौ चैत्रदोषात् मीनो हि स्वरूपत एवाशुभो मेषस्तु चैत्रयोगादिति चांद्रस्य मुख्यत्वादि

इतिग्रंथकारोक्तिः नैतच्चतुरस्रं प्रवृत्तिकाले चांद्रदिनवर्षादेरपि प्रवृत्तिः तस्यापि मुख्यत्वं कथं न वक्तव्यं
तस्मादनया युक्त्या चांद्रमासस्य श्रेष्ठत्वं वक्तुमुचितम् किंच युक्त्यंतरं संहितागमबलाच्च ख्याते
नक्षत्रेण युक्तः कालः सास्मिन्पौर्णमासीति संज्ञायामिति च पाणिनेरनुशासनात्पौषः पौषीत्या
दिकासंज्ञा सौरादेर्नोपपद्यते तस्माच्चांद्रमासस्यैव मुख्यत्वमिति अत एव नारदोक्तेरपि यस्मिन्मासे पौ

एवं पौषे मृगामुख्यगते भास्वति स्यान्नवामावु
क्तेः श्रेयान्यदि रणयनविधाविंदुमासोस्मिन्तस्मात् १

र्णमासीयेन धिष्ण्येन संयुता तन्नक्षत्राख्यो मासः पौर्णमासी तदाख्यया तत्पदोप्युक्तार्कचारवौदे
वपित्र्ये च तावुभाविति अभिधानं च पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभाविति अत एव सि
द्धांतेप्युक्तं मासस्तु पाचतिथयस्तु हिमांशुमानादिति अतः सौरादौ मासप्रयोगो गौणः व्याख्यायोज्ञ
नीय इत्यस्माकं सिद्धांतः तर्हि रवेर्वैसाखिलग्नरायणमिति विवाहे सौरमासाः कथमुक्ताः नाषा
ढप्रभृति च तृष्णये विवाह इत्यनेन चांद्रमासाः प्रधानत्वेनोक्ताः अनयोर्विरोधे सति समुक्तिकं निर्ण

अथमासगोचराध्यायः तत्रादौ सौरचांद्रमासयोर्विचारमाह चैत्रइति मंदाक्रांता यतश्चैत्रेमासिशु
क्लप्रतिपद्दिनेथौरविवारेसर्वैर्गगनगतिभिर्ग्रहैर्मेषादौस्थितैर्भूर्भुवःस्वःप्रवृत्तिरासीत् भूर्भुवः
स्वरित्यव्ययानि क्रमेणलोकत्रयवाचकानि तथाचोक्तं भूर्लोकाख्योदक्षिणोव्यक्तदेशात्तस्मात्सौ
म्योयंभुवःस्वश्चमेरुरिति अतःपृथ्वीरातन्लोकत्रयाधिष्ठिता एषांलोकानांप्रवृत्तिःप्रथमनिर्माणं
सष्टाभचक्रेकमलोद्भवेनेति लंकानगर्यामुदयाच्चभानोरिति यदुक्तं तत्सौषमासेमृगगन्तुरवगते

चैत्रेमासिप्रतिपदितिथौवासरेर्कस्यसर्वैर्मेषादिस्थैर्गगनगतिभिर्भूर्भुवःस्वःप्रवृत्तिः

मकरादिस्थितेभास्वतिभास्करेणासीत् तस्मात्परिणयनविधाविंदुमासश्चांद्रमासःश्रेयान्श्रेष्ठउक्तः
अयंभावः लंकायांक्षितिजगतयोर्मेषादिस्थितचंद्रार्कयोःकिलत्लोकत्रयस्ययुगपत्प्रवृत्तिः तत्रचं
द्रार्कयोःसमकालत्वाच्चांद्रमासादिःसएवमेषगतार्कत्वात्सएवचैत्रमासः तदानीमादित्यस्यैव
होरा अतोर्कवारइत्यादिसर्वंपोषमकरादिस्थितेर्केनघटते यतःसौरवर्षमासादेःप्रवृत्तिः
संहिताकारैर्मकरादिरेवस्वीकृतः उक्तंच मृगादिराशिद्वयभानुभोगादित्यादि अतश्चांद्रएवमुख्य

ग्रंथो मयचत्रघटिकाल्लमिश्रमा यो सुरस्कंदवरमरे स्मिन्नाड्विविंब:

तिक यथा तिथ्योदग्धत्वं नक्षत्रे पापवेधादिकमिति अथ पंचांगानां प्राकृतदोषविरहः तस्य योगकरणयोरनभिधाना
न अपि च शुद्धिशब्देनागंतुकदोषविरह उच्यमाने वा दोषः स्वार्जूरसमांघ्रिभमित्यादिना रत्नादिभिः पठितेषु दोषे
षु पोनरुक्त्यापत्तिः एकविंशतिपरिगणनया असंभवश्च तस्मात् चांगानां प्राकृतिकदोषविरह एव शुद्धिरिति।
स्थितेऽमृत एवं विधाया पंचांगशुद्धेस्तन्मयमेव गोधूलिकमित्युक्तं भवति अथ यदि इदं वृषेपचांगशुद्धिमयमेवं
विवाहविधेस्यैरितिवदतोयमाशयः विवाहविहितेनक्षत्रे सति पंचांगानां ग्रहादिजनितदोषाभावलक्षणा
शुद्धिर्विवक्षिता तदपि न योगकरणयोस्तस्यासंभवात् यथासंभवमिति चेत्तदपि न पंचांगस्यैव यथ्यान्न्

काल्लार्गलानियतयेतपनार्द्धविंबवेलाव्यवस्थितिरियं रचयां वभूवे ६ इति विवा० गोधूलिकाध्यायः ८

नः शुद्धिशब्देन प्राकृतदोषाभावः स्वीकर्त्तव्यः नहि पंचांगशुद्धिर्वा त्यौम्यार्केशनावित्यादिना कुलिकार्द्धयामो क
ण्टत्यजेत्वा दोषा इति चेन्न नारदवसिष्ठादिभिः पंचांगशुद्धिविरह इत्यादि पठितं दोषेषु वारदोषस्यापि पृथग्ग्रहणा
न नहि कुलकं क्रांतिसाम्यं चेत्याद्यागमवलात् कुलिकार्द्धयामौ त्यजेत् यद्येवं तर्हि षष्ठाष्टमचंद्रेण किमपराद्ध
मेष्वागमवलात्त्यज्यते नात्र प्रमाणवचनं किमपि श्रुतमिति चेन्न तदपि न यतआगमाः प्रमाणवचनानि सन्त्येव
षष्ठेष्टमे मूर्त्तिगते च चंद्रे गोधूलिके मृत्युमुपैति कन्या कुजेष्टमे मूर्त्तिगते थवास्ते वरस्य नाशं प्रवदन्ति गर्गाः धि
स्वयुतेत्याज्यम् मूर्त्तौ षष्ठाष्टमः शशी गोरजस्तत्पष्ठमत्रितं तः शानिदिनं विना मूर्त्तौ षष्ठाष्टमे चंद्रे कुजे रंध्रा
सलग्नगं विनार्धशुभैर्युक्तं गोधूलं शुभदं भवेत् इत्यादीनि एतान्यवहमतानीति चेत्तदपि न यत्या

यदुक्तं सार्कमित्यादि तत्परिमाणमाह अत्रेति अत्र गोधूलिके यत्तदुभयत्रार्द्धास्तमयाभ्यां कूपश्चघटि
कादलमिश्रमाकृस्तस्माद्दिवरमणेः सूर्यस्यार्द्धबिंबोपि कालो न ग्राह्यः अर्द्धबिंबं यत्र सतथा न हि तद्वाक्या
नांगतिः केत्यत्राह कालेति इयं तपनार्द्धबिंबवेला व्यवस्थितिः तपनस्य यदर्द्धबिंबं तस्य वेला काल
स्तस्य व्यवस्थितिरवस्थानं कालस्यार्गलायानियतयेनियमो यमुनिभीरचयांवभूवे अरविलिंगतो
द्रुचनेः कर्मणि लिट् इमवेत्प्रयोगः किंतु तत्सर्वं तत्पश्चाच्चापि कालान्तरमस्ति अर्द्धघटिकाकालिक

अत्रोभयत्र घटिकाचूलमिश्रमाकृष्णोस्तलदिवरमणेरपिनार्द्धबिंबः ॥ ॥

वाकान्तरदर्शनादिति भावः यत्र गोधूलिके विविधमस्थमयषेत्यादिना यदुक्तं ग्रंथकृता तत्सर्वमपि वि।
चक्षपदवीं नाधिरोहति तथाहि यदुक्तोत्र हेतुः पंचांगशुद्धिमयमेव विवाहविधिस्येरित्यादि तत्र पृच्छ्यते
केयं पंचांगशुद्धिरिति पंचांगानि तिथ्यादीनि प्रसिद्धानि नारदवशिष्ठादिभिः पंचांगशुद्धिविरहो दो
षत्वाद्यः प्रकीर्त्तितुइत्यादिना महादोषकरग्रहणेऽभिहितानि तेषां शुद्धिर्दोषविरहः दोषो द्विधा प्राकृ
तिक आगंतुकश्चेति यस्मिन्कर्मणि यदनभिहितं तिथ्यादिकं तत्राद्यो दोषः यथा विवाहे दर्शव्यतीपा
तभरणादौ आगंतुको ग्रहादिजनितो यथा तिथौ दग्धत्वं नक्षत्रे पापवेधादिकमिति अथ पंचांगानां

किंच नांशकाइति इह गोधूलिके शोनवांशः स्वभर्त्रा स्वस्वामिना दृष्ट्या दृष्टो वा युतो वा नास्तु लग्नं च स्वभर्त्रा दृष्ट-
युतं नास्तु अर्कोरसो ऽष्टमसंस्थः सूर्यभौमशनिराहुलग्नस्थो योगस्तेन भंगो लग्नभंगः सोपि नास्तु एवं स-
त्स्वेकं चंद्रबलारमयं किमतस्तत्रापि नु चंद्रषडष्टमादिदोषो नास्त्विति स्पष्टः ननु त्रागम एव प्रमाणमिति चेत्तत्रा-
ह किंचेति अत्र चंद्रबलारविषये वा पुस्तकं प्रमाणं किमपि न श्रुतं अस्मिन्विषये यद्वाक्यं प्रमाणीकर्त्तव्य-
तन्महर्षिसंमतं वाक्यं नास्तीति भावः तदेव त्रिविक्रमो विलोक्य मित्याह सार्कमिति नक्रो धूलिकं शनेशनि वा
नांशो न लग्नमिह दृष्टयुतं स्वभर्त्रा नार्को रसो ऽरतनुसाम्यपि तंगभंगः किंचांद्रबलारमयमेव मिहास्ति
किंचनात्र प्रमाणवचनं किमपि श्रुतं वः ४ सार्कधानो वियद्विचित्रशिखंडिसूनोतः केवलं कुलि-
कयामदलोपलंभात् प्रायेण संकरभवाम शुभं तदेपतत्कूरतल्पशुभमक्रोककरपीडने स्यात् ५
रे सार्ककालं दृश्ये रवौ सतीति चित्रशिखंडिनः सूनोः गुरुवारे विबुविकार्ये असंगते के सतीति यस्मात्
कुलिकयामदलोपलंभात् शनौ राज्ञो प्रथमप्रहरे कुलिको ऽतः सार्के गुरुवारे त्वष्टमो यामार्द्धं अतो
विरवीति केवलमिदमेव पंचांगमध्ये वारदोषसद्भावान्न त्वन्यदिति एतत्कथं तत्राह प्रायेणेति सं-
करेण जातिसंकरेण भवतीति संकरभवस्तेषां हीनवर्णानां करपीडनं प्रायेण बाहुल्येनाशुभं तत्प-
तत्कुरतल्पशुभमकृत्स्यात् अशुभेन तत्तेपले च कुलग्रहणीयसंगाच उपलव्याणां नयादुष्टवार

यद्येवं तर्हि केचित्पञ्चाष्टमचन्द्रे सति लग्नभंगमाहुस्तान्निरस्यति गोधूलिकेति गोधूलिके पि लग्ने
षष्ठेऽष्टमे च मूर्त्तौ यस्तं विधुं यत्केचित् मोचयंति त्यजंति तदयं स्वकृचेरेव प्रपंचो विस्तारः तथा।
कं हित्वा चंद्रमसं षडष्टमगतं गोधूलिके शस्यते इति प्रपंचो जनमोहनं तत्र हेतुर्यस्मादिदं गो
धूलिकं विवाहधिष्ण्यैः सह पंचांगशुद्धिप्रधानमेव गोधूलिके विवाहनक्षत्रे सति पंचांगशु

गोधूलिकेपि विधुमष्टमषष्ठमूर्त्तौ यन्मोचयंति तदयं स्वकृचिप्रपञ्चः ।
पंचांगशुद्धिमयमेव विवाहधिष्ण्यैर्यस्मादिदं सततमस्तगते पतङ्गे ३

द्धिरेव प्रधानत्वादपेक्ष्यते न त्वन्यत् लग्नशुद्ध्यादिकमिति पंचांगानि तिथ्यादीनि तेषां शुद्धिः
स्वाभाविकदोषविरहः ननु न लग्नस्य पंचांगान्तर्गतत्वाद्विवाहधिष्ण्यैरिति नृपो न सक्तं नन्न न
नक्षत्रस्य प्राधान्याभिप्रायात् उक्तधिष्ण्यमधिकृत्य पंचांगशुद्धिर्विलोक्येत्यर्थः एतदग्रे प्रपंचयि
ष्यामः यस्मात्कारणादिदं गोधूलिकं सततं सर्वदा पतंगे सूर्ये सप्तमगे सति स्यात् एतावता हरोम
हादोषरहिते सति किंत्वन्येष्वष्टचन्द्रादय इति भावः अनेनैव वाष्टमोमादयो निराकृताः ३

अथगोधूलकप्रशंसानदधिकारिणआह उत्कर्णेति पंचसुवसंततिलका: उद्दूर्णौकर्णौये षांतेउत्कर्णा: तेतर्णका वत्सा तेषांविलोकनंतेनवल्गावः प्रोभंना: तेन वल्गुनोगतिविशेष वत्य: पीनास्तनायासांता: तदुत्कर्षेणहृषिता: संतुष्टा: हषेर्निष्ठायां वेदूत्वंदु:खेनधर्तुंशक्यं तेनाउधर्राआश्रयाधेनवस्तासांधूलिगोपपृथग्जनानां गोपादिपामरलोकानांहेतवेगोधूलि

उत्कर्णतर्णकविलोकनवल्गुवल्गात्पीनस्तनोद्धृषितदुर्द्धरधेनुधूलि:
गोधूलिकंसृजतिगोपपृथग्जनानांदोषैर्मह‌द्भिरपित्नग्नमभग्नमन्यैः २

कंसृजति गोधूलिकल्नग्नंददाति गोधूल्युपलक्षितकालेभवंलग्नंगोधूलिकं तत्रलग्ने। सदासप्तमः सूर्योभवत्येव अयंमहान्दोषः मदनमूर्त्तिशायइत्युक्तत्वात् अन्यैर्महद्भि रपिदोषैरष्टमभौमादिभिः सहितमपिलग्नंशुभंभवेत् २ श्रीदुर्गायैनमः ।।
श्रीदुर्गायैप्रनमः ।। ।। ।। ।।

अथ गोधूलकलग्नस्य विशेषगुप्तिं विवदुस्तावत्तत्कालं दर्शयन्स्वकविताकौशलमभिव्यनक्ति प्राचीमि
ति शार्दूलविक्री० अंगे देहे लग्नाः स्पृष्टाः सुरभीणां धेनूनां रेणवो धूलयो यस्मात् ध्वान्तस्याः
पाणिं गृह्णतो वरस्य तावत्कालं भवति यावद्रविः संध्यामायं संध्यारूपायाः कुरंगीदृक्वधू
यास्सह किरणसंपर्के करग्रहं याति किंकुर्वन् प्राचीं दिशं पूर्वां प्रतितथा प्राचेतसीं च दिशं प्रत्या
त्मानं दर्शयन् कीदृशीं प्राचीं कुंकुमेन चर्चितां मंडितामिवेत्युत्प्रेक्षा दृशेर्णिजंतत्वाद्द्विकर्मक

प्राचीं कुंकुमचर्चितामिव दिशं मुक्ताफलस्रग्विणीं कौसुंभांशुकभासिनीमिव दिशं
प्राचेतसीं दर्शयन् यावद्याति करग्रहं सह रविः संध्याकुरंगीदृशा तावन्मंगलमंगल

त्वं सायं प्राच्यां कुंकुमसदृशः स्वाभाविकः संध्यारागः स कुंकुमतयोत्प्रेक्षितः कथंभूतां नक्षत्र
मालेव मुक्ताफलानां स्रक् विद्यते यस्यां सा तां मत्वर्थे विनिः कीदृशीं प्राचेतसीं वारुणीं कौसुंभां
शुकभासिनीं कुसुंभ्याः पुष्पाणि कुसुंभानि तेरक्तं कौसुंभं तच्च तदंशुकं च तेन भासते सा
तथा अर्थात्संध्यारागएव कौसुंभांशुकतया कल्पितः यावत्सायं रागः सुरभीरेणवश्च दृश्यंते
तावत्कालं करग्रहकर्तुर्मंगलं स्यादिति तात्पर्यार्थः १ ॥

अथजन्ममासादिनिषेधमाह नोजन्मेति जन्मसम्बन्धिनिमासेतिथौभे प्रथमकृत्यं चौडोपनयनवि
वाहादिकं नाम नेति नचाधिको नेमासेतिथौच अधिकमासे क्षयमासे दिनक्षये दिनक्षये च न
ज्येष्ठमासेविशेषमाह ज्येष्ठगर्भजमपत्यं पुत्रः पुत्रीवा ज्येष्ठेमासेमहोत्सवं चूडोपनयनोद्वाहा
दिकमुपेतंशास्त्रसदृद्धिं नइयात् लभेत ज्येष्ठापत्यस्यनज्येष्ठेमंगलंकार्यमित्यर्थः २६

नोजन्ममासतिथिभेषु नचाधिकोनेमासेतिथौच प्रथमकृत्यमामनंति यज्ज्ये
ष्ठगर्भजमपत्यमुपेतमेतज्ज्येष्ठेमहोत्सवमुत्सवमुपमियान्नवृद्धिं २६ इत्यतीन्द्रिय
दृशोनिरूचिरे यद्गुणागुणमयं प्रजनीश्वराः देवविद्विदितजन्मतन्मातः कीर्तिभागभ

एतज्ज्ञानफलमाह इतीतिगुणागुणमयं गुणदोषविचारात्मकं दिव्यदृशयोमुनयो यन्निरूपि
तवंतः अस्य यच्छेद्वयस्य तन्मानतइतिसमासान्तर्गत यच्छब्देनान्वयोबोध्यः विदितं वरवधोर्ज
न्मतन्मातं च येन सवरलग्ने गुणागुणदोषविवेकाय निविष्टाधीर्यस्य सदेवविन्कीर्तिभा
ग्भवति २७ इतिविवाहवृंदावनटीकायां षड्गोधिकाराध्यायः ॥ ७ ॥

जागदीशी सिद्धान्तलक्षणं

ले. जगदीश

विषय- दर्शन (नव्य-न्याय)

35 पत्र

T393

यद्रूपावच्छिन्नानुयोगिताकपर्याप्तिकाधारत्वं तदवच्छेदकता तद्रूपावच्छिन्नानुयोगिताकपर्याप्तिकाधारत्वं च्छेदकता तन्निरूपिता तदन्याभावच्छेदकतानिरूपिता या प्र

तियोगिता तदन्याभावप्रयोगितानवच्छेदकत्वं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः प्रमेयसाध्यतावच्छेदकस्थले प्रमेयव

श्रीमते रामानुजाय नमः ॥ वह्नित्वावच्छिन्नस्य सर्वस्यैव धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्व्यक्ति

त्वावच्छिन्नत्वादव्याप्तिरित्यपि व्याचक्षते प्रतियोगितानवच्छेदको यो धर्म इति न च प्रतियोगितावच्छेदक

इत्यस्य भावप्रधाननिर्देशतया वह्निपदस्य वह्निप्रतियोगिताकपरतया तादृशप्रतियोगितावच्छे

दकत्वावच्छिन्नप्रतियोगिताकभिन्नत्वं लभ्यत इति नावच्छिन्नपदवैयर्थ्यमिति वाच्यम् पर्यायपर्वतेम

हानसीयो वह्निर्नास्तीत्यादिप्रतीतिसिद्धस्य हेतुमन्निष्ठाभावस्य प्रतियोगितावच्छेदकमेव वह्नित्वमि

त्यव्याप्तितादवस्थ्यम् न च तादृशावच्छेदकतापर्याप्त्यधिकरणत्वं न वह्नित्वस्येत्यदोषः प्रत्येकमु

भयत्र पर्याप्तिसंबन्धेनासत्तोऽवच्छेदकत्वस्योभयत्र पर्याप्तिसंबन्धेन सत्त्वायोगात् तथापि साध्यता

वच्छेदकतादितरोभयावच्छेद्यभिन्नाया एव प्रतियोगिताया अनवच्छेदकत्वस्य विवक्षितत्वात् अदोष

इति वाच्यम् न च प्रमेयसाध्यतावच्छेदकस्थले तादितराप्रसिद्धिरिति वाच्यम् तदितरपदेन स्वानवच्छि

न्नप्रकारतावच्छेदकसाविवक्षितत्वात् साध्यतावच्छेदकाभिन्नो यः साध्यनिष्ठो धर्मस्तदनवच्छेद्या

नु प्रतियोगितानप्रवेशात् तथा सति तादृशप्रतियोगिताशून्यसाध्यसामानाधिकरण्यस्यैव व्याप्तित्वसंभवे सा
ध्यतावच्छेदकस्य तादृशप्रतियोगितानवच्छेदकत्वानुसरणस्य वैयर्थ्यापत्तेः अपि च प्रमेयवान् वाच्यत्वादि
त्यादावव्याप्तिः तथाहि साध्यतावच्छेदकातिरिक्तं यत्साध्यवृत्ति घटत्वादिकं तदनवच्छेद्यप्रतियोगिताकस्य हेतुसमा
नाधिकरणाभावस्याप्रसिद्धिरिति नु नवीनाः इदं त्वादिरूपेण धूमे वह्निव्याप्यत्वस्य धूमसामान्ये वा तत्तद्धूमे वह्नित्वा
वच्छिन्नव्याप्यत्वस्य च वारणाय विशिष्य लक्षणं निर्दिशति तद्रूपावीशिष्टसेत्यादिना तद्धर्मावच्छिन्नहेतुकता
दृशधर्मावच्छिन्नविधेयताकानुमितिजनकतायां विषयविधेयतावच्छेदिकेति तदर्थः तेन व्याप्तिपदेना
पि तादृशसामानाधिकरण्योक्त्या न पौनरुक्त्यम् महानसीयवह्निसामानाधिकरण्यस्यैवानीताविलधूमवह्न्या
दिव्याप्तित्वमिति व्याप्तेः सामान्यरूपतालाभाय यावदिति येन केनापीति च ननु दाण्डिमान् दण्डसंयोगादित्यत्रा
व्याप्तिश्चालिनीन्यायेन दण्डमात्रस्यैव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वात् न च स्वरूपसाध्यताव
च्छेदकस्यत्वे प्रतियोगितानवच्छेदकमित्यत्रावच्छेदकत्वं निरवच्छिन्नमिव वा विशिष्टसाध्यतावच्छेदकस्य
लेपि येन रूपेण साध्यतावच्छेदकत्वं तत्तदितरोभयानवच्छिन्नप्रतियोगितावच्छेदकत्वमेव ग्राह्यम्

दण्डिसंयोगा
दित्यत्र दंडा
धिकरणानु
योगिकत्ववि
शिष्टत्वावत्व
हेतुरित्यर्थः ४

1395

अन्यथा पर्वतो महानसीयवह्निवृत्तित्वविशिष्टजातिमान्नास्तीत्यादिप्रतीत्याविशिष्टवह्नित्वस्यतादृशाभावप्रतियो
गितावच्छेदकतयावह्निमान्धूमादित्यादाविव जातिमत्वान्यटत्वादित्यादाविव व्याप्तिप्रसंगात् घटेपटसमवेतत्व
विशिष्टजातिमान्नास्तीत्यादि प्रतीत्याविशिष्टजातेस्तादृशप्रतियोगितावच्छेदकत्वात् तथा च तद्दंडवान्नास्ती
त्यादिप्रतीत्या न तावद्विशिष्टदंडव्यक्तेरेवप्रतियोगितावच्छेदकत्वावगाहनात् शुद्धदंडव्यक्तीनां दंडत्वतादितराभे
यान वाह्निनं पक्षेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वं तदभावसत्वान्नाव्याप्तिरितिवाच्यम् प्र
मेय दंडवान्नास्तीत्यादौ प्रमेयत्वोपलक्षिततस्यैव तद्दंडवान्नास्तीत्यादावपि तत्वोपलक्षितदंडव्यक्तिमा
त्रस्यैवावच्छेदकत्वोपगमात्केवलस्यावच्छेदकत्वासंभव एवाविशिष्टस्यतथात्वस्वीकारादन्यथाप्रमे
यत्वादिविशिष्टदंडादेरपितथात्वापत्तेरत आह दंडाभावेति हेतुमत्ति दंडसामान्याभावसत्वाद्दंडत्वम
पि तादृशप्रतियोगितावच्छेदकमेवेत्यत उक्तं परंपरासंबंधेनेति तथा च स्वाश्रयाश्रयत्वरूपपरंपरासं
बंधेन दंडत्ववतो दंडिनस्साधनवत्समावावीरहान्नाव्याप्तिः साध्यतावच्छेदकघटकसंबंधावच्छिन्नाया
एव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतायाः प्रविष्टत्वात् अन्यथाविषयापत्ति यारूपत्वादिमत

अप्रसंगातिप्रसंग
धनापादकेत्वयोश्र
वच्छेदकत्वेसंभवति
सतिगुरौतदभावात
अपेक्षितानुपपत्तिर
प्रसंगः अनपेक्षिता
पत्तिरतिप्रसंगः ७

1396

ता

गा

समवायेनाभावस्य हेतुमति सत्त्वाद्रूपवान् पृथिवीत्वादित्यादावव्याप्तिप्रसंगादिति भावः यदि च दंडिमानिति शुद्धदंडव्यक्तेरवच्छेद
कत्वावगाहि प्रत्ययांतरसत्त्वात्तद्दंडी नास्तीति प्रतीत्या तन्नादिविशिष्टदंडव्यक्तेरेवावच्छेदकत्वं युक्तं दंडी नास्तीति प्रती
त्यन्यथानुपपत्त्या दंडस्यैवावच्छेदकत्वासिद्धेः प्रमेयपदं वान्नास्तीत्यादेरपि तन्मात्रावच्छेदकत्वेनैव सामंजस्ये
विशिष्टस्य तत्रावच्छेदकत्वकल्पनात् तथा च कथमुक्ताव्याप्तिरित्युच्यते तदा रूपत्वन्यूनवृत्तिजातिमत्त्वान्
पादित्यादावव्याप्तिस्तदा सामेव नीलत्वपीतत्वादीनां रूपत्वन्यूनवृत्तिजातीनां साधनवन्निष्ठाभावप्रतियोगि
तया निरवच्छिन्नावच्छेदकत्वाद्रूपवति नीलो नास्तीति प्रत्ययादित्याशयेन दंडाद्यादावित्यादिपदमुपात्तम्
तथा च तत्रापि स्वन्यूनवृत्तिजात्याश्रयत्वसंबंधेन रूपत्वमेव साध्यतावच्छेदकमिति भावः साध्यताव
च्छेदकमिति अनुमितिविधेयतावच्छेदकमित्यर्थः तथा चोक्तव्याप्तिज्ञानाद्दंडांशे दंडत्वप्रकारिकादं
डत्ववत्वानित्येवानुमितिः न तु दंडिमानिति दंडप्रकारिकापि तस्य व्यापकतावच्छेदकत्वेनाग्रहात्का
रणाबाधेन तदवच्छिन्नविधेयताकानुमित्यसंभवादिति भावः वस्तुतो दंडत्वस्य साध्यतावच्छेदक

त्वे दंडिमानित्यनुमितिर्नस्याद्दंडानां व्यापकतानवच्छेदकत्वादित्यत्वरस्तादेव दंडत्वादिकमित्यत्रादिपदमनुपात्तम् तेनत
त्तद्दंडव्यक्तीनामेव स्वरूति दंडत्वाश्रयाधिकरणत्वलक्षणपरंपरासंबंधेन साध्यतावच्छेदकत्वलाभाद्दंडिमानित्यनु
मितेर्न्नानुपपत्तिलेशोपीति ध्येयम् केचित्तु साध्यसाधनभेदेन व्याप्तिग्रहानुमित्योः कार्य्यकारणभावभेदाद्घ
त्रे दंडत्वादिविशिष्टसाध्यतावच्छेदकं तत्र हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतानवच्छेदको यो धर्म्मस्तद्वि
शिष्टावच्छिन्नसामानाधिकरण्यरूपैव व्याप्तिस्तद्विशिष्टावच्छिन्नाविधेयताकानुमितिप्रयोजिका पत्नवपरंप
रया दंडत्वादिकमेवानुमितौविधेयतावच्छेदकं तत्र हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदको यो धर्मः परम्पर
या तदवच्छिन्नसामानाधिकरण्यरूपैव व्याप्तिरनुमितिप्रयोजिकेति सामानाधिकरण्यांशे दंडादेः प्रवेशाप्र
वेशाकृतगौरवं दंडिमान्दंडत्ववत्वानित्यनुमित्योर्दंडादिविषयकत्वानियमस्त्याहुः पत्तु दण्डत्वधार्म्मिक
निरूपितानवच्छेदकत्वस्तानस्यैव कार्य्यतावच्छेदकं दंडावच्छिन्नाविधेयताकानुमितित्वस्यापि तादृश
ज्ञान कार्य्यतावच्छेदकतयाऽवश्यं दंडिमान्दण्डत्ववत्वानित्यनुभयाकारानुमित्यापत्तेरुभयधर्मीव
मितौ तमितौ नुमितेर्दंडप्रकारकत्वंनानुपपन्न

ति१ नु१

च्छिन्नस्य सामग्रीसत्त्वादितिदिक् नव्यास्तु दंडिमानित्याद्यनुमितौ संयोगेन दंड्यादेः प्रकारत्वं न किंतु स्ववृत्तिपुरुषत्वावच्छिन्ना
धिकरणत्वसंबंधेन नचैवमनुभवापलापापत्तिः दीधितिकृन्मतेपि दण्डस्य साध्यतावच्छेदकधर्मविधया संयोगस्य च साध्य
तावच्छेदकताघटकसंसर्गविधयावगाहितापलापापत्तेरिति प्राहुः यद्रूपविशिष्टेत्यस्य फलमाह इत्थं चेति चोवधार
णे इत्यादावित्यादिन्यायस्थलीयहेतौ तथा च न्यायःपदानिर्देशं विना नोत्पत्त इदं पदेन तान्निर्देशः यत्तु द्रव्ये धर्मिणि
[illegible] तादात्म्येन गुणकर्मणोः साध्यताभ्रमं निरसितुमिदामीति पदानिर्देश इतीतन्मंदम् एवमपि इ
दंत्वाविशिष्टद्रव्ये गुणकर्मणोस्साध्यताभ्रमस्यानिरासादिति गुणादाववृत्तेरिति गुणादावभावादित्यर्थः तथा च हे
तुतावच्छेदकावच्छिन्नाधिकरणत्वं न गुणस्येति भावः यद्धूमवत्त्वप्रकृप्रमाभिः पर्वतत्वचत्वरत्वादितत्तद्धर्मविशि
ष्टधूमवत्त्वाद्यवच्छिन्नाधिकरणताव्यक्तिभिरेव धूमवदिति प्रतीत्युपपत्तौ धूमत्वाद्यवच्छिन्नाधिकरणत्वे मानाभावा
द्वह्निमान्धूमादित्यादौ व्याप्तिर्हेतुतावच्छेदकीभूतधूमत्वाद्यवच्छिन्नाधिकरणत्वाप्रसिद्धेः तथापि हेतुतावच्छेदक
धर्मेत्वाश्रयाधिकरणीभूतयावत्स्वाधिकरणतानवच्छेदकत्वस्याधिकरणतावच्छेदकत्वस्य च द्वयोर्व्यतिरेकः तथापि

ना.ती.
४

स्मा १

धं हेतुतावच्छेदकाश्रयाधिकरणमेव हेतुतावच्छेदकावच्छिन्नाधिकरणेत्यनेनाविवक्षितम् वह्निमान्धूमादित्यादौ च तादृ
श हेत्वधिकरणं धूमाधिकरणमात्रम् द्रव्यं विशिष्टसत्त्वादित्यादौ च तादृशहेत्वधिकरणं द्रव्यमेव न तु गुणादिरिति वि
शिष्टसत्त्वे तन्निष्ठाधिकरणतानवच्छेदकत्वस्याधिकरणतावच्छेदकत्वस्य च द्वयोः सत्त्वादिति ध्येयम् साधनभे
देन व्याप्तेर्भेदात् साधनतावच्छेदकेनाधिकरणतावच्छेदकं तत्तदाश्रयसामानाधिकरण्यमेव निवेश्यमित्यपि व
दंति ननु सामानाधिकरण्यस्य व्याप्तित्वे तस्य प्रतिधूमं भिन्नत्वात् धूमसामान्ये वह्निसामान्यस्यैका व्याप्तिरिति व्यवहारो नु
पपन्न इत्यत आह सामानाधिकरण्येति तथा च वह्नित्वधूमत्वाद्यनुगमादेव तत्र व्याप्तेरैक्यव्यवहारो न तु वस्तु
गत्या व्याप्तेरैक्यमिति भावः नन्वेवं महानसीयवह्निसामानाधिकरण्यस्यैव तत्र पक्षे वृत्तिधूमादावसत्त्वात् पर्वती
यवह्निसामानाधिकरण्यस्य च प्रागननुभवात् कुतः परामर्श इत्याशंकायामेकैव हि सा व्याप्तिरिति परामर्शविषयः सि
द्धांतग्रंथो ऽसंगत इत्यत आह वस्तुतस्त्विति रासभादीति तथा च धूमव्यापकवह्निसमानाधिकरणरासभवान्पर्व
त इति ज्ञानादप्यनुमितिः स्यादिति भावः न च धूमादिव्यापकवह्न्यादिसमानाधिकरणधूमादिमत्ता निष्कप
त्वेनैव परामर्शस्य धूमादिलिंगकानुमितिहेतुत्वादुक्तव्याप्तेरासभादिसाधारण्येऽपि न क्षतिरिति वाच्यं

१४००

राम
५

1401

पक्षधर्मांशे विषयतयानुमितिजनकतावच्छेदकस्यैव व्याप्तिपक्षधर्मतया धूमत्वादेस्तत्र निवेशे तद्धटितस्यैव व्याप्तित्वादि
तिभावः धूमत्वादीति तथा च तस्यैतिमत्त्वस्यं तत्पदं लक्ष्ये लक्षणे चोभयत्रान्वितमिति भावः ननु साधनानिष्ठसामानाधि
करण्यस्य व्याप्तित्वेऽपि एकैव वह्निसाव्याप्तिरिति ग्रंथानुपपत्तिस्तदवस्थैव किंच विशिष्टसत्त्वव्यापकीभूतद्रव्यत्वसामा
नाधिकरण्यवतः सत्त्वस्य गुणादौ परामर्शात् कुतोऽपि द्रव्यत्वानुमितिः प्रमा स्यादत आह तद्धेतीति तादृशसामानाधिक
रण्यवतीत्यर्थः तथा च तादृशसामानाधिकरण्यविशिष्टधूमत्वं व्याप्तिस्तत्प्रकारिकैव पक्षधर्मताधीरनुमितिहे
तुः तत्र नीलघटत्वप्रकारकबुद्धौ घटत्वस्येव स्वरूपत एव धूमत्वस्य भानं ननु धूमवत्त्वेनेति पतितो गौरवमिति
भावः आद्येति तथा च तामुपादाय पर्वतीयवह्निधूमयोः सान्निकर्षात्तयोः कथं व्याप्तिग्रहः इति परामर्शीयपू
र्वपक्ष इति भावः द्वितीयेति तथा चैवमभिप्रेत्यैवैकैव वह्निसाव्याप्तिरिति परामर्शीयसिद्धान्तग्रंथ इति भावः पक्षैकमे
व साध्याधिकरणं तत्रैतद्रूपवानेतद्रसादित्यादावाद्याप्यभिन्नेव पक्षवद्द्रव्यत्वादौ साध्ये रूपत्वव्याप्यजातिम
तो हेतुत्वं तत्र हेतुतावच्छेदकीभूतानां नीलत्वादिजातीनां नानात्वेन द्वितीयापि क्वचिद्भिन्नैवेति मतं तद्व्यमकोचि
तु आद्याभिन्नाऽनुमितेर्विषयाविधयाजनकतावच्छेदकाभिन्नाकिंतु व्यवहारोपयिकीति द्वितीयात्वाभिन्नाविष
य[illegible] तयानुमितिजनकतावच्छेदकरूपाद्भिन्नैवेत्याहुः क्वापि संयोगिन्येतत्सदापि स्वसाध्यतावश्यमवारणार्थमप

क

मितित्वनिर्देशः सांप्रदायिकमते संयोगसामान्याभावस्य द्रव्येऽभावात्कपीति वृत्तमात्रेकापि संयोगाभावादेतदिति न
चाभावे हेतुसामानाधिकरण्यस्यैव हेत्वधिकरणतावच्छिन्नवृत्तिकत्वरूपस्य निवेशादुक्तव्याप्तेरव्यदासंभवा
त्यातिव्याप्तौ वैयधिकरण्यविशेषणताप्रवेशोऽलक्षणनामनुचितमिति वाच्यम् अग्रे समाधास्यमानत्वादिति भा
वः ननु असमानाधिकरणांतम् ननु शाखावमूलादि सर्वावयवावच्छेदेन सर्वत्र द्रव्ये गगनादिसंयोगस्य सत्त्वा
त्कुतस्तत्सामान्याभावस्य द्रव्ये संभव इत्यत आह संयोगस्येति वृत्तत्वेति शाखावच्छेदेन तत्संयोगसत्त्वेऽपि वृ
क्षत्वावच्छेदेन कस्याश्चिदपि संयोगव्यक्तेरसत्त्वात्तदवच्छेदेनैव संयोगसामान्याभावसंभवोऽवच्छेदकभेदे
नैकत्र भावाभावयोरसमावेशादिति भावः नन्वेवं वृक्षे संयोगसामान्याभावस्य कुतो नाध्यक्षत्वमत आह
तत्त्वेति तत्र संयोगसामान्याभावे सत्त्वादेरन्यस्य प्रतियोगितासंबंधेनेत्यादिः तथा च संयोगसामान्या
भावस्यायोग्यप्रतियोगिकत्वान्नाध्यक्षत्वमिति भावः ननु प्रतियोगितावच्छेदकविशिष्टस्यैव यस्य कस्य प्रतियोगि
नो योग्यत्वमत्यंताभावग्रहे तंत्रं ननु योग्यमात्रप्रतियोगिकत्वम् अन्यथा गुणत्वेऽपि संयोगसामान्याभावस्य तादृश
प्रत्यक्षं न स्यादत आह परित इति परितः सर्वावयवावच्छेदेन प्रतियोगिग्रहात्मकदोषाद्वेत्यर्थः नचैवमपि प्रति

वस्तुतस्तु प्रतियोगितावच्छेदकयद्धर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकयावदभाववान् सतद्धर्मावच्छिन्नाभाववानित्येव व्याप्तिः तेन
घटपटयोर्द्वित्वादीनीश्वरगुणत्वस्य गुणत्वानतिरेकितया जातित्वेपि न क्षतिः

योगिनो ग्रहो न्यायवशायातमेव न तत्स्वरूपं दुर्वारमिति वाच्यम् प्रतियोग्युपलम्भकसामग्र्या अपि दोषत्वोपगमात् प्रतियोगिनम्
उपलब्धिर्यतन इति व्युत्पत्त्या तस्याश्च वा प्रस्तुतत्वादिति भावः प्रतियोग्युपलम्भरूपदोषाभावस्य संयोगसामान्याभावप्रत्यक्ष
कार्यसहभावेन हेतुत्वोपगमान्न दोष इत्याहुः नवेति मानमिति परेणान्वयः यो यदीयेति योपजातिसमानाधिकरणो
भयावृत्तिधर्मावच्छिन्नपदस्वंधावच्छिन्नप्रतियोगिताकयावदभाववान् स तज्जातित्वावच्छिन्नतत्स्वंधावच्छिन्नप्रतियो
गिताकाभाववानित्यर्थः तेन न स्वरूपासिद्धिस्सिद्धसाधनं वा नात्युपादानाद्गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे
तदवच्छिन्नाभावाप्रसिद्ध्यापि न व्यभिचारः न च सत्त्वगुणत्वाद्यवच्छिन्नाभावमादाय स्वरूपासिद्धेर्वारकस्योभयावृत्ति
पदस्य वैयर्थ्यं व्यभिचारवारकस्येवासिद्धिवारकस्यापि विशेषणस्य सार्थकतायाः पक्षधरमिश्रादिसम्मतत्वात् अ
त एवानित्यत्वसाध्यकानुमाने विशेषगुणान्तरासमानाधिकरणैकमात्रवृत्तिगुणत्व हेतौ शब्दे तत्सार्थकस्यान्तर
पदस्यैतैः सार्थकत्वं समर्थितम् यद्युपदीयपावद्विशेषाभाववानित्यस्य यो यदीयानां यद्धर्मावच्छिन्न
प्रतियोगित्वानां यावतां विशेषाभाववान् प्रत्येकावच्छिन्नाभाववान् सतद्धर्मावच्छिन्नाभाववानित्यर्थः तथा च संयोगत्वा
वच्छिन्नप्रतियोगिताव्यक्तीनां प्रत्येकावच्छिन्नाभावकूटवत्त्वस्य पदे सत्त्वान्नासिद्धिः न वा व्यर्थविशेषणत्वमिति
ध्येयम् योयद्धर्मन्यूनवृत्तिधर्मावच्छिन्नयावदभाववान् सतद्धर्मावच्छिन्नाभाववानित्यर्थस्तु संयोगत्वन्यूनवृ

यद्धर्मन्यून इत्यत्र यद्धर्मसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति यद्धर्मसमानाधिकरणत्वम् १

1403

जा॰ ती॰

६

यादिसामान्याभावेत्यादि कपिसंयोगत्वावच्छिन्नप्रतियोगिकत्वस्य संयोगत्वे
...न्वयस्य सामान्य निरवच्छिन्नत्वेन
...तज्जातीयावच्छेदकतानिरवच्छिन्नत्वम्

मात्रपदं विच्छिन्नत्वं चतनीवाच्छिन्नत्वज्जातीयानि दावच्छेदकतानिन्नावच्छेदकतावानिरूपितत्वे सति
निरवच्छिन्नतज्जातीयनिष्ठावच्छेदकतानिरूपकत्वम् ८

तिधर्मावच्छिन्नप्रतियोगिताकस्य घटवृत्तिसंयोगत्वद्रव्यत्वान्यतमत्वावच्छिन्नाभावस्य यावदन्तर्गतस्य
वृत्तादौ प्रसिद्धस्वरूपासिद्धत्वादनुपादेयः संयोगत्वावच्छिन्नाभाव इति न च सर्वावयवावच्छेदेन वृक्षादौ गग
नादेरेकैकत्र संयोगत्वावच्छिन्नस्यैवाभावविरहात्संयोगत्वावच्छिन्नाभाववत्त्वं पक्षे स्वरूपासिद्धमिति वा
च्यम् अतिप्रसङ्गभङ्गाय यथाश्रुतादौ तन्मते द्रव्यत्वावच्छिन्नवृत्तिकसंयोगं प्रति तत्तद्द्रव्यत्वेन हेतुत्वस्यावश्यकत
या वृत्तेर्व्याप्यवृत्तिगगनसंयोगस्याभावादिति भावः प्राचां मते यत्तदर्थपयोरनुगतमाह एकावच्छेदेनेति इदं
मुपाधेः साधनाव्यापकत्वरक्षायै न चैवं तत्तत्संयोगाभावस्य गुणाव्याप्यवृत्तितयादेकावच्छिन्नत्वेन साध्य
व्यापकत्वं दुर्घटमिति वाच्यम् एकावच्छेदेनेत्यनेनानवच्छिन्नवृत्तिकत्वादिविशिष्टस्यैवविवक्षितत्वात्॥
न च तथापि कपिसंयोगसामान्याभाववति वृक्षे निरवच्छिन्नवृत्तिकत्वविशिष्टस्य तदीयपावद्विशेषाभावस्या
सत्त्वादुपाधेः साध्याव्यापकत्वमिति वाच्यम् मात्रस्यावच्छिन्नाभावस्यैवोक्तव्याप्तौ साध्यविधया प्रवेशात् कपिसं
योगाभावस्य चानत्पात्वे न तं प्रति तदीयपावद्विशेषाभावस्योक्तहेतोर्व्यापकत्वेपि तत्स्वभावात् न चाभिधा
नादिसामान्याभावस्य वृत्ते सत्त्वात्तत्र निरवच्छिन्नवृत्तिकत्वादिविशिष्टस्य तदीयपावद्विशेषाभावस्यासत्त्वा
दे वोपाधेः साध्याव्यापकत्वमेवेति वाच्यम् गुणादिभाजकमात्रे एव हेतुसाध्यवोः प्रवेशात् केचित्तु एकाव

धीविशेषविषयत्वं पत्वंतत्वम् ५

कपिसंयोगत्वं च कारि प्रतियोगिकत्वविशिष्ट संयोगत्वं ८

14.04

राम

६

रूपसामान्याभाववान् रूपविशेषाभाववत्त्वात् इत्यादि एकावच्छेदेन रूपवि
शेषाभाव उपाधिः ४

1405

च्छेदेनेत्यस्यावच्छेदकतासंबंधेन तदभावाधिकरणीभूतदेशस्यावच्छेदकतासंबंधेनाभाववत्त्वेनेत्यर्थः तथा
च तादृशिरूपावद्विशेषाभाववत्त्वमुपाधिरित्याहुस्तच्चिंत्यं चिंताबीजं तु तादृशदेशस्यावच्छेदकतासंबंधेनाभावो
नाव्याप्यवृत्तिर्मीनाभावादतो तादृशिरूपावद्विशेषाभावरूपोपाध्यप्रसिद्धिरिदमपि ध्येयं पक्षत्वेकावच्छेदेने
त्यस्य परस्परानवच्छेदकानवच्छिन्नवृत्तिकत्वविशिष्टेत्यर्थमाहुस्तन्न व्याप्यवृत्तिरूपादीनां विशेषाभावस्याव
च्छेदकाप्रसिद्धात तदनवच्छेदकस्याप्यसंभवेन तत्रैव साध्याव्यापकत्वतादवस्थ्यादिति भावः पक्षद्वयं विना
कृतमनुगतानुमानमाशंक्य निषेधति एतेनेति वक्ष्यमाणदोषेणेत्यर्थः व्यर्थेति संयोगसामान्याभावस्य त्व
न्मते केवलान्वयित्वात् साध्यतायामभाववत्त्वादित्यस्यैव सम्यक्त्वादिति भावः अप्यात्त्वभाववत्त्वादिक
मेव हेतुरत आह अप्रयोजकत्वादिति अनुकूलतर्करहितत्वादित्यर्थः ननु निरुपाधित्वमेव प्रयोजकम
त आह निर्गुणत्वादिति आदिना द्रव्यभिन्नत्वादेरुपग्रहः अत्र यद्यपि निर्गुणत्वोपाधेर्नसाभावेन साध्या
भावोन्नायकतया दोषत्वं संयोगस्यैव साध्याभावतयावृत्तौ तस्य वृत्त्वात् नापि व्यभिचारोन्नायकतया तत
एवं तथापि स्वव्याप्यत्वेन साध्यस्य पक्षवृत्तित्वाभावोन्नायकतया दूषकत्वं बोध्यम् संयोगसामान्याभावो
न वृत्तेवृत्ति निर्गुणत्वादिव्याप्यत्वादित्यनुमाने नापि वृत्तः संयोगसामान्याभावानित्यनुमितेः प्रतिरोधादि

अवच्छेदकताहांवे
धस्य वृत्त्यानियाम
कत्वात २

दो

1406

तिध्येयम् ननु यो यद्धर्मस्यानवच्छेदकः स तदभावानवच्छेदक इति व्याप्तेर्व्यर्थत्वादेः संयोगसामान्याभावावच्छेदक
त्वेनैतस्य तीव्याप्तं क्य निराचष्टे न चेति तथाच व्याभिचारान्नोक्त व्याप्तिरिति भावः ननु दृष्टत्वं संयोगसामान्याभावाव
च्छेदकं संयोगसामान्यानवच्छेदकत्वादिति विशिष्यैव व्याप्तिर्वाच्या प्रमेयत्वसत्त्वादेः पक्षसमत्वादतः त्वहूपा
सिद्धिमाह यथा चेति प्रतियोग्यसिद्धिरिति भिन्नत्वेधीतिपरेणान्वयः नन्वव्यवहितपूर्ववर्तितायाः अवच्छेदकं न दंड
त्वमतिप्रसंगात्किंत्वव्यवहितपूर्ववर्तित्वमतो वाः सा चाभिन्नेत्यतः संयोगस्यलक्षणवानुरूपं दृष्टांतमा
ह वन्हीति न तत्सामान्याभावेति यत्पूर्ववर्तित्वसामान्यस्य वान्हिसामानाधिकरण्यसामान्यस्य चेत्यर्थः केचित्तुक
त्वीत्वअभाव प्रयोजकत्वमन्यथा तदभावानवच्छेदकत्व हेतुना तदवच्छेदकत्वमेवकृतोनदृष्टत्वादेस्साध्य
ते दृष्टत्वाद्यवच्छेदेनैव संयोगव्यक्तीनामसत्त्वेपि संयोगसामान्यस्य सत्त्वादित्यभिप्रायकोयं ग्रंथ इत्याहुः उत्प
त्स्येति सामान्याभाव इति परेणान्वयः नन्वाद्यक्षणे घटे गुणो नास्तीति प्रत्यक्षमसंभवि संगन्नि कथं घटाभावात्प्र
थमक्षणे घटादौ गुणो नास्तीत्यादि व्यवहारादेकं चसंदेष्य सामान्यकत्वतः स्थानांतरमाह प्रलयावच्छेदेनेति तदानीं
न्यभावसत्त्वे प्रलय एव व्याहन्येतेति भावः ननु न ह्यात्मत्वये मानाभावात्तदवच्छेदेनैवायुक्तमत आह तथेति ननूक्तप्रती
तिः पर्वते न दृष्टिति हुताशनानवच्छेदकत्वाभावे इत्यत्र शिखरावच्छिन्नपर्वते न दृष्टिन्त्याभावे वा हुताशनेऽवगाहते ननु

त

प

पर्वतएवहुताशनाभाववानित्यादिबुद्ध्यापत्तेरित्याह वृत्तेरिति वृत्तेः संबंधस्य वृत्तिमतः संबंधवतः तथाचयोपदवच्छे
देनयदीयत्संबंधाभाववानस्तदवच्छेदेनतस्यतत्संबंधावच्छिन्नाभाववत्त्वानीतिव्याख्यायाः पि शिखरावच्छेदेनसंयोगसं
बंधावच्छिन्नवह्न्यभाववत्त्वसिद्धेरितिभावः ननूक्तव्याप्तावप्रयोजकत्वमन्यथापि तुल्यन्यायेन यो यदीययत्संबन्धवानस्तत
त्संबन्धेनतद्वानितिव्याख्याऽपि कुंडादिसंयोगिनो बदरादेः संयोगेन कुंडादिमत्त्वापत्तेरित्युक्तावाह एवमिति भेदो विशेषः
यथा घटवत्यपि काले इदानीं तन्तौ न घट इति प्रतीत्या तन्त्ववच्छेदेनैतत्काले घटाभाववत्त्वात् घटवत्यपि कपाले घटनाश
दशायामिदानीमिह कपाले न घट इत्यनुभवादेतत्कालावच्छेदेन कपाले घटस्य [illegible] सामान्याभावः
सिद्ध इति न च इदानीं तन्तुषु न घट इत्यादिप्रतीतेरेतत्कालावच्छिन्नतन्तुष्वेव घटाभावो विषयो न तु तन्त्ववच्छेदेनैतत्काले
तथेति वाच्यम् तन्तुषु घटाभावस्याव्याप्यवृत्तित्वेनैतत्कालस्य तदवच्छेदकत्वावगाहने उक्तप्रतीतेर्भ्रमत्वापातात्
न च तथाप्येतत्कालवृत्तिघटस्याभाव एवं तन्तुभासतां नत्वेति वाच्यम् कालस्य प्रतियोगिकुक्षावग्रहेऽपि तादृशप्र
तीतेस्तन्त्ववच्छेदेन समये घटाभावावगाहित्वस्यानुभविकत्वादितिभावः तथापीति गुणवत्संयोगवद्धा

द्रव्यत्वाद्यवच्छिन्नाभावस्य समवायेनावृत्तेर्नित्यकालत्वात्कपालं घटवद्ध्वंसादित्यादावव्याप्तिवारणायेत्यर्थः तादिति अ
समानाधिकरणं न तु लाभ इत्यर्थः नोपादेयमिति येन रूपेण येन संबंधेन व्याप्यवृत्तिता तेन रूपेण तेन संबंधेन तस्य सा
ध्यतायां नोपादेयमित्यर्थः तेन द्रव्ये संयोगत्वेनाव्याप्यवृत्तेरपि संयोगस्य समवेतत्वेन साध्यतायां कालिकतयाऽव्या
प्यवृत्तेरपि द्रव्यत्वस्य समवायेन साध्यतायां येन प्रतियोगिव्यधिकरणमिति परंतु समवायेन व्याप्यवृत्तेरपि द्रव्य
त्वोऽऽस्तित्वादेः कालिकेन साध्यतायां तूपादेयमेव अव्याप्यवृत्तिसाध्यके संयोगाभाववान्गुणत्वादित्यादौ
घोरविदेवन देयं व्याप्यवृत्तिसाध्यके तु प्रयोजनाविरहात्सर्वत्रैव न देयमित्यावेदयितुं सर्वत्रैवेत्युक्तं साध्यभेदेने
ति साध्यताघटकसंबंधादेरप्युपलक्षणम् यत्रापि व्याप्यवृत्तिसाध्यकस्थले न तत्प्रवेशे सत्ता जातेरित्यादाव
व्याप्तिः स्यात् पवनवति स्पंदादौ समवायेन सत्ताभावस्यापि कालिकादिसंबंधेन वृत्तेः न चाभावे हेत्वधिकरण
वृत्तित्वस्य विशेषणतया विवक्षणान्नोक्तदोषस्तथा सत्यपि द्रव्यत्वशून्यं सत्त्वादित्यत्रातिव्याप्तेर्द्रव्यत्व
त्वरूपसाध्याभावस्य विशेषणतया वृत्तित्वाविरहाद्भिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यापि द्रव्य
त्वानतिरिक्तत्वात् न चाभावत्वप्रतीतेः प्रमात्वरत्नार्थमभावस्यातिरिक्ततयोक्तातिव्याप्तिवारणमिति वाच्यम्

अभावत्वं चेत्यात्रिमग्रंथेन भावाभावसाधारणस्याभावत्वस्यानिर्वचनाद्विरोधापत्तेः घटत्वाद्यभावस्य कालिकादिसं
बंधावच्छिन्नाभावत्वरूपादिसंबंधेन साध्ये गगनत्वादिहेतावव्याप्तेस्तथाप्यनुसरणाच्च विशेषणतया गगननिष्ठस्य
घटत्वाभावस्यैतादृशघटत्वाभावाभावाभावत्वकल्पनात्तावतैवाभावत्वप्रतीतेः प्रमाणत्वसंभवात् अतएव सा
ध्यताघटकसंबंधेन साध्यवत्त्वबुद्धेर्विषयविधया प्रतिबंधकतावच्छेदकीयः संबंधस्तेन संबंधेन हेतुमिमानाधि
करणेपमभावस्याप्रसिद्धिस्तुकावापि न निस्तारः तथाविधसंबंधेन हेतुसामानाधिकरण्याप्रसिद्ध्या गगनत्वा
दिहेतौ द्रव्यत्वाभाववज्जातित्वादित्याद्दोषाव्याप्तेः तथापि साध्यतावच्छेदकसंबंधेन प्रतियोगिमत्त्वबुद्धेर्विषय
तयाप्रतिबंधकतावच्छेदकीयः संबंधस्तेन संबंधेन हेत्वधिकरणवृत्तित्वमभावस्यादिवाहितामित्यदोषः तथाच
द्रव्यत्वाभाववज्जातित्वादित्याद्दौ विशेषणताविशेषणनातित्वाभाववत्त्वबुद्धेर्विषयविधया प्रतिबंधकताव
च्छेदकीयः स्वरूपसंबंधस्तेन जातित्वरूपाभावस्यासिद्धेरितिभावः वस्तुतु व्याप्यवृत्तित्वमत्र साध्यतावच्छेदकसंबंधेन
यत्त्वाधिकरणांतवृत्त्यभावस्य तादृशसंबंधावच्छिन्नप्रतियोगित्वाभावरूपं ग्रंथकृतोऽभिप्रेतं तादृशसाध्यकंच
समवायादिनाऽऽत्मत्वादेस्साध्यत्वे ज्ञानवत्त्वादिकं समवायेनाऽऽत्मत्ववृत्तिसमवायावच्छिन्नात्मत्वाभावस्य

गत्तु

जा·सि·
६

यार्कांघिप्रतियोगि
तावच्छ २

यद्यपि इह पर्वते नितंवे हुताशो नास्ति रेत्यादिप्रतीत्या वह्निसामान्याभावोपि केदारे पर्वते महानसेपि व
ह्निरूपप्रतियोगिव्यधिकरणो भवति तथापि एकधर्मावच्छिन्ना प्रतियोगिता एकत्र उपहिता प्रतियोगितावच्छेदकाभावः वह्न्यभावप्रति

केनापि संबंधेनावृत्तेस्तथात्वात्तादृशसाध्यकत्वे नोपादेयं सत्ता वा जातेरित्यादौ उत्तरपादेयमेव समवायेन सत्त्ववति स्पंदादौ
समवायावच्छिन्नसत्ताद्यभावस्यापि कालिकादिसंबंधेन वर्तमानतया सत्त्वादेर्निरुक्तव्याप्यवृत्तित्वाभावात् व्याप्यवृ
त्तिता घटकस्य त्वाधिकरणावृत्तित्वस्य संबंधसामान्येन प्रविष्टत्वादेतल्लाभार्थमेव सर्वथैव व्याप्यवृत्तीत्युक्तं त
त्स्वसंबंधविशेषानियंत्रितत्वात् व्यभिचारादिस्तु संबंधेन वृत्तिनियामकत्वेनात्मत्वादेरपि व्याप्यवृत्तित्वहानिरिति ध्येयं
सर्वथैव व्याप्यवृत्ति साध्यके प्रतियोगिवैयधिकरण्याघटितव्यभिचारिविशिष्टहेतुमत्तानिश्चयोत्तरानुमितौ नोपादेयं
प्रतियोग्यसमानाधिकरणांतत्वान्नतत्कलावच्छेदककोटौ नोपादेयं साध्यसाधनभेदेन कार्य्यकारणभेदेन व्या
प्तेः कारणतावच्छेदकधर्मभेदाद्भिन्नत्वादित्यपि वदंति एकधर्मावच्छिन्नप्रतियोगिताकाः प्रतियोगिव्यक्तीनां
भेदेपि ऐक्यमिति नव्यमते वह्निमान् धूमादित्यादौ वह्न्यादिसामान्याभावमादाय व्याप्त्यसंभवादतिव्याप्तिवारणप्र
योजनमाह तेनेति नव विशिष्टसत्त्वस्य व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्यप्रवेशाद् इदमयुक्तमिति वा
च्यम् जातौ विशिष्टसत्त्वव्यभिचारज्ञानदशायामपि विशिष्टसत्त्वधर्मिकजातिमत्त्वनिश्चयप्रतियोग्यधिकरणाभावाप्रति
योगित्वज्ञानाद्विशिष्टसत्त्वसाध्यकानुमित्यापत्तिप्रसंगस्येव प्रकृतेति प्रसंगपदार्थत्वाद्विशिष्टसत्त्वसाध्युक्तरीत्या

त

न

1410

राम
६

अत्राव्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्याव्याप्यवृत्तिसाध्यके सर्वत्र वा ज्ञातेतिस्याद्यैवतिव्याप्तिवारणाय प्रतियोगिव्यधिकरणहेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरेवं च उभयपरिष्कारयोरपि विशिष्टतावज्ञातेति यत्र नातिव्याप्तिरतो भू नत्विति

व्याप्यवृत्तित्वविरहाच्च विशिष्टस्यातिरिक्तत्वमतेन नातिव्याप्त्यसंभवादाह भू नत्विति प्रांवस्तु विशिष्टसत्त्वस्य व्याप्यवृ
त्तितया तत्साध्यके प्रतियोगिवैय्यधिकरण्याप्रवेशाद्भूतत्वेत्यादिसाध्यान्तरं तत्र च भूतत्वमात्मान्यत्वे सति विशेषगु
णवत्त्वं मूर्तत्वमवच्छिन्नपरिमाणवत्त्वं तदुभयं चाव्याप्यवृत्त्येव घटादावुत्पत्तिकालावच्छेदेन तदुभयाभावसत्त्वादि
त्याहुः नचेति वाच्यमित्यन्वयि तदभावः भूतत्वमूर्तत्वोभयाभावः सहजनत इति प्रतियोगितावच्छेदकावच्छिन्न
त्वाप्रवेशेपीत्यर्थः नन्भयत्वस्याविशिष्टत्वातिरिक्तत्वेपि सहजनतः प्रतियोगिव्यधिकरणस्याविशिष्टत्वावच्छिन्नाभाव
स्य प्रतियोगितावच्छेदकमेवोभयत्वमतो नातिव्याप्तिः विशिष्टत्वावच्छिन्नाभावस्योभयत्वावच्छिन्नाभावानतिरेकाद
तआह नवेति तदवच्छिन्नाभावः उभयत्वावच्छिन्नाभावः तदवच्छिन्नाभावात् वैशिष्ट्यावच्छिन्नाभावात् लिं
गव्यत्ययेनानातिरिक्तमित्यनुषज्यते तथा चातिरिक्त एवेति भावः नचान्यत्रोभयाभावस्य विशिष्टाभावातिरिक्तत्वे
पि प्रकृते भूतत्वविशिष्टमूर्तत्वाभावस्येव तदुभयत्वावच्छिन्नप्रतियोगिताकत्वं समनियताभावयोरैक्यवेनैकत्वा
दिति वाच्यम् तावतापि हेतुमतो यादृशप्रतियोगिताश्रयानधिकरणत्वं तादृशप्रतियोगितानवच्छेदकत्वस्य भू तत्व

मूर्तत्वोभयत्वेऽनया या दीति व्याप्तिता दवस्थ्यादिति भावः उभयत्वस्येति प्रत्यक्षासिद्धत्वादिति परेणान्वयः तथा चाविरुद्ध
योरिव समानाधिकरणयोरप्युभयत्वमतिरिक्तमेव विरुद्धाविरुद्धयोर्नीयोभयत्वप्रतीत्योः समानाकारत्वात् मूर्तत्वमू
र्तत्वयोर्विरुद्धत्वभ्रमदशायामप्युभयत्वस्य प्रत्ययाच्चेति भावः नवेति वाच्यमिति परेणान्वितम् तत्र मूर्तत्वमूर्तत्वो
भयवानित्यत्र आदिरेवेति तथा च तत्र तत्त्वतया तत्कारणप्रयासोऽनुचित इति भावः तथात्वेपीति उभयत्वाश्रयस्य
मूर्तत्वसमनियतत्वेपीत्यर्थः तथा च हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणावच्छेदेन साध्यतावच्छेदकावच्छिन्नव
त्त्वाभ्युपगम एव व्याप्तिरतो न तल्लक्षणमिति भावः वृत्तिमतीति व्याप्यभावस्य व्यभिचारानियतत्वात् व्यभिचारं ग्राहयति ने
ति अत्र वमूर्तत्वाश्रयमनसि नतु वृक्षादिभेदमादायाव्याप्तिः प्रतियोग्यसामानाधिकरण्यपदेनैव वारणाद
त्यंतपदं व्यर्थमत आह अत्यंतपदं चेति अत्यंताभावत्वनिरूपकं यत्प्रतियोगित्वं तदाश्रयवैय्यधिकरण्यवि
वक्षायाः फलमाह अन्यथेति तद्भेदस्य स्वसमानाधिकरणान्योन्याभावांतरभेदस्य स्वत्वरूपातिरिक्ततयेत्यस्य
अनवस्थाभयेनेत्यादेः दुर्लभत्वापत्तेरिति हेतुसमानाधिकरणाभावमात्रस्यैव स्वात्मकभेदप्रतियोगिपदभा
वांतरं तत्समानाधिकरणत्वादिति भावः अत्रोविद्वत्तणीयस्य साध्यतावच्छेदकसंबंधेन प्रतियोग्यसामाना

नै

न

राम
१

1413

धि[illegible]रणपरत्ववान्हिमान्धूमादित्यादौ घटाद्यभावेसत्त्वान्न सर्वत्राप्रसिद्धिः किंतु स्वरूपसंबंधेन साध्यतायामेवेतिस्व
पितुमप्रसिद्धिमपहायपदुर्लभत्वमुक्तं अत्यंताभावत्वानिरूपकप्रतियोगितानवच्छेदकत्वविवक्षायाः फलमाह
सर्वेषामिति भावभेदस्यातिरिक्ततास्वीकाराद्याह अभावसाध्यकेति तथाच घटभिन्नं पटत्वादित्यादौ पटत्वसमानाधि
करणनिरुक्तप्रतियोगिव्यधिकरणगोत्वाद्यभावस्य घटभेदाभिन्नत्वात्तादृशभेदस्य च गोत्वाभावरूपं तत्प्रतियोगि
तावच्छेदकमेवभेदत्वमित्यव्याप्तिरिति भावः संप्रदायस्त्वस्वरसस्तद्बीजंतूक्तविवक्षायामपिसर्वेषां हेतुसमानाधि
करणात्यंताभावानामत्यंताभावत्वानिरूपकेण एवं लक्षणादिघटितत्वाविशिष्टत्वाभावात्मकेन प्रतियोगिनासम
मंसामानाधिकरण्यादभावसाध्यकाव्याप्तिताद्वस्थ्यं यादृशप्रतियोगितावशिष्टस्यानाधिकरणं हेत्वधिकरणं
तादृशप्रतियोगितानवच्छेदकत्वप्रवेशेतुव्यर्थमेवात्यंतपदमितिध्येयम् गोध्वंसवत्त्वेनेति गवात्यंताभावस्य
गोध्वंसाविरोधित्वादित्याशयः नवदैशिकविशेषणतया यत्रो ध्वंसस्याधिकरणं तत्रैव गवात्यंताभावस्याविरोधात्
कालिकसंबंधेनगोध्वंसवत्यपि प्रलयेतदत्यंताभावसत्त्वेबाधकाभावान्नातिव्याप्तिरितिवाच्यम् प्राचांमते
भूतलादिदेशस्येवकालस्यापि दैशिकविशेषणतयाध्वंसवत्त्वात् अतएव त्वक्संयुक्तकाले दैशिकवि

त्वा

यदि तत्वान्यस्य वा ज्ञातिव्याप्तिर्दोषा न च कालिकसंबंधावच्छिन्नप्रतियोगिताकस्य ५

1414

ना॰ति॰
११

शेषस्तत्वा वायुनाशाधीन वायुस्पर्शनाशस्य सादीत्कारः शब्दानित्यतापां मिश्रैरुक्तः यद्यप्येवमपि नातिव्याप्ति
नित्येवर्तमान संभवः कालिकसंबंधावच्छिन्न गवात्यंताभावस्येव प्रलये कालिकसंबंधेन वर्तमानत्वात् ध्वंसादिमति देशिक
संबंधेनैवात्यंताभावस्यानभ्युपगमात् तथापि प्रतियोगिवैयधिकरण्याघटितस्य व्याप्यवृत्तिसाध्यकस्यैतीय
लक्षणस्यो व ध्वंसदैशीकाविशेषणतयाऽभावे हेतुसामानाधिकरण्यं देशीकसंबंधेन हेतुमान्निष्ठात्यंताभाव
काल स्याप्रसिद्ध्या तथापि नातिव्याप्तिरिति वाच्यम् इदं विशिष्टसत्तात्वादि विशिष्ट गोत्वाभावस्येव तादृशस्याप्रसिद्धत्वा
दिति भावः । मिश्रमतं निरस्यति माह सम्बंधाभावेति अत्यंताभावपदेनेत्यादिः तथा च प्रलये गोत्वाद्यवच्छिन्न
ध्वंससत्त्वादेव नातिव्याप्तिरिति भावः नन्वेवं गोध्वंसस्य गोत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेऽपि साध्यता
वच्छेदकसंबंधीभूतकालिकाविशेषणतावच्छिन्नप्रतियोगिताकत्वाविरहात्कुतस्तमादायातिव्याप्तिरत
आह इति वाच्यम् साध्यतावच्छेदकसंबंधाव्यसंबंधानवच्छिन्नस्यैव हेतुसमानाधिकरणाभावप्रतियोगित्व
स्य लक्षणे प्रवेशनीयत्वात्तस्य च ध्वंसप्रतियोगितासाधारण्यादिति भावः यदास्पंद [illegible]
[illegible] इति स्पंदवाति खंड प्रलये संगीतरीय चरणक

राम
११

तथाच प्रथमतः परमाणुक्रियाततो द्व्यणुकावयवविभागस्तदुत्तरं पूर्वदेशसंयोगनाशस्तदुत्तरं त्र्यसरेणुद्व्यणुककार्यद्रव्ये उत्तरदेशसंयोगस्तत्रैव द्व्यणुकना
शस्तदुत्तरं त्र्यवयवनाशाधीनत्र्यसरेणोर्नाशः स्पंदनाशश्च तदुत्तरमुत्तरदेशसंयोगनाशस्स एव महाप्रलयः १

त्वावच्छिन्नध्वंससाविरहादिति व्याप्तिः ननु महाप्रलयस्य वृत्तितयास्तां द्व्यणुकत्वावच्छिन्नध्वंससत्त्वान्नातिव्याप्तिस्तदानी
मपि चरमद्व्यणुकनाशानुगुणस्य परमाणुस्पंदस्य सत्त्वात्तत्कालोत्पन्नपरमाण्वन्तरसंयोगेन प्रलयपूर्वक्षण एव पश्चा
त्तस्य विनाश्यत्वात्तादृशपरमाण्वन्तरसंयोगस्य कार्य्यद्रव्यैरसहेतुत्वात्कार्य्यानित्यत्वमाश्रयनाशादेव तन्नाशसंभ
वादित्यत आह यदादृष्टमिति केचित्तु त्वन्मते द्व्यणुकस्याभावात्स्पंदस्य चरवे प्रलये वृत्तौ बलवत्तरप्रमाण
भावाद्यदादृष्टमित्याद्युक्तमित्याहुस्तच्चिंत्यम् नित्यज्ञानमादाय सद्धेतुत्ववारणाय नन्यामिति नित्यसुखाभिव्य
क्तेर्मोदित्वमते सद्धेतुत्वमाशंक्य साध्यांतरमाह दुःखं वेति ननु कार्य्यमात्रं प्रति अदृष्टस्य हेतुत्वात्प्रलये प्राक्तत्त्णोपि
तस्य सत्त्वं तथाच तदानीमेव दुःखत्वावच्छिन्नध्वंससत्त्वान्नातिव्याप्तिः दुःखादेः स्वसाक्षात्कारनाश्यतया तदानीमसंभवा
दुत्तरक्षणे साक्षात्कारासंभवादाविदितेप्रमाणाभावाच्चा किं च यावद्दुःखानां युगपत्प्रलयानभ्युपगमे व्रह्मांडांतरवर्तिदुः
खमादाय सद्धेतुरेवायमत आह यदा तदेति अत्र तदीयसुखाद्यादिसमवेतदीनामविरहाद्व्यभिचारः स्फुट एव
ध्वंसादि प्रतियोगितायां सामान्यधर्मावच्छिन्नत्वे मानाभावः गौर्नष्ट इत्यादि प्रतीते गोप्रतियोगिकध्वंसावगा
हितयाप्युपपत्तेर्व्यापाति श्चापादिप्रतिबंधकत्वाद्यनुरोधेनैव भेदात्यंताभावयोर्गोत्वावच्छिन्नप्रतियोगिताक

द्व्यणुकत्वादेरीति एवं प्रलये केषांचिद्ध्वंसस्य केषांचित्प्रागभावस्य सत्त्वेन द्व्यणुकत्वस्य प्रतियोगितानितिरिक्तवृत्तित्वेनानवच्छेदकत्वात् इत्यर्थः ननु द्व्यणु
कत्वादावच्छिन्नानधिकरणवृत्तित्वविशिष्टस्येव तद्ध्वंसस्य प्रतियोगितावच्छेदकं द्व्यणुकत्वमेवेह न्यूनवृत्तित्वमित्यत आह नहीति ॥

तज्ज्ञोमङ्गलमित्याकारक तज्ज्ञोत्वावच्छिन्नप्रकारतानिरूपितमङ्गलत्वावच्छिन्नविशेष्यताशालि बुद्धिप्रति तज्ज्ञोत्वावच्छिन्नप्रतियोगितासंबंधाव
च्छिन्न तज्ज्ञोत्वावच्छिन्नप्रकारतानिरूपितअभावत्वावच्छिन्नविशेष्यतावच्छिन्न अभावत्वावच्छिन्नत्वरूपसंबंधावच्छिन्नप्रकारतानिरूपित
मङ्गलत्वावच्छिन्नविशेष्यताशालिज्ञानं प्रतिबंधकम् २

त्वोपगमात् नचैवं तज्ज्ञोत्वावच्छिन्नवत्ताबुद्धिं प्रति तज्ज्ञोत्वावच्छिन्नाभाववत्तानिश्चयत्वेनाविरोधितया तज्ज्ञ
वात्यंताभावस्येव तज्ज्ञोध्वंसस्यापि तज्ज्ञोत्वावच्छिन्नप्रतियोगिताकत्वमावश्यकमितिवाच्यम् एकसंबंधे
न तज्ज्ञवात्यंताभावस्य ग्रहेऽपि संबंधांतरेण तज्ज्ञोत्वावच्छिन्नवत्ताबुद्ध्युत्पादात्संबंधविशेषमंतर्भाव्यैवात्यं
ताभावग्रहस्य प्रतिबंधकतया ध्वंसवत्ताग्रहस्याधारतया संभवात् ध्वंसत्वस्याभावत्वाघटितत्वेन तदवगा
हिबुद्धेरत्यंताभावस्याधारतया योगाद्वेत्याशयेनाह मतेऽपीति ननु प्रतियोगिमत्तद्देशेऽस्यासिद्धं तत्राप्यत्यं
ताभावानुपगमादत आह अन्यस्येति तस्येति गोत्वादिनागवात्यंताभावस्येत्यर्थः तेन गगनाद्यभा
वस्तो विशिष्ट गोत्वाद्यभावस्य वा प्रलये तिलेऽपि न क्षतिः कालमात्रेति अत्र गवात्यंताभावस्य दे
शीकविशेषणतया कालमात्रावृत्तित्वं प्राचीनैः स्वीक्रियते एवं सदातनत्वव्यवहारस्य कालिकविशेषणत
येव संभवादिति तु विभावनीयम् ननु प्रतियोगिविशिष्टेऽपि काले तदत्यंताभावसत्त्वे गवाद्यवच्छेदेने
दानीं गोत्वं नास्तीत्यपि प्रतीतिः कथं न स्यादत आह इयांस्त्वीति एकस्य प्रतियोगिमतः कालस्य देश
भेदः प्रतियोग्यनाधारदेशः तत्र सत्त्वम् अत्यंताभाववत्त्वम् अपरस्येति ध्वंसादिमतः कालस्येत्यर्थः

स्वरूपावच्छिन्नगोमिति निरवच्छिन्नामित्यर्थः तथात्वमिति पूर्वेणान्वयः नन्वेवमिदानीमश्वेन गोत्वमित्यादिप्रती
तेः काल [illegible] इतित थाऽश्व इतितया च गोत्वाभावावगाहित्वे वोपपत्तौ देशस्य कालवृत्तितावच्छेदकत्वे मानना
भाव इत्यत आह देश इति इवार्थः सादृश्यं तच्चानुभूयमानत्वं तथा चानुभव एव देशस्य कालवृत्तितावच्छे
दकत्वे मानम् अन्यथा गृहे नेदानीं गौरितिप्रत्ययबलात् गृहादिदेशस्य गवात्यन्ताभाववृत्तायामपि कालेना
वच्छेदकः स्यात् तत्रापि गवाभावे गृहवृत्तित्वैतत्कालवृत्तित्वोभयावगाहिता या स्तु वचनत्वादितिभावः नन्वे
वमपि प्रतियोगिवैयधिकरण्यघटितस्य व्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्य गोमान्गोत्वादित्यादाव
तिव्याप्तिरेव गवाद्यभावस्यैतद्दृष्टिकाले प्रतियोगिसमानाधिकरणतया लक्षणघटकत्वादाह तच्चान्य इति
गवादिशून्ये चेत्यर्थः तथा च यत्किंचिद्देशत्वाधिकरणावच्छेदेन प्रतियोगिवैयधिकरण्यपदग्रेवाव्यंतस्य गवा
द्यभावेपि सत्वान्नातिव्याप्तिरितिभावः नचेति वाच्यमित्यन्वयः संसर्गाभावविशेष इति सदातनसंसर्गाभा
व इत्यर्थ संसर्गेति स्वप्रतियोगितावच्छेदकसंसर्गेण यः प्रतियोग्यारोपस्तज्जन्यप्रतीतिविषयो भावस्तत्त्व
मित्यर्थः संसर्गस्तु तादात्म्यभिन्नो ग्राह्यस्तेन भेदव्युदासः प्रागभावध्वंसयोरुत्तरकालपूर्वकालावेव प्र

तानिश्चान्यथासिद्ध्यनिरूपकत्वे सति ह्वाव्यवहितशकृत्कालावच्छेदेन वर्तमानात्यंताभावप्रतियोगितानवच्छेदकधर्मानवच्छिन्नसामानाधिकरण्यपैत्रुन्यत्वे तत्पदेन दंडादेर्ग्रहणम् ३

स्वजन्यध्वमित्यन्यकपालध्वंसेवंधेन हि द्वंद्वस्याभावः ।

तद्वदन्यारात्तिहितृत्वानियमह्यात आदि ... चक्रकादिप्रसंगः ४ साध्यं प्रतियोग्यारोपः २

व

मनस्त्ववदगलातः
त्यादौ ६

तियोगितावच्छेदकसंबंधाद्वेति ताभ्यामेव संबंधाभ्यां प्रतियोग्यारोपः प्रागभावध्वंसयोः प्रत्यक्षे हेतुरतत्तयोर्नि
ष्याधिरिति प्राचामाशयः घटितमिति तथा च चक्रकादिप्रसंग इति भावः तच्च मन्यत्वेऽनियमांतरस्य साध्यसंबंधि
तावच्छेदकरूपत्वादिस्वरूपस्येष्टत्वादिति केचित् वस्तुतो नियमांतरस्य संसर्गत्वघटितनियमस्य संसर्गत्वावशि
ष्टधीजनकत्वनियमघटितामिति क्रमेण संसर्गत्वमप्यवशेषणीति भावः नन्वभावबुद्धौ प्रतियोग्यारोपस्य हे
तुत्वे मान्याभावादुक्तसंसर्गाभावस्य प्रत्यक्षत्वासंभवः कथं चेदभावलौकिकप्रत्यक्षं प्रत्यारोपस्य
हेतुतास्वीकारे प्यतींद्रियसाध्यकेऽनुमितावारोपानुपस्थितिर्न हेतुसमानाधिकरणसाध्याभावस्यातींद्रिय
तयानिरुक्तसंसर्गाभावत्वविरहादत आह वस्तुतो वेति भेदभिन्नाभावत्वं संसर्गाभावत्वं सदातनत्ववि
शिष्टं चतदेवात्यंताभावत्वं भेदत्वं नु संसर्गविधया तादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वमनुयोगिता
विशेषो वेत्याशयः यत्तु भेदत्वादिवत्संसर्गाभावत्वमप्यखंडोपाधिरिति तत्तुच्छं भेदत्वादिवदखंडस्य संस
र्गाभावत्वस्यानुभवेनाविषयीकरणात् त्रिकव्यवहारस्य भेदभिन्नाभावत्वादिनाप्युपपत्तेः वस्तुगति
मनुरुध्याह अनुपदमिति विवेचयिष्यत इति तदपि विनोपादेयानित्यादिग्रंथे नातिशेषः साध्यतावच्छेदक

1419

संबंधेन प्रतियोगी वैय्यधिकरण्ये घटितलक्षणमभिप्रेत्याह प्रयोजनाविरहइति धूमादिसमानाधिकरणस्य व
न्ह्यादिभेदस्य प्रतियोगिसमानाधिकरणत्वादेवतमादाय नाव्याप्तिविरहादितिभावः व्याप्यवृत्ति साध्यकस्थलीय
लक्षणस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताघटितत्वात्तदभिप्रेत्याह अव्याप्तिरित्येवेति तादात्म्येनग
वादेः साध्यतायां तत्संबंधावच्छिन्नात्यंताभावाप्रसिध्यासाध्याभाववत्वादावव्याप्तिरित्यर्थः इदमप्यभावइति र
भावोनाधिकरणत्वरूपोनवाधर्म्मीत्यंताभावएवधर्म्मिणोभेदइतिमतेन अन्यथापटादिभेदरूपस्यघट
भेदत्वात्यंताभावस्यपटत्वात्यंताभावस्यवाघटनिष्ठप्रतियोगितायाएवतादात्म्यसंबंधावच्छिन्नत्वाद
व्याप्तिविरहादितिध्येयम् नतुविषयतायारत्यानियामकत्वमतेज्ञानाभावस्यगगनादौसहजतएवप्रति
योगिव्याधिकरणत्वान्नातिव्याप्तिरतआह विशेषगुणेति अत्रव्यभिचाररूपकः कालोदिक्चतत्रच
कालेकालिकसंबंधेनदिशिचदैशिकसंबंधेनविशेषगुणस्यसत्वात्तदभावोनप्रतियोगिव्याधिकर
णइतिभवत्यतिव्याप्तिः विशेषपदंव्यभिचारित्वरतापि इच्छात्वादितुक्तो संबंधसामान्येनाविशेषगुण
स्यमनस्यसत्वान्नातिव्याप्तिसंभवः कालोपाधित्ववाद्दिगुपाधित्वस्यापिमनस्यसत्वादव्यावर्तकत्वात्
महाप्रलयेदिग्देशव्यवहारजनकत्वात्

अन्यथा मनसः कालोपाधित्वमपि स्यादत उक्तं मनोन्येति यत्तु मूर्तमात्रस्यादिगुपाधित्वं महादिग्वृत्तितायामवच्छे
दकत्वं न त्वधिकरणत्वमिति प्राचां मते संबंधसामान्येनैव तत्स्यादिशेषगुणानधिकरणत्वान्मनोन्यपदमि
ति तन्मन्दम् एवमप्यवच्छेदकतासंबंधेनैव मनसोविशेषगुणवत्तायास्संभवेन मनोन्यपदवैयर्थ्यापत्तेः
ननु स्वमते दिक्कालयोरीश्वरातिरिक्तत्वादत्र व्याप्तिरेवेत्यत आह जातीति न च जातेरीश्वरति
नया तत्साध्यकेऽप्रतिवैयधिकरण्यप्रवेशादेव नातिव्याप्तिरिति वाच्यम् समवायेनाव्यापकत्वग्रह
दशायामपि संबंधसामान्येन प्रतियोगिवैयधिकरण्यघटितव्यापकत्वज्ञानात् समवायेन जात्यनुमि
त्यापत्तेरेवमकृतेऽतिव्याप्तिपदार्थत्वाज्जात्यादेरपि आगुरुक व्याप्यवृत्तित्वविरहाच्च अतिव्याप्तिर्योज
यति साध्यवत्त्वेति विशेषणतादिकं तावत्कालिकीच एकार्थेति समवायस्यापि स्वात्मक एव स्वरू
पसंबंध इति न आपि जात्येकार्थसमवायेनास्या साध्यः भावत्वात्समवेतत्वादि स्यापि केचित् प्रतियोगि
तेति न च स्वाव सामान्याभावस्य तादृशेन समवायसंबंधेन पटादौ प्रतियोगिव्यधिकरणत्वान्नातिव्याप्तिः
न च तादृशयात्किंचित्संबंधेन प्रतियोगितासामानाधिकरण्यात्तोबोत्कोवार्क्ति सामानान्याभावस्यापि

धूमवत्पर्वताच्छेदेन महानसीयसंयोगेन प्रतियोग्यसमानाधिकरणत्वाद्वह्निमान्धूमादित्यादावव्या
प्तिः स्वप्रतियोगितावच्छेदकसंबंधसामान्येन तथात्वोक्तौ च जातिमान्जातित्वादित्यादावतिव्याप्तिः
समवायेन जात्यभावस्यैव तादात्म्येन जातिमद्भेदत्वात् तस्य च स्वप्रतियोगितावच्छेदकतादात्म्यसंबंधेन
यज्जातिसंबंधितद्भिन्नत्वेन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम् स्वप्रतियोगित्वं यादृशसं
बंधावच्छिन्नं तादृशसंबंधेन यत्प्रतियोगिसंबंधितद्भिन्नत्वाभावस्योक्तत्वात् संयोगसामान्यावच्छि
न्नवन्ह्यभावप्रतियोगितायां महानसीयसंयोगत्वादिविशिष्टानवच्छेद्यतया वन्ह्यभावस्य पर्वता
दौ महानसीयसंयोगसंबंधेन प्रतियोगिसामानाधिकरण्यविरहेणाव्याप्त्यभावादिति चेयम् ननु
समवायावच्छिन्नवन्ह्यभावमादाय धूमादावव्याप्तिवारणाय मयैव साध्यतावच्छेदकसंबंधावच्छि
न्नप्रतियोगित्वं निवेशनीयं तथा च कपिसंयोगवत्तत्तादात्म्येन साध्यतायामेतद्वृत्त्वादावव्या
प्तिर्भेदमात्रस्यैव स्वप्रतियोगितावच्छेदकतादात्म्यसंबंधेन प्रतियोग्यधिकरणप्रतिसिद्धेरत आह
संबंधि चेति न च तादात्म्येन वस्तुमात्रस्यैवाव्याप्यवृत्तित्वात्तादृशसंबंधेन साध्यतायां प्रतियो

गिवैय्यधिकरण्याप्रवेशादिदमयुक्तमितीवाच्यम् मूलावच्छेदेन कपिसंयोगवद्भेदस्य वृत्तौ दोषत्वयमंगीका
रात्तादात्म्येन कपिसंयोगवतोऽप्यव्याप्यवृत्तित्वात् न चैवं प्रतियोग्यनाधिकरणहेतुमन्निष्ठाभावेत्यादिम
निष्कर्षेप्यप्रतीकारः प्रतियोगितावच्छेदकसंबंधेन यत्प्रतियोगिसंबंधिनस्तत्तज्जातित्वावच्छिन्नभे
दकूटविशिष्टहेतुमद्वृत्तित्वस्यैव तत्र वक्तव्यत्वात् वस्तुतस्तु तादात्म्यसंबंधेनापि न कस्यापि वृत्तिमत्तायु
क्ताव्याप्यवृत्तित्वमतो यथाश्रुतमेव सम्यक् केचित्तु प्रतियोग्यनाधिकरणहेतुमन्निष्ठाभावप्र
तियोगितायां यद्धर्मावच्छिन्नत्व यत्संबंधावच्छिन्नत्वोभयाभाव इत्यादि वक्ष्यमाणनिष्कर्षस्य तादा
त्म्येन साध्यतायां व्याप्तिचारित्वापत्तिव्याप्तिरतः प्रतियोग्यनाधिकरणत्वं परित्यज्य प्रतियोग्यसंबंधित्वं चावश्यं तत्रानिवेश्यमि
त्याशयेन संबंधित्वमुक्तमित्याहुः ननु कपिसंयोगाभावस्यापि गुणादौ प्रतियोग्यसमानाधिकरणत्वात्कपिसंयो
ग्यन्यत्वादित्यादावव्याप्तिरत आह तद्विशिष्टस्येति प्रतियोगितासामानाधिकरण्याभावविशिष्टस्येत्यर्थः तथा च हे
तुमति वृत्तादौ संयोगवद्वृत्तित्वाभावविशिष्टः संयोगाभावो नास्तीति नाव्याप्तिः विशिष्टनिरूपिताधेयत्वमप्यतिरिक्त
मित्याशयेनेदमप्यघात तद्विशिष्टस्येत्यस्य हेत्वाधिकरणेऽन्वयः तत्र च षष्ठ्यर्थोऽधिकरणत्वं तेन प्रतियोगिसा

मानाधिकरण्याभावविशिष्टस्याधिकरणं यद्देन्नाधिकरणं तद्वृत्तित्वमभावे वाच्यमित्यर्थः अत्र यद्यपि प्रतियोग्यसमाना
धिकरणत्वं हेतुविशेषणीकृत्य प्रतियोग्यसामानाधिकरण्यविशिष्टो यो हेतुस्तदधिकरणवृत्त्यभावस्य प्रतियोगितानवच्छेद
कत्वं वाच्यम् तावतैव संयोगी सत्त्वादित्यादौ नाव्याप्तिसंभावना वृत्त्यस्य प्रतियोगिवैयधिकरण्यावच्छिन्नहेत्वधिकरण
त्वाभावात् तथापि कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण इत्यस्त्रेमम् लाघवरसेन हेतुसमानाधिकरणाभावस्यै
व विशेषणं प्रतियोग्यसमानाधिकरणत्वदलमत एतावान्प्रयास इत्यवधेयम् ननु भेदस्य व्याप्यवृत्तितया प्रतियोगिसमाना
भिन्न
धिकरणत्वोक्तौ च प्रागुक्ताव्याप्तिवारणासंभवे तद्विशिष्टस्येत्यादिकं विफलमत आह तद्वृत्तीति प्रतियोगिमद्वृत्तिभिन्न
त्वमित्यर्थः अत्रेति अस्वरसादित्यन्वयः न तदभाववत्त्वामीति तथा च संयोगी सत्त्वादित्यादावतिव्याप्तिरिति भावः ननु सं
योगाभावे गुणेन संयोगसामानाधिकरण्यमिति प्रतीतिबलादेव गुणावच्छेदेन संयोगाभावे प्रतियोगिसामानाधिकरण्या
भावसत्त्वान्नातिव्याप्तिरत आह प्रतीतेरिति उक्तप्रतीतिस्तु संयोगाभावनिष्ठस्य संयोगसामानाधिकरण्यावच्छेदकत्वा
स्था
भावमेव गुणादौ संयोगानधिकरणाभिन्नगुणवृत्तित्वमेव वा संयोगाभावादाववगाहत इति भावः यद्यपीति मूलकारः
तच्च तदपि हेत्वधिकरण इति तेन कापि संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकीभूतगुणाद्यवच्छि

न्नत्वेपि कपिसंयोगेन तत्वादित्यादौनाव्याप्तिरितिभावः ननु हेत्वधिकरणे प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वं प्र
तियोगिसामानाधिकरण्यानवच्छेदकीभूतहेत्वधिकरणवृत्तित्वं तच्च व्याप्यवृत्तेरवच्छेदकत्वाविरहादप्रसिद्धं गुरु
तरं चेत्यत आह प्रतियोग्यनधिकरणेत्यादि कस्यचिदिति अनधिकरणमितिपरेणान्वयः तत्तद्व्यक्त्यन्तरेति प्रति
योगिव्यक्त्यन्तरेत्यर्थः द्रव्यमतेत्संयोगसामान्याभावस्य केवलान्वयित्वात्तत्साध्यकं सत्त्वादिकं सद्धेतुरेवेत्यतस्साध्यां
तरमाह द्रव्यत्वाभावेति यद्यपि द्रव्यत्वाभावस्याव्याप्यवृत्तित्वात्तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशादि
दमसंगतं न चात्र कालिकसंबंधावच्छिन्नद्रव्यत्वाभावस्साध्यस्तस्य च गुणाद्यवच्छेदेन कालेनावाव्याप्यवृत्तिरिति
वाच्यम् तथा सति तस्य केवलान्वयित्वात्तत्साध्यकसत्त्वादेस्सद्धेतुत्वेन तत्रातिव्याप्तिरूपन्यासस्यानौचित्या
त्तथापि सत्त्वहेतौ द्रव्यत्वाभावस्य व्यभिचारधीदशायामपि प्रतियोगिसामान्यानधिकरणसत्त्ववन्निष्ठाभावप्र
तियोगितानवच्छेदकं द्रव्यत्वाभावत्वमित्याकारकव्यापकत्वज्ञानादनुमित्यापत्तिरेवातिव्याप्तिशब्दार्थः व
स्तुतो द्रव्यत्वाभावस्यापि न प्रागुक्ताव्याप्यवृत्तित्वाभिमतिर्येयमर्थ प्रथमसाध्येऽतिव्याप्तिं ग्राह यातीति साध्याभाव
वतस्तोति तत्प्रतियोगीति तस्य संयोगात्मकसाध्याभावस्य यः प्रतियोगी संयोगादिस्तदभाववत्त्वमित्यर्थः ॥

प्रतियोगिव्यधिकरण
त्वं ताभावप्रतियोगि
त्वकेवलान्वयित्वं

राम

द्वितीयेऽतिव्याप्तिं योजयति नित्यत्वादीति नित्यत्वादिविशिष्टं यद् द्रव्यत्वं तदभावात्मको यः साध्याभावस्य प्रतियोगी त
दधिकरणत्वात्साध्याभाववतो द्रव्यस्येति पूर्वेणान्वयः नन्वु विशिष्टद्रव्यत्वाभावो न द्रव्यत्वस्वरूपस्य साध्याभा
वस्य प्रतियोगी किं तु विशिष्टद्रव्यत्वस्यैवेति द्रव्यत्वं प्रतियोगिव्याधिकरणमेवेत्यत आह त्वाभावेति त्वं नित्य
त्वविशिष्टद्रव्यत्वम् न चानित्यत्वविशिष्टद्रव्यत्वाभावस्याभावो नानित्यत्वादिविशिष्टद्रव्यत्वस्वरूपो विशिष्टस्यान
तिरिक्ततया जन्यद्रव्येऽपि नित्यवृत्तित्वाविशिष्टद्रव्यत्वाभावो नास्तीति प्रत्ययप्रसंगात् किं तु नित्यैकत्वादिकमेवे
ति नातिव्याप्तिरिति वाच्यम् विशिष्टाधिकरणतायाः प्रतीतिनियामकतयैवातिप्रसंगभंगे द्रव्यत्वमपेक्ष्यानित्यानंत
संख्यापरिमाणादौ तादृशाभावत्व कस्यानायां गौरवात्त्वाभावाभावस्यैव प्रतियोगित्वामीतीति सिद्धांतप्रवादाच्च
नन्वेवमपि नित्यवृत्तित्वाभावस्यैव त्वाश्रय तत्तद्व्यक्तिवृत्तित्वविशिष्टं यत्त्वं तदभावात्मकत्वप्रतियोगिना सहस

२ मानाधिकरणत्वात्प्रतियोगिव्याधिकरणाभावाप्रसिद्ध्यैव नातिव्याप्तिरेकव्यक्तिमात्रवृत्तीनां गुणाद्यात्मकाभा
वानामपि पूर्वलक्षणवृत्तित्वाविशिष्टस्य स्वस्य यो भावस्तादृशप्रतियोगिना सार्द्धसामानाधिकरण्यात् न चैवं द्यमा
णत्वं दृशः प्रसिद्धा गगनाद्यभाव एव प्रतियोगिव्यधिकरणस्तस्यापि नित्यवृत्तित्वादिविशेष्यो गगनाभावस्त

स्वपदेन घटवृत्तित्वविशिष्टघटाभावः घटे घटो नास्तीति प्रतीतिसाक्षिकः तस्य योऽभावः स पूर्वं तेन तेन स्व योऽभावः स अ यमाभावरूपः
एवं च विशिष्टशून्यतानतिरिक्ततेति न्यायेन घटवृत्तित्वविशिष्टघटाभावः शुद्धघटाभावस्वरूप एक एव तत्प्रतियोगिताघटकी॰
नाघटाभावो स्वपदवृत्तित्वविशिष्टघटाभावाभावरूपप्रतियोगिसमानाधिकरण एव एवं समन्वयापि ४

दभावात्मकेन स्वप्रतियोगिना समं समानाधिकरणत्वात् गगनाभावस्यैव संयोगादिसंबंधेनाभावत्वावच्छिन्नाभावत्तयाखंड
शः प्रसिद्धापि तस्य प्रतियोगिव्यधिकरणत्वासंभवाच्च एतेन नित्यत्वविशिष्टगगनाद्यभावस्य यो भावस्तदभावत्वं न गग
नाद्यभावस्य तस्य केवलान्वयित्वापत्तेरन्यथा नित्यत्वविशिष्टस्य गगनाद्यभावस्याभावो नास्तीति प्रत्ययप्रसंगात् किं
तु नित्यत्वादेरेव तथात्वमित्युक्तावपि न निस्तारः इति चेदत्र नव्याः यथा श्रुते प्रागुक्तक्रमेण प्रतियोगिव्यधिकरणाभाव
स्याप्रसिध्या वन्हिमान्धूमादित्यादौ सर्वथासंभवः स्यादतः यत्किंचित्प्रतियोगित्वं यादृशसंबंधावच्छिन्नं तादृशसंबं
धेन स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यानाधिकरणं यत्साधनाधिकरणं तन्निष्ठाभावस्य साध्यतावच्छेदक
संबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वमेव लक्षणे प्रवेशनीयम् तथा च सद्धेतुस्थले इदं द्रव्यत्वाभाववान्सत्वा
दित्यत्रापि संयोगेन घटाभावः प्रतियोगिव्यधिकरणस्तदीयं हि घटनिष्ठप्रतियोगित्वं यादृशेन संयोगसंबंधेनावच्छि
न्नं तादृशेन संयोगसंबंधेन साधनवतो द्रव्यस्य तदीयप्रतियोगितावच्छेदकावच्छिन्नसामान्यानाधिकरणत्व
मक्षतमेव न चैवमपि तदीयसाध्यतावच्छेदकीभूतस्वरूपसंबंधावच्छिन्नप्रतियोगित्वस्याप्रसिध्या न दोषसंग
तिः पूर्वतनगगनत्वादिविशिष्टस्य घटाद्यभावस्याभावरूपतत्प्रसिद्धेरिति प्राहुः स्वावच्छेदकसंबंधावच्छिन्न

स्वप्रतियोगिता १

1427

प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामान्यानधिकरणहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्संबंधावच्छि
न्नत्व यद्धर्मावच्छिन्नत्वोभयाभावस्तादृशमलं तल्लक्षणाभिप्रायेणेदं संयोगेन घटाद्यभावस्यैव प्रतियोगिवैयधिकरण्यसौलभ्या
दित्यपि वदंति प्राचां मते संयोगसामान्याभावसाध्यकगुणत्वहेतुर्दीधितिकृतोऽनेन कपिसंयोगसामान्याभावऽवृक्षः वृक्षादावुत्पत्ति
कालावच्छेदेन गुणसामान्याभावसत्त्वाद्वृक्षत्वादिकं परित्यज्यात्मत्वं हेतुरुक्तः यद्यपि वृक्षादेः स्वसमवेतकपिसंयोगप्र
व तियोगिकस्समवेतसामान्याभावस्य द्रव्यमात्र समवेताभावस्य चानधिकरणत्वात् वृक्षत्वादेरपि हेतुतायामव्याप्तिस्स
म्भवत्येव तथापि सत्ताद्रव्यत्वयोरेवसमवेताभावद्रव्यमात्रसमवेताभावयोरभाववत्त्वं लाघवान्न कपिसंयोगाद्यात्मकसम
वेतमात्रस्य तथात्वं गौरवादित्याशयः गुणसामान्याभावस्य संयोगप्रतियोगित्वमाविष्कर्तुं गुणानामित्युक्तं तत्प्रतियो
गितेति कपिसंयोगीयप्रतियोगितावच्छेदकेत्यर्थः न च गुणसामान्याभावस्याभावो द्रव्यत्वमेव लाघवान्न तु गुणगौ
रवादतस्संयोगप्रतियोगित्वं न गुणसामान्याभावस्येति वाच्यम् घटादावुत्पत्तिदशायां गुणसामान्याभावस्यैवसत्त्वेन द्र
व्यत्वस्य तदभावत्वासंभवादभावाभावस्य प्रतियोगित्वनियमाच्चेति भावः प्राद्दशो ति तथा च गुणसामान्याभाव
निष्ठप्रतियोगितावच्छेदकं यद्गुणसामान्याभावत्वं हेतुमत्तद्वच्छिन्नानधिकरणत्वेऽपि कपिसंयोगाभावत्वस्य

तादृशप्रतियोगितानवच्छेदकाव्याप्तादृप्येण साध्यतायामभावहेतौ नाव्याप्तिः इंद्यत्वाभाववान्सत्वादित्यादौ तु
इद्यत्वाभावत्वावच्छिन्नानधिकरणं य इत्येतु करणं तान्निशाभावस्य तादृशप्रतियोगितावच्छेदकमेव इद्यत्वा
भाववत्त्वमतो नातिव्याप्तिरिति भावः नन्वेवं वह्निमान्धूमादित्यादौ तत्र वह्निसंयोगसंबंधेन साध्यतायामव्या
प्तिः तत्संबंधावच्छिन्नघटाद्यभावप्रतियोगिसमवायेन संबंधेन प्रतियोग्यधिकरणप्रसिद्धेरिति ति वाच्यं प्रतियो
गितावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपितत्वस्य संबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाधि
करणतासामान्याभाववत्वं हेतुमत्त्वेन संबंधेन तादृशप्रतियोगितावच्छेदकत्वस्य विवक्षितत्वात् घटत्वावच्छि
न्नाधिकरणतासामान्यस्यैव तत्तद्वह्निनिरूपितसंयोगसंबंधावच्छिन्नाधिकरणतानिरूपितत्वस्वरूपसंबं
धेनाभावस्य हेतुमत्ति सत्त्वेन तादृशसंबंधेन घटाभावस्यैव प्रतियोगिव्यधिकरणत्वात् तादृशाभाववत्वं
चानिरवच्छिन्नाधिकरणतायेवाव्यभमतः कादिसंयोगाधिकरणत्वाभावस्य रूपरत्वेपि नाव्याप्तिः
अत्र च प्रतियोगितावच्छेदकधर्मेणावच्छिन्नत्वं साध्यतावच्छेदकतापटकसंबंधेन ग्राह्यम् तेना
पः पिंडस्यापि कालिकसंबंधेन य धूम त्वादिशिरसि धूमात्मादिनस्य संयोगेनाधिकरणत्वेपि धूमवा

श

न

त्वह्नेरित्यादौ नातिव्याप्तिः प्रतियोगितावच्छेदकताघटकसंबंधेन तद्वाच्छिन्नत्वनिवेशे तु प्रतियोगितानवच्छे
दकामित्यत्रावच्छेदकत्वं साध्यतावच्छेदकताघटकसंबंधेन ग्राह्यम् अन्यथा विषयतासंबंधेन रूपत्वाव
च्छिन्नस्य घटत्वव्याप्यादौ समवायेनाभावस्य सत्त्वाद्रूपवान् घटत्वादित्यादावव्याप्तिप्रसंगात् वस्तुतस्साध्यता
वच्छेदकताघटकसंबंधावच्छिन्नं यत्प्रतियोगितावच्छेदकत्वं तन्निरूपकत्वरूपसंबंधेनैव निरुक्तप्रतियोगिताव
च्छेदकत्वस्याभावः साध्यतावच्छेदकधर्मे विवक्षणीयः तेन वह्निमान् धूमादित्यादौ यत्र वह्नित्वादिनिरूपितसम
वायादिसंबंधेन वह्नित्वादेस्साध्यतावच्छेदत्वं तत्र तादृशसंबंधावच्छिन्नस्य प्रतियोगिव्यधिकरणहेतुम
न्निष्ठाभावप्रतियोगितावच्छेदकत्वस्याप्रसिद्ध्यापि न क्षतिरिति ध्येयम् अत्र तादृशप्रतियोगितावच्छेदक
धर्मे तादृशप्रतियोगिताश्रयापि करणीभूतयद्व्यक्तिनिष्ठाधिकरणतानवच्छेदकत्वस्याधिकरणताव
च्छेदकत्वस्य च द्वयोर्व्यतिरेकस्तत्तद्व्यक्तिभेदकूटवत्त्वमेव तादृशप्रतियोगितावच्छेदकावच्छिन्नानधि
करणत्वमित्यस्यार्थो विवक्षणीयः तेन धूमवान् वह्नेरित्यादिप्रतीतेरवंल्कुमाभिः पर्वतत्वादितत्तद्धर्मीविशिष्टधू
मत्वावच्छिन्नाधिकरणताव्यक्तिभिरेवोपपत्तौ धूमत्वावत्त्वेऽधर्मावच्छिन्नाधिकरणतायामानाभा
न धूमादिसामान्याभावप्रतियोगितावच्छेदकं यद्धूमत्वादिकं तदवच्छिन्नाधिकरणत्वाप्रसिद्ध्यापि

२५

1430

जा॰
१९

धर्मवान्वस्तेरीतिन्यादौ नास्ति व्याप्तिः धूमादिकारणतत्त्वात्किं भेदकूटवत्त्वमादायैव धूमसामान्याभावस्य प्रतियो
गिताव च्छेदकावच्छिन्नत्वे व्यधिकरणस्य संभवादिति [illegible] प्रतियोगित्वं नातिरिक्तं पदार्थः प्रतियो
गित्वादिकं तु स्वरूपसंबंधविशेषः [illegible] विरोधात् किं तु स्वरूपसंबंधविशेषः [illegible] पदि प्रतियोगि
स्वरूपस्तदावच्छिन्नमात्रमादित्यादौ [illegible] संभवः पटादिस्वरूपस्यैकस्यैव पटाद्यभावप्रतियोगित्वस्य
पटत्वसमवेतत्वे [illegible] पटाद्यवच्छिन्नतया [illegible] रावच्छेदकीभूत [illegible] वच्छिन्नस्य हेतुमतिसत्वा
त्प्रतियोगी व्यधिकरणाभावाप्रसिद्धेः [illegible] प्रतियोगिताव च्छेदकस्वरूपमेव प्रतियोगित्वमित्यदो
षः समवायेन [illegible] धूमादावपि [illegible] वच्छिन्नवन्ह्यभावस्य वान्हित्वस्वरूपं
यत्प्रतियोगित्वं समवायसंयोगसंबंधावच्छेदकसंबंधपन्याश्चावच्छेदकीभूततादृशसंबंधेन सा
धनवतः प्रतियोग्यनधिकरणत्वाभावात् [illegible] प्रतियोगितावच्छेदकीभूतत्यात्किंचित्संबंधेन प्रतियोग्य
नाधिकरणत्वेन [illegible] संयोगेन वान्हिसाध्यके धूमादावव्याप्तिस्तम्भवायावच्छिन्नवन्ह्यभा
व [illegible] स्यैव समवायेन प्रतियोगी व्यधिकरणस्य वान्हित्व [illegible] स्वरूपं यत्प्रतियोगित्वं तस्यैव संयोगे
नावच्छिन्नत्वादिति चेद [illegible] प्रतियोगी स्वरूपमवच्छेदकस्वरूपं यापत्प्रतियोगित्वं तदपि

राम
१९

कस्यचिदभावस्य केनचिद्देवधर्मेणसंबंधेन वा वाछिन्नत्वव्यवहाराद्वलान्नतु सर्वेणाधर्मेणसंबंधे
नवासमवायावाछिन्नवन्ह्यभावप्रतियोगीत्वं संयोगसंबंधावाछिन्नाभित्यादिव्यवहाराभावात्
तथ्याच यदभावीयप्रतियोगितावच्छेदकसंबंधेन यदभावीयप्रतियोगित्वानिरूपिता
वच्छेदकीभूतधर्मावाछिन्नासंबंधित्वं हेतुमतत्तदभावीयतत्प्रतियोगित्वानिरूपितावच्छेद
कताशून्यत्वं साध्यतावच्छेदकोविवक्षितमित्यदोषः यत्प्रतियोगीनेत्यपहाय ययादृशप्रति
योगीत्यभिधानादेवतादृशार्थलाभात् नच प्रतियोगितावच्छेदकत्वरूपं यादिप्रतियोगि
त्वं तदा यदभावीययादृशप्रतियोगितावच्छेदकसंबंधेन तदभावीयतादृशप्रतियोगित्वा
वाछिन्नस्यानाधिकरणत्वं हेतुमत इत्येव सम्यक् प्रतियोगितावच्छेदकावाछिन्नत्वप्रवेशो
व्यर्थइति वाच्यम् वन्हिधूमोभयवान्वन्हेरित्यादावतिव्याप्त्यापत्तेर्हेतुमात्रस्यैव वन्हिधूमो
भयत्वावाछिन्नाभावप्रतियोगित्वादित्यस्मद्गुरुचरणाः व्याप्तसामानाधिकरण्यपदार्थे परा
मर्शव्याप्तसाध्यसामानाधिकरण्यपदार्थः संबंधाविशेषेणैव साध्यसाधनयोस्सामानाधि

मातिरूपते साध्यासामानाधिकरण्यं विरोधः साध्यवदवृत्तित्वाभावप्रतियोगितावच्छेदकत्वं साध्यतावच्छेदकधर्मावच्छिन्नसंबंधेन कालम् १ प्रतियोगितावच्छेदकीभूत...
यथा गौरश्वत्वात्
यथा वह्निमान् जलात्

जा॰ति॰
२

एवं च मीनादि सामा
... अनुमितिः स्यात्
... तादात्म्येन सा...
... सामानाधिक
रण्यसत्वात् २

करण्यं तानादनुमितिः तन्नोपातिव्याप्तं च न तथैव वादिनोपलभ्य हेत्वाभासत्वमितिमते नेदम् यदि च येन केनापि
संबंधेन साध्यसाधनयोः सामानाधिकरण्यज्ञानादनुमितिस्तव्यापकसाध्यसंबंधितामात्रं वा व्याप्तिर्व्या
पकत्वदशे साध्यसाधनयोः संबंधाविशेषस्य प्रवेशादेवातिप्रसंगभंगादिति विभाव्यते तदामर्शे साध्य
धनत्वानुमित्यावसाध्यस्य व्याप्यवस्तुतावच्छेदकधर्मेण साकं सामानाधिकरण्यं तत्र प्रविष्टोपाद
शासंबंधः त्यर्वो दोष्यः प्रमवान्वन्हेरित्यादौ मकान्नमीयसंयोगेन सहेतौ संयोगमात्रेण हेतुमत्ता मा
त्रया व्याप्तिरेव इव्यत्वसाध्यकेपक्षे नुकोगिकसमवायेन सम्बन्धादिहेतौ समवायमात्रेण तत्वता मादाया
पीत्यतोपसंबंधः तस्य हाद्यक्षाद्यशासंबंधः युक्तम् साध्यस्य चेति व्याप्यसामानाधिकरण्ये प्रविष्टःर
त्यन्वयः प्रमादिकालोनसंयोगेन वान्हिसामान्याभावसत्वाद्वान्हिमान् प्रमादित्यादावव्याप्तिरतोत्रा
पिधारासंबंधः युक्तम् तेन संबंधेन बोद्धानुमानेत्यस्य फलमाह प्रमसमवायीति प्रतियोगिता
याशाति अवच्छेदकत्वेपि वान्हित्वसमवेतातीत्यन्वयः साध्यस्य चेत्यादेः फलमाह प्रमसंयोगीत्या
दे ननु तादात्म्येन गगनादेः साध्यत्वाभावासत्वादव्याप्तिः तत्र साधनवान्निष्ठान्योन्याभावप्रतियोगिता

सामान्यवत्वं च गगनावयवसंयोगविशेषः तत्वसमवायिसमवेतत्वसंबंधेन गविपत्तेहेतुः १ रम्न

पर

1432

२०

ग्यनधिकरणहेत्वधिकरणाप्रसिद्धेः ननु संबंधविशेषेण साध्यसाधनयोस्सामानाधिकरण्यप्रवेशे तादात्म्येन हेतुसा
ध्याभावे ऽव्याप्तिस्तत्संबंधेन साध्यसाधनयोरधिकरणाप्रसिद्धेरत आह एवंवास्यीतेरिति संबंधविशेषानिवेशोऽस्यीत इत्यर्थः
सामानाधिकरण्यघटितव्याप्तिपदेन हेतुसामानाधिकरण्यप्रविष्टहेत्वधिकरणत्वस्य परिग्रहः प्रयोजनमाह तथा
चेति धर्म्मिणोपीति तादात्म्येन व्याप्यत्वं व्यापकत्वं चानिर्वहतीत्यर्थः अन्यथा तादात्म्येन हेतोस्साध्यस्य चाधिकरणाप्र
सिद्ध्या न तन्निर्वाह इति भावः यो न्योन्याभाव इति यो भाव इत्येव वक्तुमुचितमन्योन्याभावत्वानिवेशवैयर्थ्यादिति ध्येयम्
तदनवच्छेदकवान्हिमत्वेति वान्हिमत्वं व न्याधिकरणत्वं तच्चाधिकरणव्यक्तीनां भेदेप्यभिन्नमेवेत्याशयेनेदम् अत्र
साध्यसाधनयोरिव तदीयसंबंधयोरपि भेदे न व्याप्तेर्भेदात्तादात्म्येन हेतुसाध्यकस्थले हेतुनिष्ठाभावाप्रतियोगिसा
ध्यतादात्म्यमेव व्याप्तिर्वक्तुमुचितेति वदंति एवमिति साध्यसामानाधिकरण्यघटितसंबंधित्वानिवेशे कृत इत्यर्थः ध
र्म्मिण इति वस्तुन इत्यर्थः तथा च गोःसास्नावत्वाद्वान्हिमान्धूमवत इत्तादात्म्यसंबंधेन व्यापकता व्याप्यतापि सं
गच्छत इति भावः ननु तादात्म्येन धार्म्मिणो धर्म्मव्याप्यतापामयपत्तिद्धांतरित्यत आह अत एवेति धार्म्मिणो धर्म्मव्या

याःसाध्यताघटकतादात्म्यसंबंधावच्छिन्नत्वे मानाभावस्य स्वयमेव बौद्धाधिकारादिष्यत्यामुक्तत्वादेवं धनी चैत्रत्वादि
त्यादौ वृत्यनियामकत्वाभित्वादिसंबंधेन धनादेस्साध्यतायामपि तादृशसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेरतत्रा
ह पक्षेति यत्तु प्रतियोगितावच्छेदकसंबंधेन तद्व्याधिकरणं प्रवेश्य पुनः प्रतियोगितायास्साध्यता
तावच्छेदकसंबंधावच्छिन्नत्वादिवक्तव्यतागौरवाद्धेत्वादिकल्प इति तन्न संबंधांतरावच्छिन्नतत्तन्नंतप्रतियोगिता
वच्छेदकभेदकूटघटितत्वेन यत्प्रादिकल्पस्यैव गुरुत्वादित्याशयः संबंधभेदेन साध्यतावच्छेदकसंबंधेन न यो
ताम् अतएव पर्वतादावनुयोगिकसंयोगादिना वन्ह्यादेस्साध्यतायां तत्र कूमेऽव्याप्तिस्तादृशप्रतियोगितावच्छेदकसंबं
धेन प्रतियोगिनो यदधिकरणं तदन्यत्वस्य साध्यतावच्छेदकसंबंधेन यत्प्रतियोगिसंबंधितदन्यत्वस्य वा हेतुमत्यप्र
सिद्धेरिति वाच्यम् तादृशप्रतियोगितावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपितविशेषणविशेषेण साध्यता
वच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपितविशेषणतादिविशेषेण वा तादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकर
णत्वसामान्याभावस्योक्तत्वात् [illegible] कालिकसंबंधेन सर्वस्यैव हेतुमतः प्रतियोग्यधिकरणतावत्त्वात्प्रतियो

तथा चायमभिप्रायः गोत्वत्वग्रहदशायामेव भूततो व्यापकतावच्छेदकत्वज्ञानात् गोत्वविधेयकत्वमनुमितेर्वक्तव्यं मम्याण गवेतरासमवेतत्वरूपस्य
गोत्वानिरूपित व्याप्तिग्रहात् गोत्वविधेयकत्वस्य च समेवेति किं धर्मितावच्छेदकव्यापकत्वेनेति ४

ज्ञा॰ग॰सि॰

२२

त्तं गोत्वत्वेति गोत्वत्वं गवेतरावृत्तित्वं तथा च गवेतरावृत्तित्वरूपायां गोत्वव्याप्तेर्ज्ञानदशायामुत्पन्नायामयं गौरित्यनुमिते
र्गोत्वाविधेयकत्वासंभवात् गोत्वविधेयकत्वमेवेति तदनुरोधादवश्यं धर्मितावच्छेदकव्यापकत्वं वाच्यमिति भावः ननु
गोः साध्यत्वेपि गोत्वं हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकमित्याकारकव्याप्तिधियोनुमितिहेतुत्वात्तत्र च धर्मि
तावच्छेदकाविधेयैव गोत्वत्वग्रहस्यापेक्षितत्वात्तदग्रहे गोविधेयकानुमितिरप्यनुपपन्नेत्यत आह आदीति
आदिनापक्षधर्मतासंग्रहः तथा च गवेतरावृत्तित्वव्याप्तेस्सास्नाव्यापकतावच्छेदकत्वग्रहे धर्मितावच्छेदक
तयोपादास्यतीति ध्रौव्येपि तादृशीत्यस्य पक्षपक्षधर्मताधीस्तत्रैवायं गौरित्यनुमितेर्गोविधेयकत्वमावश्यकमिति
तदनुरोधेनैव तादात्म्येन धर्मितावच्छेदकव्यापकत्वं वाच्यमित्याशयः यत्तु शुद्धगोत्वावच्छिन्नाविधेयकानुमि
तिं प्रति निरवच्छिन्नगोत्वविशेष्यताकमेव प्रतियोगितानवच्छेदकत्वज्ञानं हेतुरतो गोत्वत्वाग्रहेपि गोत्वेसा
स्नादिव्यापकतावच्छेदकत्वग्रहसंभवात् गोसाध्यकानुमितेर्नानुपपत्तिरभावलौकिकप्रत्यक्षएवाधिक
रणतावच्छेदकरूपेणोपास्थितेर्हेतुत्वादिति मतं तत्तुच्छम् व्याप्तिज्ञानाप्रतिबध्यतयातादृशव्यापकताग्र
हस्यानुमित्यहेतुत्वात् अन्यथा तुल्ययुक्त्या शुद्धगोत्वाविधेयकानुमितिं प्रति निरवच्छिन्नाविशेष्यता

न

न

नि॰

चार

गम

1435

व्याप्यत्वादेरेवेत्यर्थः तत्र तत्र व्यतिरेक्यादि ग्रंथे ननु समवायेन जलादेः पृथिवीत्वाभावव्याप्यत्वपरतयैव तत् कुर्यसंगतिरि
त्याशंक्य तत्स्यासति पृथिव्यां जलादिभेदसाधनार्थं तद्दूपन्यासो न स्यात् व्यापकतावच्छेदकसंबंधेन व्यापकाभावेन व्याप्यता
घटकसंबंधावच्छिन्नव्याप्याभावस्यैव व्यतिरेकीत्यत्र लाभानि दृष्टांतपूर्वकं परिहरति यथा चेति धूमाभाववद्वृत्ति नवह्नि
धीरित्यन्वयः व्याप्यमिति नियम उपपद्यत इति शेषेणान्वयः महानसे संयोगेनेति नानिवर्तत इत्यन्वयः न संयोगाव
भावा च्छिन्नानुमितौ भासत इति तदर्थः निवर्ततेवेति धूम इति पूर्वेणान्वयः तादात्म्येनैवेति समवायेन व्याप्यतायां
समवायेन जलस्यात्यंताभावस्त्वसिद्धेरिति जलभेदसाधनार्थं तत्कृपि वतारेन स्यादिति भावः नन्वेतावतापि ता
दात्म्यावच्छिन्नजलाभावाप्रसिद्धौ न तु जलान्योन्याभाव इति न दोष तादवस्थ्यमतआह स एवेति धर्मिणो धर्मव्या
प्यत्वे प्राचां संवादमुपन्यस्य धर्मिणो धर्मव्याप्यत्वे तन्माह इत्यत एवं चेति धर्मिणो धर्मव्यापकत्वेपुक्तिम
प्याह अत एवेति धर्मिणो धर्मव्यापकत्वादेवेत्यर्थः नाद्यं गोरित्यनुमितिर्गोवेतरावृत्तिरूपायाः शृंगो त्व
त्वनिरूपितव्याप्तेर्ज्ञानात्समवायेनानिरवच्छिन्नगोत्वसाध्यकैवंभाविप्याति साध्यवदन्यावृत्तित्वरूपाया
व्याप्तेरनुमितिहेतुत्वस्याग्रेवाच्यत्वात् तन्नात्र दृष्टानुमित्यनुरोधाद्धर्मिणो धर्मव्यापकत्वस्वीकारो नुचित इत्यत उ

योगितावच्छेदकत्वेऽपि चिति यत्कल्याणनुसारेण व्यापकत्वं संपादयति साध्यतावच्छेदकसंबंधेनेति तथा च संबंधा
न्तरावच्छिन्नघटाघभावसमादायैव लक्षणसमन्वय इति भावः द्रव्यत्वे गगनासंयुक्तावृत्तित्वं तरेत्त व्यभिचाराद्धेत्वंतर
माह पृथिवीत्वादिति व्यापकत्वमपीति गगनादेरितिपूर्वेणान्वयः नन्वेवं निरुक्तव्याप्तिज्ञानाद्द्व्यो गगनवानि
त्यनुमितिप्रमा स्यादत आह इतिचेदपीति तथैव वृत्यानियामकसंयोगेनैव तथा च तादृशसंबंधेन गगनानुमितेः
प्रमात्वमिष्टमेवेति भावः तेनासंबंधित्वादिति येन संबंधेन साध्यसामानाधिकरण्यं परामर्शे भासते तेनैव
संबंधेन साध्यानुमितेः फलत्वादिति भावः सामानाधिकरण्यधियो हेतुत्वस्य तदंशे संबंधविशेषानिवेशस्य
वानंगीकारमते प्याह अव्यापकत्वाच्चेति तेनेत्यनुषज्यते तथा च तादृशसंबंधेन साध्यस्य हेतुव्यापकत्वे गृह्य
ते तेनैव संबंधेन साध्यासिद्धिफलमतो निरुक्तनियामकसंबंधेन व्यापकत्वासंभवादेव न तेन साध्यस्य प्रमा
नुमितिरिति भावः ननु वृत्यनियामकसंयोगेनापि गगनस्य पृथ्वीत्वादिव्यापकत्वं दुर्वारं तादृशसंबं
धेन संबंधस्य प्रसिद्ध्या गगनाभावस्य प्रतियोगिव्यधिकरणत्वाभावात्तादृशाभावांतरप्रतियोगी

1438

कस्य प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावाप्रतियोगित्वज्ञानस्य हेतुत्वाद यं गौरित्यनुमितेर्गोत्ववत्त्वाद्युपस्थिता
वपि गोत्वरूपधर्मिसाध्यकत्वस्य दुर्वारत्वापत्तेरिति दिक् । प्रांचस्तु गोतादात्म्यस्य साध्यव्यापकत्वग्रहादेव गोतादा-
त्म्येन सिद्धिसंभवान्न तदनुरोधेन गोतादात्म्येन व्यापकत्वस्वीकारो युक्तः संबंधगतव्यापकत्वग्रहादेव संबंधि-
नोनुमितेर्भिन्नत्वादेः संभवत्वात् तदर्थं गोत्वत्वाद्य ग्रहदशायामिति गोतादात्म्यत्वाद्यग्रहदशायामित्यर्थः
इत्यर्थः । साहुस्तदिदं तुच्छं गोत्वत्वाद्यग्रहदशायामित्यस्य गोत्वत्वेनाग्रहोपस्थितेरिति व्युत्पत्त्या गोत्वस्य बाध-
निश्चयदशायामित्यर्थः । तथा च तदानीमयं गौरित्यनुमित्यर्थं धर्मितो धर्मव्यापकत्वमवश्यं स्वीकार्यमि-
त्यपि वदंति गोत्वेन सिध्यतीति परे । अन्वयः गोर्द्वित्वेऽकारादिति तादात्म्येनेत्यनुपपन्नत्वे एवं चेति सामानाधि-
करण्यघटकसंबंधित्वानिवेशे चेत्यर्थः संयोगत्वेन संयोगमात्रस्य प्रतियोगितावच्छेदकसंबंधत्वे वृत्त्यनियाम-
कसंयोगस्यापि तत्त्वं न सर्वांशसिद्धमतो मात्रपदम् संबंधरूपत्व इति अन्यथा तादृशसंबंधावच्छिन्नप्रतियोगि-
ताकाभावाप्रसिद्ध्या गगनादेः पृथिवीत्वादिव्यापकत्वं दुर्घटमेव स्यादिति भावः तादृशसंबंधस्य प्रति

लिकसंबंधावच्छिन्नशाभादभावसत्वान्न च घेवंविधो वा व्यत्वादि तत्तदनधिकरणदेशाप्रसिध्यातदवच्छेदेनकालिक
संबन्धावच्छिन्नवाच्यत्वाभावस्य देशीकाविशेषणतया कालेसंभवादितिभावः नस्यादिति तथाच कालो घटवान्म
हाकालत्वादित्यादौ व्याप्तिलक्षणाव्याप्तिरिति भावः प्रथमाविवक्षानुसारेण दोषंसंगमयति स्वावच्छेदकेति प्रति
योगितावच्छेदकसंबंधेनेत्यर्थः काले महाकाले तत्संबंधावच्छिन्नत्वस्य साध्यतावच्छेदकीभूतकालिकसंबंधा
वच्छिन्नत्वस्य संभवादित्याशयेनान्वयः द्वितीयविवक्षानुसारेण तमाह तेनेसंबंधेनेति साध्यतावच्छेदकीभूत
कालिकसंबंधेनेत्यर्थः ननु महाकालान्यत्वविशिष्टघटाभावएव प्रतियोगीव्यधिकरणस्सुलभः नचात्रविशे
षणौविशेषशब्देन महाकालनिरूपितविशेषणतायाएवाविवक्षितत्वादेतादृशसंबंधेननिरुक्तप्रतियोग्यधिक
रणाप्रसिद्धेरुक्ताभावस्यापि प्रतियोगिवैयधिकरण्यासंभवइतिवाच्यम् तथासतिकालवृत्तिधर्मस्यतादृश
विशेषणतयाकिमपिव्यापकंनस्यादित्यस्यैवसम्यक्त्वे ऽष्टद्रव्यातिरिक्तेत्याद्यभिधानस्यसंदर्भविरोधापत्तेः स्वरूप
संबंधेनगगनादेर्वृत्तिमत्त्वे त्याम्यैमग्रंथादिविरोधप्रसंगाच्च महाकालीयविशेषणतयागगनादेर्वृत्तिमत्वेपि

म्र
ता
त्वि

त्वस्य च गगनादावसत्त्वादत आह व्यक्तीति इदं वृत्तीनियामकसंबंधेन गगनादेरव्यापकत्वं तथाच निरुक्तप्रति
योगित्वेस्यादिनावह्न्यभावप्रतियोगिवैयधिकरण्यं वृत्तीनियामकसंबंधेन गगनाभावेस्यास्यतीति भावः कालि
कसंबंधेन गोत्वादौ घटादिकालोपाधिमात्रवृत्तेर्घटत्वादिहेतौ नाव्याप्तिर्भिन्नकालीनतत्तद्व्यक्तित्वावच्छिन्नाभा
वस्यैव घटादौ प्रतियोगिवैयधिकरण्यसंभवादत उक्तम् अवृद्व्याप्तीकेति पृथिव्यादिचतुर्दयातिरिक्तेति तुल्या
यः गगनादेः कालवृत्तिरहादेव युदासादिति ध्येयम् कर्मात्मकत्वं तु कालस्यापि भिन्नकालीनतत्तद्व्यक्तित्वा
वच्छिन्नाभावप्रतियोग्यनधिकरणत्वप्रसिद्ध्या तन्मात्रवृत्तित्वं दत्त्वादिहेतौ नाव्याप्तिरत[illegible]रमद्रव्यपदम्
तथा च विधकालत्वादावव्युक्तदिशा नाव्याप्तिरतो मात्रपदम् तादृशधर्मस्य महाकालत्वादेस्समवायादिना
व्यापकत्वं संयोगाद्यव्याप्यवृत्तेस्तु घटमत उक्तं विशेषणतेति कालिकविशेषणतेत्यर्थः व्याप्यवृत्ति प्रमे
यत्वादेः प्रतियोगिवैयधिकरण्यघटितमेव कालिकसंबंधावच्छिन्नव्यापकत्वं संभवतीत्यत उक्तमव्या
प्यवृत्तीति तादृशाधर्मं च घटादिकं द्रव्यत्वादिकं च तद्वृत्तोऽपि कालस्य तदनधिकरणदेशावच्छेदेन का

योगीतावच्छेदकतापर्याप्त्यधिकरणभिन्नत्वस्यैवानिवेशयोगात् एवंच प्रकृते महाकालान्यत्वविशिष्टघट
त्वावच्छिन्नाभावस्य प्रतियोगीतायास्साध्यतावच्छेदकाघटकेन महाकालान्यत्ववैशिष्ट्यरूपसाध्यानिष्ठधर्मे
णावच्छिन्नत्वात्तादृशप्रतियोगीताकाभावमादायपनप्रातियोगिव्याधिकरणाभावस्य प्रासिद्धिसंभावनापीति श्रा
द्धुः तच्चिंत्यम् प्रमेयवान्वाच्यत्वादित्यादौ हेतुसमानाधिकरण तादृशप्रतियोगीताकाभावाप्रसिध्या ऽव्या
प्तिप्रसंगात् वस्तुतो यादृशप्रतियोगीतावच्छेदकविशिष्टस्यानाधिकरणत्वं हेतुमत इत्यत्रावच्छेदकवैशि
ष्ट्यमवश्यं साध्यतावच्छेदकताघटकसंबंधेनैव वाच्यम् अन्यथा तप्तायःपिण्डस्यापि कालिकसंबंधेन
धूमत्वविशिष्टयद्वन्ह्यादिकं संयोगेन तदधिकरणतया धूमवान्वन्हेरित्यादावतिव्याप्त्यापत्तेः इत्थं च यत्र
समवायेन घटत्वविशिष्टस्य कालिकसंबंधेन साध्यता तत्र महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभाव
स्य साध्यतावच्छेदकताघटकसंबंधेन प्रतियोगीतावच्छेदकावच्छिन्नत्वमप्रसिद्धं स्वरूपसमवायाभ्यामेव
तत्र तथात्वाद्विशिष्टानिरूपितसमवायानभ्युपगमात् तादृशाभावमादायप्रसिद्धिसंभव इति ध्येयम्

तादृशसंबंधसामान्येमहाकालान्यत्वविशिष्टघटत्वावच्छिन्नप्रतियोगिकत्वाविरहात्तादृशघटत्वावच्छिन्नाभा
वस्यैवनिरुक्तक्रमेणप्रतियोगिव्यधिकरणत्वसंभवेनपूर्वमतस्यैवसमंजसत्वादितिचेन्न इदानींमहाकालान्यत्ववि
शिष्टोघटःकालोयंमहाकालान्यत्वविशिष्टघटवानित्यादिप्रतीत्यामहाकालस्यापितत्तत्कालोपाध्यवच्छेदेनमहा
कालान्यत्वविशिष्टघटवत्त्वात् अन्यथोक्तप्रतीत्याखंडकालएवविशिष्टघटवत्त्वावगाहनेवस्तुमात्रस्यैव
महाकालेसत्त्वप्रसंगात् इदानींतदानीमित्यादिप्रतीतिव्यतिरेकेणमहाकालाविषयिण्याःप्रतीतेःस्वरसतःकुत्रा
प्यसत्त्वात् नचैवंखंडकालस्याधिकरणत्वेमानाभावःघटध्वंसविशिष्टःकालःघटवदन्यइत्यादिप्रतीतेःप्रमाणत्वा
नुरोधेनैवखंडकालस्यन्याय्यत्वादितिसिद्धांतानुसारीयन्याः परंतुमहासीयवह्नित्वेनवह्निघटोभयत्वेनवाऽव
च्छिन्नप्रतियोगिताकस्यधूमसमानाधिकरणाभावस्यप्रतियोगितावच्छेदकत्वंवह्नित्वेप्यक्षतंतत्त्वव्याप्तिभियाऽव
श्यंसाध्यतावच्छेदकाघटकोयस्साध्यवृत्तिधर्मस्तदन्यावच्छिन्नेवहेतुसमानाधिकरणाभावप्रतियोगितानिवेशनी
याप्रत्येकमुभयत्रपर्याप्तिसंबंधेनासत्त्वोपधर्मस्यतादृशसंबंधेनोभयवृत्तित्वासंभवेनहेतुमन्निष्ठाभावप्रति

दृशासंबंधेनेत्यस्य फलमाह सत्त्वादेरिति विषयतायावृत्त्यानिमाकत्वे सत्त्ववति घटादौ ज्ञानाभावस्य
सहजतः प्रतियोगिवैय्याधिकरण्यं संभवतीत्यतः संयोगसामान्यस्येति नातिप्रसंग इति ज्ञानवा
न्संयोगवान्सत्त्वादित्यादौ नातिप्रसंग इत्यर्थः सत्तावद्वृत्तित्वसामान्याभावस्य संयोगादावभावा
दुक्तातिव्याप्तिवारणमेव यात्किंचिदित्यस्यापि प्रयोजनमित्यवधेयम् प्रतियोगितावच्छेदक
विशिष्टेत्यस्य फलमाह भूतत्वेति स्वपंमनसः स्वडनाद्भूतत्वम् तत्त्वोभयसाध्यकम् तत्त्वस्य सद्धे
तुतामाशंक्याह गुणकर्मान्यत्वेत्यादि विशिष्टांतद्वयंमनोगुणयोः क्रमेणान्वितम् इत्थं च वि
शिष्टस्यानतिरिक्तत्वाद्विशिष्टधर्मावच्छिन्नाधेयत्वस्यातिरिक्तत्वमित्यभ्युपेत्य अन्यथोभयत्व रि
स्यैकविशिष्टापरत्वरूपत्वेभूतत्वम् तत्त्वोभयगुणकर्मान्यत्वविशिष्टसत्तयोरतिरिक्ततयातयो रि
स्सहजत एव मनोगुणघटितया प्रतियोगितावच्छेदकविशिष्टेत्यभिधानस्यासंगत्यापत्तेरि
त्यवधेयम् सामान्यपदस्य फलमाह संयोगसामान्येत्वेति तथा च संयोगिद्रव्यत्वादित्यादाव राम

केचित्तु साध्यसाधनभेदेन व्याप्तेर्भिन्नत्वाद्विशिष्टसाध्यकस्थले तु यादृशप्रतियोगितावच्छेदका
वच्छिन्नानधिकरणत्वं हेतुमत इत्यादिवक्ष्यमाणविशिष्टसाध्यतावच्छेदकस्थले तु यादृशप्रतियोगिता
श्रयानधिकरणत्वं हेतुमतस्तेनैव लाघवाद्धेत्वंशे तथा शुद्धसाध्यतापन्नमहाकालान्यत्वविशिष्ट
घटस्याभावोऽपि प्रतियोगिसमानाधिकरण एव प्रतियोगितावच्छेदकधर्मत्रिरूपे वला
घवान्न तु प्रतियोगित्वरूपानेकधर्मैकत्वेन गौरवाद्वर्तानेकप्रतियोग्यधिकरणतामादाय संयोगेपतत्त्वादेत्या
दावव्याप्तिः स्यात् तत्र कालो घटवान्महाकालत्वादित्यादावव्याप्तिवारणाय मेवाविशिष्टसाध्य
तावच्छेदकस्थलेऽपि प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशस्य प्रामाणिकतया गौरवस्याकिं
चित्करत्वादिति सार्वभौममतमाशंक्यानिराचष्टे न वेति वाच्यमिति परेणान्वयः तादृशसंबंधेनेति
साध्यतावच्छेदकसंबंधेनेत्यर्थः इदं चाद नीत्यस्य प्रतियोगिवृत्त्या न्वितम् तादृशपदस्य प्रतियोगि
तावच्छेदकसंबंधपरत्वे पुनरग्रे प्रतियोगितासाध्यतावच्छेदकसंबंधा [illegible] वच्छिन्नाग्राह्याता

धिकरणयावद्धेत्वधिकरणकोयोयस्तदन्यत्वंप्रतियोगिवैयधिकरण्यंवाच्यमतोगगनाभाव
मादायैवप्रसिद्धेर्नकोपिदोषः नचैवंयत्संबंधेनयद्धर्मावच्छिन्नानाधिकरणंहेत्वधिकरणंत
त्तत्संबंधान्यसाध्यतावच्छेदकसंबंधेनतद्धर्मावच्छिन्नसामानाधिकरण्यमेवलाघवाद्व्या
प्तिरस्तु तथाचघटवान्महाकालत्वादित्यादौसमवायेनघटाद्यभावोपिप्रतियोगिव्यधिक
रणस्संभवतीतिवाच्यं घटत्वादिविशिष्टद्रव्यत्ववान्घटत्वादित्यादावव्याप्तेःकेनापिसंबंधे
नहेतुमतःसाध्यतावच्छेदकावच्छिन्नानाधिकरणत्वासंभवादितिप्राहुः तादृशसंबंधसा
मान्यरत्यसस्यपूर्ववद्वर्योबोध्यः क्वाचित्साध्यतावच्छेदकसंबंधसामान्यइत्येवपाठः विव
क्षितत्वादिति अभावांतमूलग्रंथेनेत्यादिः तथाचसाध्यतावच्छेदकसंबंधसामान्येयादृश
प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयो
गिकत्वसामान्योभयाभाववत्तादृशप्रतियोगितानवच्छेदकीभूतसाध्यतावच्छेदका

व्याप्तिवारणार्थमेव सामान्यपदमिति भावः विशिष्टेत्यादि विशिष्टनिरूपिताधेयत्वस्येत्यर्थः तथा
च विशिष्टसत्तावान् जातेरित्यादावव्याप्तिरिति भावः ननु तादृशसंबंधावच्छिन्नपात्वं
यदि द्रव्याधिकरणनिष्ठाधिकरणतानिरूपकतानवच्छेदकप्रतियोगितावच्छेदकत्वं
सामान्यकान्तेन तद्वि बह्निमत्तो नोक्तदोषः इत्यत आह समवायेनेति ननु समवायेन
जातेर्व्याप्यवृत्तित्वान्न साध्यके प्रतियोगिवैयधिकरण्यमेव न देयं देयं वा व्याप्यवृत्ति
साध्यकस्थली यन्निरुक्तसाध्यतावच्छेदके व्याप्यवृत्तितानवच्छेदकत्वविशेषणम
तो न तत्र लक्षणस्यैवाव्याप्तिरित्यत आह संयोगादीति तत्र विशिष्टनिरूपिताधे
यत्वस्यातिरिक्तत्वेन गगने स प्रतियोगितावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसंबं
धावच्छिन्नत्वोभयाभावे हेत्वधिकरणपात्वं विद्यमानेकिं वृत्तित्वं सामान्यकत्वस्याविवक्षि
तत्वान्नोक्तोपि दोषः इत्यस्य कुरुचरणाः नव्यास्तु साध्यतावच्छेदकसंबंधेन प्रतियोग्यन

लक्षणघटकीभूतो
भावः २
व

योगसामान्य एवसमवायनिष्ठस्यपर्वतानुयोगिकत्वस्यवह्नित्वावच्छिन्नप्रतियोगिकत्वस्यच
द्वयोरभावसत्त्वान्नपैवाव्याप्तिरतआह सामान्योभयेति तादृशोभयाभावस्यस्वरूपसंबंधेनवो
ध्यः तेनसमवायादिनातदुभयाभावस्यसंबंधमात्रेसत्वेपिसद्धेतौनाव्याप्तिः एतद्घटवान्कालां
तरीयतद्घटत्वादित्यादावेतद्घटत्वावच्छिन्नप्रतियोगिकत्वविशिष्टतद्घटानुयोगिकत्वाप्रसि
द्धेरभावांतरमादायातिव्याप्तिः गगनप्रतियोगिकत्वविशिष्टमहाकालानुयोगिकत्वाप्रसि
द्ध्या गगनाभावमादायप्रकृताव्याप्तिवारणासंभवश्चस्यात् अतोनिरुक्तप्रतियोगिप्रतियो
गिकत्वविशिष्टयत्किंचिद्धेतुकरणानुयोगिकत्वसामान्याभावं परित्यज्यतदुभयसामान्या
भावउक्तः नचयादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसंबंधसामान्येहेत्व
